श्रीहीरकप्राभृतम् - तृतीयखण्डः

सर्वशुक्लोत्तरा-समीक्षणम्

डॉ. चन्द्रप्रकाश उप्रेती



देववाणी-परिषद्, दिल्ली

सर्वशुक्लोत्तरा-समीक्षणम्

श्रीहीरकप्राभृतम् - तृतीयखण्डः

डॉ. चन्द्रप्रकाश उप्रेती



~~प्रत्यभिज्ञाहृदयम्~~

Conf / L.D (D) / ACGD /

Rbsovv / Chyd DAEA /

Shukla / Bhashan PMS / 12.17.25

वेदोच्चारणपद्धति

वेदो / Shukla / BRoBK

BMB Tika

वेदो / Shukla / bmb tika PMS


~~प्रति~~ सर्व कम लोक

वेदो / Shukla / Conf PMS

Cauß / [illegible] (E) / Sheeheerak / Shree
Heerak Part 3 /
03 Sheeheerak
Cpu - 01 Pmd
02 4
03 4
04 4
05 4

श्रीहीरकप्राभृतम्

(आचार्यश्रीरमाकान्तशुक्ल-हीरकजयन्ती-शुभाभिनन्दनग्रन्थः)



आचार्यश्रीरमाकान्तशुक्लः

(जन्मतिथिः पौष कृष्ण दशमी, वि.सं.१९९७, भौमवासरः)

(२४.१२.१९४०)

संयोजयित्री

आचार्यरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितिः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितिः

संरक्षक-मण्डलम्

अध्यक्षः

आचार्यरामकरणशर्मा

राष्ट्रपतिसम्मानितः संस्कृतविद्वान्

पूर्वकुलपतिः - का.सिं.द.सं.वि.वि. (दरभंगा), सम्पूर्णानन्दसंस्कृतवि.वि. (वाराणसी)

पूर्वाध्यक्षः संरक्षकश्च - देववाणी-परिषद् (दिल्ली), पूर्वाध्यक्षः - आई.ए.एस.एस.

सदस्याः

महामहोपाध्याय आचार्यसत्यव्रतशास्त्री

राष्ट्रपतिसम्मानितः संस्कृतविद्वान्, पद्मभूषणसमलङ्कृतः, लब्धज्ञानपीठपुरस्कारः

पूर्वकुलपतिः, ज.सं.वि.वि., पुरी - पूर्वसंस्कृतविभागाध्यक्षः, दिल्लीविश्वविद्यालयः

महामहोपाध्याय आचार्यरेवाप्रसादद्विवेदी

राष्ट्रपतिसम्मानितः संस्कृतविद्वान्, पूर्वाचार्याध्यक्षः प्राच्यविद्याविभागः - का.हि.वि.वि.

प्रोफेसर इमेरिटस (संस्कृत) - का.हि.वि.वि. वाराणसी

महामहोपाध्याय आचार्य'अभिराज'राजेन्द्रमिश्रः

पूर्वकुलपतिः - सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः (वाराणसी)

राष्ट्रपतिसम्मानितः संस्कृतविद्वान्, पूर्वाध्यक्षः- देववाणी-परिषद् (दिल्ली)

महामहोपाध्याया आचार्या दीक्षितपुष्पा

राष्ट्रपतिसम्मानिता संस्कृतविदुषी, अध्यक्षा - पाणिनिशोधसंस्थानम् (बिलासपुरम्)

आचार्यराधावल्लभत्रिपाठी

राष्ट्रपतिसम्मानितः संस्कृतविद्वान्, पूर्वकुलपतिः - राष्ट्रियसंस्कृतसंस्थानम्

पूर्वाचार्याध्यक्षः - डॉ.ह.सिं.गौ.वि.वि. (सागर), पूर्वाध्यक्षः- देववाणी-परिषद् (दिल्ली)

आचार्यरामानुजदेवनाथन्

पूर्वकुलपतिः, जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयः, जयपुरम् (राजस्थानम्)

प्राचार्यः, श्रीरणवीरपरिसरः, राष्ट्रियसंस्कृतसंस्थानम् (जम्मू)

श्रीमती रमा शुक्ला

उपाध्यक्षा - देववाणी-परिषद् (दिल्ली)

आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितिः

परामर्शदातृ-मण्डलम्

अध्यक्षः

आचार्यः श्रीधरवासिष्ठः, पूर्वकुलपतिः, ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

सदस्याः

आचार्यः पी.एन.शास्त्री, कुलपतिः, राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली
आचार्यः रमेशकुमारपाण्डेयः, कुलपतिः, ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली
आचार्यः देवनारायणझा, कुलपतिः, का.सिं.द.सं.विश्वविद्यालयः, दरभंगा (बिहार)
आचार्यः हरेकृष्णशतपथी, कुलपतिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः (आन्ध्रप्रदेश)
आचार्यः अर्कनाथचौधरी, कुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः (गुजरात)
आचार्यः महावीर-अग्रवालः, कुलपतिः, उत्तराखण्डसंस्कृतविश्वविद्यालयः (उत्तराखण्ड)
आचार्यः विनोदशास्त्री, कुलपतिः, ज.रा.रा.संस्कृतविश्वविद्यालयः, जयपुरम् (राजस्थानम्)
आचार्यः यदुनाथप्रसाददुबे, कुलपतिः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी (उ.प्र.)
आचार्यः मिथिलाप्रसादत्रिपाठी, पूर्वकुलपतिः, म.पा.सं.एवं वैदिक वि.वि. उज्जैन, (मप्र.)
आचार्यः इन्द्रदत्त-उनियालः, सम्पादकः, विश्वसंस्कृतम्, होशियारपुरम् (पंजाब)
आचार्या शशिप्रभाकुमारः, कुलपतिः, सांचीबौद्धभारतीयज्ञानअध्ययनवि.वि., भोपाल (मप्र.)
आचार्या उमा.सी.वैद्यः, कुलपतिः, कविकुलगुरुकालिदाससंस्कृतवि.वि., रामटेक, (महाराष्ट्र)
आचार्यः रमेशचन्द्रपण्डा, कुलपतिः, महर्षिपाणिनिसंस्कृतएवंवैदिकविवि., उज्जैन, (मप्र.)
आचार्यः प्रफुल्लकुमारमिश्रः, कुलपतिः, उत्तरी ओडिशावि.वि. (उडीसा)
आचार्यः दीपकशर्मा, कुलपतिः, कुमारभास्करवर्मासंस्कृत एवं प्राच्याध्ययनवि.वि., नलवारी(असम)
आचार्यः गंगाधरपण्डा, कुलपतिः, जगन्नाथसंस्कृतविश्वविद्यालयः, पुरी (उडीसा)
उभयवेदान्तश्रीवी.एस.करुणाकराचार्यः, आस्थानविद्वान्, श्रीमदाण्डवनाश्रमः, चेन्नई (तमिलनाडु)
आचार्यः एस.रंगनाथः, निदेशकः, आर.वी.इन्स्टीट्यूटआफसंस्कृतस्टडीज, बैंगलुरुः (कर्णाटक)
आचार्यः हर्षदेवमाधवः, एच.के.आर्टसकालेज, अहमदाबाद (गुजरात)
पण्डितवसन्तगाडगीलः, भारतीयसंस्कृतपत्रकारसंघस्य संरक्षकः। सम्पादकः, शारदा, पुणे (महाराष्ट्र)
आचार्यः एम.सी.दिलीपकुमारः, कुलपतिः, श्रीशंकराचार्यसंस्कृतवि.वि., कालडी, केरल
आचार्यः पी.टी.जी.वी.रंगाचार्युलुः, स्वर्णघण्टाकङ्कणालङ्कृतास्थानविद्वान्, हैदराबाद (तेलंगाना)
आचार्यः पी.सी.मुरलीमाधवन्, आचार्यः, संस्कृतविभागः, रासं.सं., गुरुवायूर्पपरिसरः (केरल)
आचार्यः नारायणदाशः, संस्कृतविभागाध्यक्षः, रामकृष्णणमिशनकालेज,कोलकाता (पं.बंगाल)
आचार्यः देवर्षिकलानाथशास्त्री, सम्पादकः, भारती, जयपुरम् (राजस्थानम्)
आचार्यः जनार्दनप्रसादपाण्डेयः 'मणिः', आचार्यः, रा.सं.सं., गंगानाझापरिसरः,इलाहाबादः(उप्र.)
आचार्यः मञ्जुलता शर्मा, अध्यक्षा, संस्कृतविभागः, सेन्टजोन्सकालेज, आगरा (उत्तरप्रदेश)
आचार्यः शीतांशुरथः, आचार्यः, संस्कृतविभागः,सिं.प्रा.वि.शोधसंस्थान,वि.वि.वि.,उज्जैन (मप्र.)

आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितिः

शुभाभिनन्दनग्रन्थसमर्पणमण्डलम्

अध्यक्षः

आचार्यगणेशदत्तशर्मा

उपाध्यक्षः, दिल्लीसंस्कृताकादमी, नवदेहली

सदस्याः

प्रो.रमेशचन्द्रभारद्वाजः

संस्कृतविभागाध्यक्षः, दिल्लीविश्वविद्यालयः, नवदेहली

प्रो.सी.उपेन्द्ररावः

निदेशकः, विशिष्टसंस्कृताध्ययनकेन्द्रम्, जे.एन.यू., नवदेहली

श्रीगोविन्दाचार्यः

अध्यक्षः, श्रीनिवाससंस्कृतविद्यापीठम्, नवदेहली

आचार्यविनोदचन्द्रपाण्डेयः

प्राचार्यः, शारदादेवीसंस्कृतविद्यापीठम्, नवदेहली

प्रो.ललितकुमारगौडः

अध्यक्षः, संस्कृत–पालि–प्राकृतविभागः, कुरुक्षेत्रविश्वविद्यालयः, हरियाणा

डॉ.जयकुमार–उपाध्ये

अध्यक्षः, प्राकृतविभागः, ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली

डॉ.जीतरामभट्टः

सचिवः, दिल्लीसंस्कृताकादमी, नवदेहली

डॉ.बलदेवानन्दसागरः

महासचिवः, भारतीयसंस्कृतपत्रकारसंघः, नवदेहली

आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितिः

स्वागतमण्डलम्

अध्यक्षः

आचार्यरवीन्द्रनागरः, राष्ट्रपतिसम्मानितः, प्रधानाचार्यः, श्रीशं.सं.म.वि., भा.वि.भ., नवदेहली

सदस्याः

प्रो.भास्करमिश्रः, आचार्यः, ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली
प्रो.राधाकान्तठाकुरः, आचार्यः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रपदेशः
डॉ.शशितिवारी, राष्ट्रपतिसम्मानिता संस्कृतविदुषी, सचिवः (वेव्स) नवदेहली
मनोजकुमारशर्मा, अधिवक्ता, दिल्लीउच्चन्यायालयः, नवदेहली
डॉ.चन्द्रभूषणझाः, आचार्यः, सेन्टस्टीफेन्समहाविद्यालयः, नवदेहली
श्रीदिनेशचन्द्रचतुर्वेदी, महासचिवः, छात्रबन्धुः, नवदेहली
डॉ.राकेशरविः, प्राचार्यः, श्रीचित्रगुप्तस्नातकोत्तरमहाविद्यालयः, मैनपुरी, उत्तरप्रदेश
डॉ.अजयकुमारमिश्रः, सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
डॉ.गोकुलेन्द्रनारायणदेवगोस्वामी, के.के.एच.शा.सं.म.वि., गुवाहाटी, असम
डॉ.शैलकुमारीतिवारी, पी.डी.एफ,यूजीसी,संस्कृतविभागः,वर्कर्सम.वि., जमशेदपुर, झारखण्ड
डॉ.सुरचना त्रिवेदी, सहायकाचार्या, भगवानदीनस्नातकोत्तरम.वि.,लखीमपुरखीरी, उ.प्र.
डॉ.सुकेशशर्मा, सहाचार्या, लाजपातरायस्नातकोत्तरमहाविद्यालय, साहिबाबाद, उत्तरप्रदेशः
योगेशशर्मा, सहायकाचार्यः, संस्कृतविभागः, पी.जी.डी.ए.वी.कालेज, नवदेहली
डॉ.चन्द्रप्रकाशउप्रेती, सं.प्रवक्ता, रा.इं.का., गंगानगर, मोतियापाथर, अल्मोड़ा,उत्तराखण्ड
डॉ.दुर्गाप्रसादसिंहः, अध्यापकः, से.मुकुन्दलालइण्टरकालेज, गाजियाबाद, उत्तरप्रदेश
प्रवेन्द्रशर्मा, ठाकुरश्रीजुगलकिशोरजीकामन्दिर, दतिया, मध्यप्रदेश।
ज्योत्स्ना, भारतसर्वकारे हिन्दीभाषानुवादिका, नई दिल्ली।

आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितिः

सम्पादक-मण्डलम्

प्रधानसम्पादकः

आचार्य-इच्छारामद्विवेदः, 'प्रणवः'

एम.ए.(संस्कृतम्), पुराणेतिहासाचार्यः, विद्यावारिधिः, आचार्योऽध्यक्षश्च
पुराणेतिहासविभागः, ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली
अध्यक्षः, देववाणी-परिषद्, दिल्ली
संयोजकः, आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितिः

सम्पादकः

डॉ. ऋषिराजपाठकः

एम.ए.(संस्कृतम्), पीएच.डी., संगीतशिरोमणिः
सहसचिवः, देववाणीपरिषद्, नवदेहली

सहसम्पादकौ

जीवनशर्मा

एम.ए.(संस्कृतम्), दर्शनाचार्यः
सम्पादकः - संस्कृतवाणी, कार्यकारीसम्पादकः - संस्कृतरत्नाकरः

सोमेशकाश्यपः

छात्रः, बी.ए.आनर्स (संस्कृतम्) देहलीविश्वविद्यालयः

प्राविधिकसहयोगः - चिरागरतड़ा

बी.टेक. (इन्जीयनियरिंगछात्रः)

अक्षरसंयोजकः - रामचन्द्ररेग्मी

छात्रः, श्रीनिवाससंस्कृतविद्यापीठम्, नवदेहली

प्रबन्धसम्पादकः

डॉ.चन्द्रमौलिशुक्लः

बी.ए.एम.एस., एम.ए. (संस्कृतम्), पीएच.डी.

सम्पादकीयम्

संस्कृतजगत् पद्मश्रीविभूषितेन राष्ट्रपतिसम्मानप्रमाणपत्रसभाजितेन संस्कृतकविना सम्पादकेन नैकग्रन्थकर्त्रा च **आचार्यश्रीरमाकान्तशुक्लेन** परिचितमस्तीत्यत्र शपथेन विभावयितुं किमपि नावशिष्यते।

आचार्यशुक्लस्य पञ्चसप्ततिवर्षसम्पूर्तौ **आचार्यश्रीरमाकान्तशुक्ल-हीरकजयन्तीशुभाभिनन्दनग्रन्थसमित्या श्रीहीरकप्राभृतम्** इत्याख्यो ग्रन्थः २४.१२.२०१५तमे दिनाङ्के डॉ.शुक्लाय समर्पयितुं निर्णयोऽकारि। ग्रन्थेऽस्मिन् प्रकाशयितुम् अधोदत्ताः विषयाः निर्धारिताः आसन्- १. आशीर्वादाः, शुभकामनाः सन्देशाश्च, २. श्रीशुक्लस्य परिचयः, साक्षात्कारः, तथा च तद्विषये गद्यपद्यात्मकाः विचाराः, ३. श्रीशुक्लस्य मौलिकसंस्कृतरचनानां काव्यानुवादानाञ्च परिचयः समीक्षा च, ४. श्रीशुक्लस्य संस्कृतरचनानां विद्वद्भिः कविभिश्च कृताः भाषान्तरानुवादाः, ५. श्रीशुक्लस्य समसामयिकानां संस्कृतकवीनां तेषां रचनानाञ्च परिचयः, ६. श्रीशुक्लस्य चित्राणां सपरिचयसङ्कलनम् तथा च ७. ग्रन्थे आलेखदातॄणां परिचयः।

विद्वांसः श्रीशुक्लस्य परिचिताश्च स्वकीयम् आशीर्वादं शुभाशंसनं, सन्देशम्, आलेखं, रचनाश्च स्वकीयेन परिचयेन अथ च चित्रेण साकं प्रेषयितुं प्रार्थिताः आसन्। हिन्दी-संस्कृत-अंग्रेजीमाध्यमैः लिखिता सामग्री आमन्त्रिता आसीत्। विद्वद्भिः वैदिकवाङ्मयं लौकिकसाहित्यम् अर्वाचीनं समकालिकं वा संस्कृत-साहित्यमवलम्ब्य लेखाः प्रेषिताः। श्रीशुक्लसम्बन्धीनि संस्मरणान्यपि कैश्चिज्जनैः प्रहितानि। ग्रन्थप्रकाशनकाले अस्याः सामग्र्याः संकलनं त्रिषु पुटबन्धेषु(जिल्द) क्रियते।

प्रथमे खण्डे १. आशीर्वादाः शुभकामनाः, २. श्रीशुक्लस्य परिचयः साक्षात्कारश्च, ३. तमवलम्ब्य विद्वद्भिः कविभिश्च प्रणीताः गद्यपद्यात्मकाः लेखाः रचनाश्च, ४. श्रीशुक्लस्य रचनानां विद्वद्भिः कविभिश्च भाषान्तरेषु कृताः काव्यानुवादाः, ५. श्रीशुक्लस्य समकालीनानां संस्कृतरचनाकाराणां परिचयः, ६. ग्रन्थे सहयोगकर्तॄणां परिचयः, ७. चित्रावली च।

द्वितीये खण्डे श्रीशुक्लस्य रचनानां हिन्दीमाध्यमेन कृतं शोधकार्यम्। अस्मिन् खण्डे डॉ.दुर्गाप्रसादसिंहेन पीएच.डी.शोधोपाध्यर्थं प्रस्तुतं ग्रन्थं पुस्तकाकारेण सम्पाद्य वयमत्र प्रस्तुमः। एतच्छोधकार्यं २००८तमे खैष्टेऽब्दे सञ्जातम्। अत्र तदापर्यन्तं कृतानां श्रीशुक्लस्य रचनानां चर्चा विहिता अस्ति। परिचयोऽपि तत्कालपर्यन्तमेवावधिं व्याप्नोति। अतः सम्पादकैः तत्र तथ्यपरिवर्तनं न कृतम्।

श्रीहीरकप्राभृतम्

तृतीयखण्डे श्रीशुक्लस्य २००८तमादूर्ध्वं प्रणीतानां किञ्च सर्वशुक्लोत्तरा-काव्यसंग्रहे संकलितानां रचनानां संस्कृतमाध्यमेन समीक्षा प्रस्तूयते। एतच्छोधकार्यं २०१४तमे ईसवीयाब्दे विद्यावारिधये श्रीमता चन्द्रप्रकाशउप्रेतीमहाभागेन प्रस्तुतम्। अस्य 'सर्वशुक्लोत्तरासमीक्षणम्' इत्येतच्छीर्षकेण ग्रन्थाकारं प्रकाशनं क्रियते।

श्रीशुक्लमवलम्ब्य दशाधिकविश्वविद्यालयेभ्यः शोधकर्तृभिः पीएच.डी. शोधोपाधिर्लब्धः। अत्र प्रकाशितयोः द्वयोः ग्रन्थयोः आरम्भतः २०१२पर्यन्तं प्रणीतानां शुक्लरचनानां संक्षिप्तः परिचयः समीक्षा च द्रष्टुं शक्येते। अतः परं श्रीशुक्लस्य 'आशाद्विशती' 'मम जननी' चेति कवितासंकलनद्वयं प्रकाशितम्। तत्र संकलितानां कासाञ्चन रचनानां विषये परिचयात्मिका अनुवादात्मिका वा सामग्री प्रथमे खण्डे लब्धुं शक्यते।

श्रीशुक्लस्य पञ्चाशद्वर्षपूर्तौ 'अभिराज'राजेन्द्रमिश्रवर्याणां प्रधानसम्पादकत्वे 'देववाणीसुवासः' इत्येतन्नामा पञ्चप्रसरात्मकः खण्डद्वयात्मकश्च अभिनन्दनग्रन्थः प्रकाशितोऽभूत्। तत्र अर्वाचीनसंस्कृतसाहित्यमवलम्ब्य पुष्कला सामग्री प्रकाशिताभूत्। श्रीहीरकप्राभृते श्रीशुक्लस्य व्यक्तित्वमवलम्ब्य विशिष्टसामग्री प्रस्तूयते।

कृतेऽपि प्रयत्ने भाषागतानां लिपिगतानां भावगतानां वा त्रुटीनाम् अत्यन्ताभावो न साक्षात्क्रियते चेत् तदर्थं सम्पादकमण्डलसदस्याः क्षन्तव्याः स्म सुधीभिः कृपालुभिश्च पाठकैः। श्रीहीरकप्राभृतं श्रीशुक्लस्य भवताञ्च करकमलेषु समपर्यन्ती आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितिः प्रमोदमनुभवति।

ग्रन्थस्य संरक्षकमण्डलस्य परामर्शदातृमण्डलस्य ग्रन्थसमर्पणसमारोह-मण्डलस्य स्वागतमण्डलस्य सम्पादकमण्डलस्य च सदस्याः, लेखदातारः अथ च ग्रन्थप्रकाशनकर्त्री देववाणी-परिषद् नूनं धन्यवादार्हास्सन्ति।

विदुषां वशंवदः

२४ दिसम्बर, २०१५

(इच्छारामद्विवेदी, 'प्रणवः')

प्रधानसम्पादकः,

आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थसमितेः संयोजकश्च

'देववाणी-परिषद्, दिल्ली' ग्रन्थाङ्कः - १२९
(श्रीहीरकप्राभृतम् - तृतीयखण्डः)

'सर्वशुक्लोत्तरा'-समीक्षणम्

(श्रीरमाकान्तशुक्लप्रणीतस्य 'सर्वशुक्लोत्तरा' कवितासङ्ग्रहस्य समीक्षात्मकमध्ययनम्)

लेखकः
डॉ.चन्द्रप्रकाश उप्रेती



देववाणी-परिषद् , दिल्ली
आर ६, वाणी-विहारः,
नयी दिल्ली-११००५९ (भारतम्)

'सर्वशुक्लोत्तरा'-समीक्षणम्

लेखकः : डॉ. चन्द्रप्रकाश उप्रेती

प्रकाशकः : देववाणी-परिषद्, दिल्ली
आर-६, वाणी विहारः, नई दिल्ली-११००५९
०११-२८५६१८४६, ०९५६०५३२३९२
devavanipd@gmail.com

मुद्रकः : मयूर एण्टरप्राइज़ेज़,
डब्ल्यू ज़ेड-३, तिहाड़ गाँव,
नई दिल्ली-११००१८

संस्करणम् : प्रथमम्, २०१५ ई०

मूल्यम् : षट्शतं रूप्यकाणि (रु० ६००.००)



ISBN - 978-81-85924-25-0

SARVAŚUKLOTTARĀ - SAMĪKṢAṆAM

Author : Upreti, Chandra Prakash

Publisher : Devavani Parishad, Delhi
R-6, Vani Vihar, New Delhi-110059
(India). Phone : 011-28561846

Printer : Mayur Enterprises,
WZ-3, Tihar Village,
New Delhi-110018

Edition : First 2015

Price : Rupees Six Hundred only Rs.600.00

विषयसूची

श्रीहीरकप्राभृतम् - तृतीयखण्डः

प्राक्कथनम्

पुरा पुराणं शुचिसारभूतं सर्वस्वमासीत् निजभारतेऽस्मिन्।
नवे नवीनमनुवर्तमाने साहित्यमस्ति प्रचुरं पुनश्च।।

सांस्कृतिकदृष्ट्या संस्कृतभाषा अनर्घा प्रेष्टा च, भारतस्य तु भाषैषा सांस्कृतिकनिधिः। निखिलमपिसंस्कृताङ्मयं संस्कृतमाश्रित्यैवावतिष्ठते, तुलनात्मकसंस्कृतविचारे संस्कृतभाषैव साहाय्यमाचरति। संस्कृत-भाषाश्रयैवसंस्कृतिः सुदूरपूर्ववर्तिषु ब्रह्म-देश-श्याम-यव-सुमात्रादिषु द्वीपेषु प्रचचार, अमेरिका-यूरोपदेशस्थ संस्कृतिष्वपि एतस्या अक्षयः प्रभावः परिलक्ष्यते। धर्मार्थकाममोक्षात्मककुरुषार्थचतुष्टयस्य साधनं संस्कृतवाङ्मयमेवास्ति।

संस्कृतसाहित्यधारा सर्वेष्वपि युगेषु अप्रतिहतगतिका प्रवहन्ती प्रावर्ततेत्याश्चर्यम्। सा संस्कृतधारा आबहोः कालात् स्वीयं विशालमुच्चकोटिकं साहित्यं स्वीकृत्य अधुनाऽपि अजस्रा विद्यते। आधुनिकसंस्कृतसाहित्ये कतिपयाः नवा अपि विद्याः प्रवर्तिताः

पुराकवीनामथलेखकानां क्रमेणसाहित्यमभून्नवीनं।
मनीषिणामद्यबहुक्रमेण सुरक्षितं तिष्ठति तत्पुराणम्।।

आधुनिकसंस्कृतसाहित्यस्यापथप्रदर्शकेषु भट्टमथुरानाथशास्त्रि-डॉ. वैंकटराघवन- अप्पाशास्त्रिराशिवडेकरसदृशाः प्रमुखास्सन्ति एभिर्रचनाकारैः स्वीयं बहुमूल्यं योगदानं प्रदाय आधुनिकसंस्कृतसाहित्यस्य सेवा समाचारिता। आधुनिकाः संस्कृतज्ञाः विशेषेण गुणग्रहीतारः उदारचेतस इत्यत्र नास्ति सन्देहः। आधुनिकसंस्कृतसाहित्यस्य विकासायध असङ्ख्याः कवयः स्वीयं महत्त्वपूर्णं योगदानं प्रदत्तवन्तः, तेष्वन्यतमः वर्तते आचार्य रमाकान्तशुक्लः। 'पद्मश्री' इत्युपाधिना विभूषितेन आचार्येण स्वीयरचनाभिः भारतराष्ट्रस्य समर्चना व्यद्यायि।

श्री रमाकान्तशुक्लेन संस्कृतसाहित्यस्य सेवा कविरूपेण, नाटककाररूपेण, अनुवादकरूपेण सम्पादकरूपेण च कृताऽस्ति, श्री शुक्लेन प्रणीतं 'भाति मे भारतम्' इत्येतत् काव्यमत्यन्तं प्रसिद्धं वर्तते। अस्य काव्यस्य

विषये - आधुनिकसंस्कृतसाहित्यसन्दर्भसूच्याम् आंग्लभाषाविरचितायां भूमिकायाम् आचार्यराधावल्लभञ्जत्रिपाठिना उक्तम् ''यदेतेन काव्येन इतिहासो निर्मितः' (His Fame rests on his Poem Bhati me Bharatam (1980) Compased in Sragvini meter this pem on Indian nations has created a history.) इदं काव्यमवलम्ब्य काशी हिन्दूविश्वविद्यालये पी-एच.डी. शोधकार्यं सञ्जातम् श्री शुक्लेन 'भारतजनताहम्' इत्येतत् शीर्षकं कवितासङ्कलनमपि प्रणीतं यस्य प्रकाशनं २००१ तमे ख्रैष्टाब्दे सञ्जातम्, यस्मै च उत्तरप्रदेशसंस्कृतसंस्थानेन कालिदाससम्मानः प्रदत्तः। २००३ तमे ख्रैष्टाब्दे तस्य 'सर्वशुक्ला' इत्येतत् शीर्षकः कवितासङ्ग्रहः प्रकाशितोऽभूत् यमपलम्ब्य उत्तरगुजरातविश्वविद्यालयतः प्रो. हर्षदेवमाधवस्य निर्देशने पी-एच.डी. शोधकार्यमभवत्। २००८ ख्रैष्टाब्दे 'सर्वशुक्लोत्तरेति' कवितासङ्कनस्य प्रकाशनं जातम्, इदं काव्यसङ्ग्रहमधिकृत्य अद्यावधि कुत्राऽपि संस्कृतमाध्यमेन शोधकार्यं न जातम्। अस्यै कवितासङ्कलनाय २०११ तमवर्षीयः भारतीयविद्याभवनस्य कौस्तुभपुरस्कारः प्रादीयत। अस्मिन् सङ्कलने सङ्कलितासु अष्टषष्टिरचनासु सामयिक युगबोधः विशेषतः अभिव्यज्यते। अत्र काश्चन रचनाः भक्तिपरकाः काश्चन विविधस्थानवैशिष्ट्यपरकाः, काश्चनराष्ट्रियभावनापरकाः, काश्चन प्रकृतिचित्रणपरकाः, काश्चन यात्रावृत्तान्तपरका, काश्चन व्यङ्ग्यपरकाः, काश्चन सत्पुरुषवर्णनपरकाः, काश्चन पर्वसम्बन्धिन्यः, काश्चन चिन्तनजीवनपरकाः, काश्चन शुभकामनापरकाश्च विद्यन्ते।

आधुनिकसाहित्ये समीक्षाग्रन्थानामभो विद्यते, शोधकर्मव्यापारेण तदभावं दूरयितुं प्रयतयिष्येत अस्माभिः। डॉ. राधावल्लभत्रिपाठिना उक्तम् ''आधुनिके काले लिखितासु रचनासु काचिदीदृशी सर्वाङ्गपूर्णा समीक्षाकृतिः न दृष्टिपथमागता, यया समग्रतया साहित्यस्याकलनं कृतं स्यात्, साहित्यिक उत्कर्ष एव प्रकृष्टां समीक्षामुत्पादयति। एवं समुचितायाः समीक्षाया अभावः आधुनिकस्य साहित्यस्य कृते चिन्तनीया स्थितिः''। आधुनिक साहित्यसमीक्षणाय उपादेयो भविष्यति शोधप्रबन्धमेतत्, इति कृत्वा आधुनिकग्रन्थसमीक्षणाय मे मति प्रसृता किञ्च कविवरशुक्लस्य रचनानां संवेदनायाः शैल्याश्चाध्ययनेन

कवेः रचनासंसारेण संस्कृतपाठकानां परिचयो भविष्यतीति कृत्त्वा अयं जनः "रमाकान्तशुक्लप्रणीतस्य 'सर्वशुक्लोत्तरा' कवितासङ्ग्रहस्य समीक्षात्मक-मध्ययनम्" इति विषयमवलम्व्य राष्ट्रियसंस्कृतसंस्थानस्यमुख्यालयपरिसरात् शोधकार्यं सम्पादयति।

शोधप्रबन्धेऽस्मिन् पञ्च अध्यायास्सन्ति प्रथमेऽध्याये कवेः परिचयः प्रदत्तः। कविवरस्य शिक्षा-दीक्षा-व्यक्तित्त्वम्-सम्मान-कृतयश्च प्रदर्शिताः। द्वितीये तावत् सर्वशुक्लोत्तरायाः परिचयः तस्या आधुनिक संस्कृतसाहित्ये स्थानमपि स्वविवेकपुरस्सरं प्रदर्शितम्। अस्मिन् प्रसङ्गे गवेषकः आधुनिकविध ानां मुल्लेखमपि करोति। तृतीयेध्याये सर्वशुक्लोत्तराकाव्यसङ्ग्रहे सङ्कलितानां रचनानां समीक्षणं विद्यते यद्यपि मया काव्यसमीक्षणे दत्तावधानतया समीक्षा कृता तथापि न्यूनतानामुपस्थितिस्तु मानवस्वभावः, चतुर्थे खण्डे कवेः अभिव्यक्तिकौशलं समीक्षितम्। तत्र - ध्वन्यलङ्कारछन्दगुणरीनीनां चर्चा व्यधायि। शोधप्रबन्धस्य अन्तिमे अध्याये कवेः युगबोधः तत्काव्येषु च सूक्तिविधानम् प्रदर्शितम्।

प्रबन्धस्यास्य अन्ते उपसंहारः, परिशिष्टे च सर्वशुक्लोत्तरागतानां पद्यानामकारादि क्रमसूची निरुपिताऽस्ति। शोधप्रबन्धे प्रयुक्तानां पुस्तकानां सन्दर्भसूची चापि अन्ते प्रदत्ताऽस्ति।

शोधप्रबन्धस्यास्योपादेयता

यदाहं आचार्यकक्ष्यायामधीयानः आसं तदानीं कश्चन कविसमवाये विविधानामाधुनिक काव्यविधानां पाठः श्रुतः तदारभ्य काव्यस्य नूतनविध ानामध्ययने मे रुचिः जागृता। रुचेः सिद्धान्तमभिलक्ष्य आधुनिकसंस्कृतसाहित्ये एव शोधकर्मणः विचारेऽपि समागतः। आधुनिकसंस्कृतसाहित्यस्य अध्ययनक्रमे आचार्यरमाकान्तशुक्लस्य सद्यः सङ्गृहीतः काव्यसङ्ग्रहः दृष्टिपथमागतः यस्मिन् विविधाः काव्यविधाः अन्तर्भूतास्सन्ति, अतः सर्वशुक्लोत्तराकाव्यसङ्ग्रहः अनुसन्धानाय गृहीतः। अनेन - "श्रीरमाकान्तशुक्लविरचितस्य 'सर्वशुक्लोत्तरा' कवितासङ्ग्रहस्य समीक्षात्मकमध्ययनम्" शोधप्रबन्धेन आधुनिकसंस्कृतसाहित्ये समीक्षाग्रन्थानां यः अभावः परिलक्ष्यते तस्य पूत्यर्थ समीक्षणम्प्रति च रुच्युत्पादनाय प्रयतयिष्यते। अद्य संस्कृतसाहित्ये विविधाः रचना, विविधानि

काव्यानि च लिख्यन्ते परं तेषां समीक्षणं समालोचनं वा तदननुगुणं नं भवति, अतः तन्न्यूनतां पूरयितुभयं लघीयान् प्रयासः। ततश्च विषयेऽस्मिन् महतीं रुचिमावहतां मान्यानां श्रीमतां डॉ. जयप्रकाशनारायणमहोदयानां मार्गनिर्देशने शोधकार्य समारब्धम्।

'आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्'। (शाकु. १-२) इति कालिदासोक्तिमनुसृत्य विद्वत्परितोष एव मे परितोषः। अत्रस्थितं दोषजातं दूरीकृत्य स्याच्चेद् गुणलेशः तदनुमोदनेन अनुग्राह्योऽयं जनः इति सहृदयान् पण्डितप्रकाण्डान् अभ्यर्थये।

मूर्खेऽपि बोधयति शिक्षक आत्मशिष्यं
दोषेऽपि लालयति पुत्रमथात्र तातः।
मोदाय बालपतनं चलनाद्धि पूर्वं
शिष्टास्तथेदमवगम्य विभूषयेयुः॥

२४ जुलाई, २०१४

भावत्कः
चन्द्रप्रकाशः उप्रेती

प्रथमोऽध्यायः

कविवररमाकान्तशुक्लस्य व्यक्तित्वं कर्तृत्वञ्च

१.१ परिचयः

वंशपरिचयः – **'स जातो येन जातेन याति वंशः समुन्नतिम्[१]'** अस्माकं भारतीयसमाजे वंशस्यातीव महत्त्वपूर्णं स्थानं वर्तते। वंशावली मानवस्य गौरवपूर्णं इतिहासोऽस्ति। इतिहासस्य प्रगतौ आहुतिप्रदानमेव सामाजिक-व्यक्तित्वस्योत्तरदायित्वमस्ति। सामाजिकपरम्परां सुदृढतया स्वचारित्रिकबलेन विकासयितुं श्रीशुक्लपरिवारस्य विशिष्टं स्थानमस्ति। वंशः प्रकारद्वयेन गतिमवाप्नोति जन्मना शिष्यपरम्परया च। **(वंशो द्विधा विद्यया जन्मना च)** द्वितीया परम्परा अत्र मुख्यभूता वर्तते। शुक्लवंशः उभाभ्यामपि समृद्धो वर्तते। वंशस्यास्य विषये डॉ. चन्दनलालपाराशरः (पीयूषः) लिखति–

पवित्रं कुलं यस्य सर्वत्र लोके, प्रधानं धनं संस्कृतं यत्र पुण्यम्।
व्रतं केवलं संस्कृतं राष्ट्रभाषा, भवेदेतदर्थं महानस्य यत्नः[२]॥

जन्मवंशः – उत्तरप्रदेशप्रान्तस्य मुजफ्फरनगरजनपदान्तर्गत चरथा-वलग्रामवास्तव्यः वशिष्ठ–गोत्रोत्पन्नः गौडब्राह्मणः, पं. बद्रीदत्तशुक्लः कविवर-रमाकान्तशुक्लस्य प्रपितामहः श्रीमती गणेशो देवी च प्रपितामही आस्ताम्। शुक्लवर्यस्य पितामहः माईदयालशुक्लः पितामही तुलसादेवी चास्ताम्। साहित्यसंगीतकलामर्मज्ञः पण्डितप्रवरः आचार्यश्रीब्रह्मानन्दशुक्लः भवतः जनकः श्रीमती प्रियम्वदाशुक्ला च जननी आसीत्। गोविन्दरामशर्मा मातामहः, श्रीमती इन्द्रावतीशर्मा मातामही चास्ताम्। पितृव्यः मित्रसेनशुक्लः, पितृव्यपत्नी श्रीमती चमेलीदेवीशुक्ला, मातुलः पं. गङ्गाधरशर्मा, मातुलानी श्रीमती शान्तिदेवीशर्मा, श्वसुरः श्रीमान् राजारामशर्मा, श्वसुरपत्नी कमलाशर्मा चासन्।

जन्म –रमाकान्तशुक्लस्य जन्म विक्रमाब्दे- १९९७ तमे पौष-कृष्णपक्षदशम्यां भौमवासरे (२४ दिसम्बर १९४० ई. वर्षे), उत्तरप्रदेशस्य खुर्जा नगरे अभवत्। कविवरस्य पितरौ स्व. श्री ब्रह्मानन्दशुक्लः श्रीमती प्रियम्वदा च आस्ताम्। ययोः सुसंरक्षकत्वे बाल्यावस्थायामेव कविवरः संस्कृतस्य राष्ट्रियचेतनायाश्च संस्कारेण समन्वितो जातः। कविवरस्य जनकः संस्कृतसाहित्यस्य अद्वितीयो विद्वान् आसीत्, येन न केवलं संस्कृतकाव्यग्रन्थानां प्रणयनं कृतमपितु स्वसन्ततिभ्योऽपि संस्कृतशिक्षा प्रदत्ता। कविवरः भ्रातृषु मध्यमो वर्तते, अस्मिन् शैशवावस्थयाम् एव कविप्रतिभायाः अङ्कुरणं जातम्। षोडशे वर्षे एव भवता संस्कृतश्लोकाः रचिताः। भवतः अग्रजौ स्व. डॉ. कृष्णकान्त-उमाकान्तशुक्लौ संस्कृतकविरूपेण ख्यातौ, अनुजः डॉ. विष्णुकान्तशुक्लोऽपि संस्कृतलेखने रतोऽस्ति। भवतः विषये डॉ. अभिराज-राजेन्द्रमिश्रमहोदयः लिखति- **"डॉ. शुक्ल नाम्ना तो रमाकान्त हैं ही, दाम्पत्य जीवन में भी 'रमा' के ही कान्त हैं। वे गान्धिचरितम् तथा नेहरूचरितम् जैसे संस्कृत महाकाव्यों के यशस्वी रचनाकार गोलोकवासी आचार्य श्री पं. ब्रह्मानन्द शुक्ल जी एवं श्रीमती प्रियम्वदा शुक्ल के तृतीय पुत्र, डॉ. कृष्णकान्तशुक्ल एवं डॉ. उमाकान्त शुक्ल के अनुज तथा डॉ. विष्णुकान्त शुक्ल एवं श्रीलक्ष्मीकान्तशुक्ल के अग्रज हैं, उन पर चन्द्रमौलि की कृपा है, अभिनव तथा आनन्दवर्धन का अनुराग है।[३]"**

१.२ शिक्षा-दीक्षा

मुख्यतः विद्यावंश एव मानवजीवने स्वास्तित्वं स्थापयति। विद्यावंशे गुरोः स्थानं सर्वोपरि भवति। गुरुशब्दस्याभिप्रायस्तावत्–

'गु'शब्दस्त्वन्धकारे स्यात्, 'रु'शब्दस्तन्निरोधकः।
अन्धकारनिरोधत्वात् तस्माद्गुरुरुच्यते॥[४]

अज्ञानरूपस्य तमसः विनाशको भवति सद्गुरुः। गुरुरलौकिक-शक्तिसम्पन्नो भवति। गुरुः सुप्तेषु जागृतः, नेत्रहीनेषु सनेत्रो भवति, एका तादृशी सत्ता यत्र सर्वं विनष्टम् केवलं परमात्मतत्त्वमेव निःशेषम्। गुरुः शिष्ये

पुत्रादपि अधिकं स्निह्यति। यथा सूर्यः सर्वान् प्रकाशयति तथैव गुरुरपि –

सर्वेषामेव लोकानां यथा सूर्यः प्रकाशकः।
गुरुः प्रकाशकस्तद्वच्छिष्याणां बुद्धिदानतः[५]**॥**

अन्धकारात् प्रकाशम्प्रति अर्थात् अज्ञानात् ज्ञानम्प्रति नयनमेव गुरोः वास्तविकार्थः। गुरुकृपया सर्वं सम्भवम्।

अज्ञानतिमिरान्धाय ज्योतिर्दत्ते गुरोः कृपा।
तत्कर्तुमक्षमो भानुस्तस्माद् गुरुतरो गुरुः[६]**॥**

गुरोः अपरं नाम ईश्वरः, गुरुः ईश्वरात् पृथक् न कदापि भवति, गुरुरेव मानवजीवनस्याधारः। गुरुशिष्ययोः सन्मेलनं तदैव सम्भवति यदा गुरुशिष्ययोः अन्तश्चेतना मिलति। समर्पणस्य, विसर्जनस्य, विलयस्यानुभूतिः प्राप्ता चेत् जीवने पूर्णता समायाति। गुरोः कथने शाश्वतप्राणानामनुभूतिः प्राप्यते। गुरुः कदाऽपि सत्पात्रं नैव त्यजति। तपसा पात्रता जायते पात्रत्वेन च अनुदानं प्राप्यते। शिष्यत्वे सति गुरुः स्वयमेव शिष्यम् अन्वेषयति। नागते सति शिष्यमेव स्वसकाशमाह्वयति गुरुः। रामकृष्णपरमहंस- विवेकानन्दयोः सम्मेलनमपि एवमेव जातमासीत्। चाणक्यः चन्द्रगुप्तं तद्गृहं गत्वैव शिष्यत्वेन अङ्गीकरोति। अस्यामेव परम्परायां गुरुं रमाकान्तसदृशः शिष्यः पुत्रत्वेन, शिष्यं च ब्रह्मस्वरूपो गुरुः ''ब्रह्मानन्द शुक्लः'' पितृत्वेन मिलितश्चेत् उभावपि वंशौ (विद्या+जन्म) वटवृक्ष इव नूनमेव पल्लवितौ, पुष्पितौ फलितौ च जायेते। कविवरशुक्लस्य वंशपरम्परामधिकृत्य यथा लिखति डॉ. वाचस्पतिः उपाध्यायमहोदयः **''डॉ. शुक्ल जी का विद्यावंश और जन्मवंश दोनों ही प्रशस्त हैं। ऐसा सौभाग्य बहुत कम लोगों को मिलता है। वस्तुतः पुण्यकर्मों का फल ही विद्या एव जन्म की अनवद्य धारा से व्यक्ति को जोड़ता है। अनुजकल्प**[७] **डॉ. शुक्ल संस्कृत और संस्कृति दोनों के प्रति समर्पित हैं।''**[८]

शिक्षकः – पिता – स्व. ब्रह्मानन्दशुक्लः अक्षरारम्भकर्त्ता यज्ञोपवीत-मन्त्रदश्च।

अन्ये शिक्षकाः - प्रारम्भिकविद्यालये- श्री हीरालालशर्मा, श्री मुहम्मद अली, श्री मलखानसिंहः, श्री इतवारी लालः।

श्रीराधाकृष्णसंस्कृतमहाविद्यालये खुर्जायाम्- विद्यावाचस्पतिः पं. परमानन्दशास्त्री, पं. कुबेरदत्तः शास्त्री, पं. ईश्वरदत्तशास्त्री, पं. श्रीदत्तशर्मा, पं. अच्युतानन्द झा, पं. शिवानन्द झा, मा. मुंशीलाल शर्मा, पं. शिवकुमारशर्मा।

एन. आर. ई. सी. महाविद्यालये- डॉ.अम्बादत्तपन्तः, डॉ. द्वारका-प्रसादसक्सेना, डॉ. सुधीर-कुमार-गुप्तः, डॉ. रमेशचन्द्रशास्त्री, आचार्यभीमसेन-कौशिकः, डॉ. शान्तिस्वरूपगुप्तः, श्रीगौरीशंकरवशिष्ठः, डॉ. रामबिहारीलाल-गोस्वामी, श्रीनरेन्द्रकुमारमित्तलः, श्रीसुरेन्द्रस्नातकः, श्रीनारायणप्रसादवाजपेयी, डॉ. अम्बाप्रसादसुमनः, श्रीसुरेशचन्द्रअग्रवालः, श्रीबिशनचन्द्रगुप्तः, श्रीमहेश-चन्द्रगौडः, श्रीशिवप्रसादशर्मा, श्रीगिरीशचन्द्रभारद्वाजः, श्रीके. सी. गोविलः, श्रीचन्द्रदत्तगोयलः, डॉ. सुरेशचन्द्रत्रिपाठी।

वार्ष्णेय महाविद्यालये- अलीगढनगरे- डॉ. रमेशचन्द्रशुक्लः।

शोधनिर्देशकः - डॉ. ओमप्रकाशदीक्षितमहोदयः, अध्यक्षः हिन्दीविभागः, जे. वी. जैनमहाविद्यालयः, सहारनपुरम्।

कविवरशुक्लस्य आरम्भिकशिक्षा खुर्जास्थित-प्राथमिक-विद्यालये (संख्या-१) सम्पन्ना। कविवरः १९४९ तमे ई. वर्षे चतुर्थकक्षायां प्रविष्टवान्, सद्यश्च भवतः प्रोन्नतिः पञ्चमकक्षायां जाता। १९५० तमे वर्षे भवता प्रारम्भिकी शिक्षा पूरिता। श्रीराधाकृष्णसंस्कृत महाविद्यालयात् १९५३ तमे वर्षे प्रथमा, १९५५ तमे वर्षे च पूर्वमध्यमा आङ्गलसहिता उत्तीर्णा। १९५७ तमे वर्षे भवता इण्टरमीडिएट उपाधिना सहैव उत्तरमध्यमा उपाधिरपि प्राप्तः। १९५९ तमे वर्षे साहित्यविषमवलम्व्य शास्त्रीतिपरीक्षायाम् उत्तीर्णता समवाप्ता। कविवरः १९५९ तमे वर्षे बी. ए. (हिन्दी-संस्कृत-अंग्रेजीसाहित्य- विषयेषु) परीक्षामपि उत्तीर्णवान्। आचार्यशुक्लमहोदयः १९६० ई. तमे वर्षे साहित्याचार्य प्रथमखण्डं-१९६१ तमे खैष्टाब्दे द्वितीयखण्डं-१९६२ तमे वर्षे साहित्याचार्य-तृतीयखण्डस्य परीक्षां प्रथमश्रेण्याम् उत्तीर्णवान्। खुर्जास्थे .एन.आर.ई.सी. महाविद्यालये स्नातकोत्तरस्तरे संस्कृतविषयो नासीत् अतः भवान् हिन्दीविषयम् अधिकृत्य एम.ए. कक्षायाम् एन.आर.ई.सी. महाविद्यालये प्रविष्टवान्, १९६१

तमे वर्षे आगराविश्वविद्यालये, सर्वाधिकान् अङ्कान् प्राप्य स्वर्णपदकं प्राप्तवान्।

१९६२ तमेशवीयवर्षात् रमाकान्तशुक्लेन अध्यापनं प्रारब्धम्। भवान् मुल्तानीमल-मोदीस्नातकोत्तरमहाविद्यालये मोदीनगरे हिन्दी-विभागे प्राध्यापक-रूपेण नियुक्तो जातः। नियुक्तेः पूर्वमेव भवता एम. ए. (संस्कृत) पूर्वार्द्ध कृतमासीत्। एकवर्षस्य अध्यापन-अनुभवानन्तरं व्यक्तिगतपरीक्षार्थिरूपेण आगराविश्वविद्यालयतः १९६४ तमे वर्षे एम. ए. संस्कृतस्य उत्तरार्द्ध-परीक्षायां प्रथमश्रेण्यां सफलता समवाप्ता। १९६३ तमे वर्षे हिन्दीविषयमवलम्ब्य विद्यावारिधये (पीएच.डी.) जे.वी. जैन-स्नातकोत्तर महाविद्यालये, सहारनपुरे भवान् आवेदनम् अकरोत्। १९६६ तमे वर्षे शोप्रबन्धोऽयम् ("जैनाचार्य रविषेणकृत पद्मपुराण एवं तुलसीकृत रामचरितमानस का तुलनात्मक अध्ययन") डॉ. ओमप्रकाशदीक्षितमहोदयस्य निर्देशने पीएच.डी. इत्युपाधये प्रस्तुतः। १३ सितम्बर-१९६७ तमे खैष्टाब्दे पीएच.डी. उपाधिरपि प्राप्तः। कविवरः पद्मपुराणस्य १८०२३ श्लोकानाम् अध्ययनं सम्पाद्य यद्दुरूहतरं कार्यम् अकरोत् तन्न केवलं संस्कृतविद्वत्समाजे अपितु हिन्दी-जैनादिषु विद्वत्स्वपि सम्मानपुरस्सरमवलोक्यते। रविषेणाचार्यमधिकृत्य हिन्दीसाहित्ये एतादृशं शोध कार्यं प्रप्रथमं मौलिकञ्च सञ्जातम्।

कर्मक्षेत्रम् - कविः अध्ययनसमकालमेव राधाकृष्णसंस्कृत-महाविद्यालयखुर्जायां सन् १९६० तमवर्षात् कक्षासु निःशुल्कमध्ययनं सम्पादयति स्म। १६ जुलाई १९६२ तमईसवीये वर्षे मुलतानीमलमोदीस्नातकोत्तर-महाविद्यालयमोदीनगरे हिन्दीविभागे नियुक्तो जातः। भाषाविज्ञान-पालि-प्राकृतसाहित्यादिकालीनकाव्यादिविषयेषु प्रवचनम् अकरोत्। तस्मिन् समये विभागाध्यक्षः डॉ. नारायणप्रसादवाजपेयी 'करुणेशः' आसीत्। भवतः वरिष्ठसहयोगी श्रीवेदप्रकाशगौतमः आसीत् यः कालानन्तरे देहलीविश्व-विद्यालयस्य-श्रीरामकॉमर्सकॉलेजे नियुक्तः। कनिष्ठसहाध्यापकः डॉ. हरदयालः, यः कालानन्तरे देहल्यां शाहदरा स्थितश्यामलालमहाविद्यालये प्राध्यापको नियुक्तः।

मुल्तानीमलमहाविद्यालये कविवरः-डॉ. गोपालदासतुलीमहोदयस्य, डॉ. केशवदास-जैनमहोदयस्य, डॉ. चन्द्रिकाप्रसादसिंहलमहोदयस्य च प्राचार्यत्वे

अध्यापनम् अकरोत्। २ अगस्त १९६७ तः २३ दिसेम्बर २००५ ईसवीवर्ष यावत् कविवरः दिल्ली-विश्वविद्यालयस्य राजधानीमहाविद्यालये प्राध्यापकः, वरिष्ठप्राध्यापकः, प्रवाचकरूपेण च अध्यापनं सम्पादितवान्। राजधानी-महाविद्यालये येषां प्राचार्याणां प्राचार्यत्वे भवान् अध्यापितवान्, ते तावत् संस्थापकप्राचार्यः- श्रीराजनारायणमाथुरः, श्रीओमप्रकाशडोगरा, डॉ. ओ.पी. वर्मा (कार्यवाहकः), डॉ. आर. एम. पाल (कार्यवाहकः), डॉ. बनारसी-लालकपूरः, डॉ. रामसुरेशपाण्डेयः (कार्यवाहकः), डॉ. बिशनसिंहयादवः, डॉ. अमृतलालखन्ना (कार्यवाहकः), डॉ. श्रीमतीविजयलक्ष्मीपण्डित-महोदयाश्चासन्।

हिन्दीविभागस्य सहयोगिनः - (स्व.)सुरेशचन्द्रगुप्तः (यः कालान्तरे दिल्लीविश्वविद्यालये हिन्दीविभागे आचार्यपदे नियुक्तः), (स्व.) डॉ. गोविन्दचातकः, डॉ. नित्यानन्दतिवारी, (यः कालान्तरे दिल्लीविश्वविद्यालये विभागाध्यक्षः, आचार्यश्च सञ्जातः) (स्व.) डॉ. देशराजसिंहभाटी, (स्व.) डॉ. गौतमसचदेवः, (स्व.) डॉ. सुधाकरशुक्लः, डॉ. रमाशङ्करश्रीवास्तवः, (स्व.) डॉ. श्यामबिहारीलालशर्मा, श्री सुधीरउपाध्यायः, (स्व.)डॉ. ओमप्रकाशशर्मा, डॉ. बिशनसिंहयादवः, डॉ. जगमोहनशर्मा, डॉ. वीरेन्द्रकुमारः, डॉ. मधुवर्मा, डॉ. अनीतागौडः, श्रीराकेशत्रिपाठी, श्रीमहेन्द्रसिंहादयश्चासन्।

डॉ. शुक्लवर्यः संस्कृतविभागीयप्राध्यापकैः डॉ. रामसुरेशपाण्डेय-श्री सुरेन्द्रनारायणत्रिपाठि-डॉ. ओमनाथविमलीवर्यैः सह साहित्यसम्बन्धि-परिचर्चा सम्पादयति स्म। कविवरः दिल्लीविश्वविद्यालये सहकार्यध्यापने हिन्दी-स्नातकोत्तरकक्षासु उत्तररामचरितम् पाठयति स्म, सहैव संस्कृतसाहित्येतिहासम्, अपभ्रंश-प्राकृतसाहित्येतिहास-शुकनासोपदेशादिविविध-संस्कृतविषयान् अपि पाठयति स्म। येन हिन्दीविषयेतरच्छात्राणामपि सम्मानभाग् जातः। महाविद्यालये श्रीरमाकान्तशुक्लः हिन्दीसाहित्यसभायाः, हिन्दीसाहित्यपरिषदः परामर्शदाता, महाविद्यालयस्य प्रमुखः अनुशासकः,देहलीविश्वविद्यालयपरीक्षाणामधीक्षकः, सांस्कृतिकसमितिसंयोजकः, प्रवेशसमितिसंयोजकः, अध्यापकसंघस्य सचिवः, क्रीडासमितेः सदस्यः इत्यादिषु प्रमुखपदेषु सफलतापूर्वकं कार्यमकरोत्। ३१ दिसेम्बर २००२ तमईसवीयवर्षं द्विषष्टिवर्षाणां सेवानिवृत्तेरनन्तरं कविः

१ जनवरी २००३ तमे वर्षे पुनः नियुक्तः, २३ दिसेम्बर २००५ खैष्टाब्दं यावत् कार्यं सम्पाद्य पूर्णावकाशमवाप्नोत्। वर्षत्रयाय डा.शुक्लो राष्ट्रियसंस्कृत-संस्थानमुख्यालये शास्त्रचूडामणिपण्डितरूपेण ग्रन्थसम्पादनं परियोजनाचालनं चाकरोत् (२०१०-२०१२)

अध्यापनेतर-शैक्षिकगतिविधयः - कविवरः अध्यापनकाले एव नैकशोधपत्राणां, आलेखानां मौलिकरचनानां च प्रणयनम् अकरोत्। एन. सी.ई.आर.टी.-एस.सी.ई.आर.टी-राष्ट्रियसंस्कृतसंस्थान-विश्वविद्यालय-अनुदानायोगादिसंस्थानां सहयोगेन देहलीविश्वविद्यालय-सागरविश्वविद्यालय-मेरठविश्वविद्यालय-आगराविश्वविद्यालय-कानपुरविश्वविद्यालय-उत्कल-विश्वविद्यालय-जीवाजीविश्वविद्यालय-गुरुकुलकाँगड़ीविश्वविद्यालय-कानपुरविश्वविद्यालय-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयैः आयोजितासु सङ्गोष्ठीषु सहभागितां सम्पादितवान्। कविना अकादमीषु विविधसंस्कृतप्रचारसंस्थासु च प्रायोजितासु सङ्गोष्ठीषु, कविगोष्ठीषु विद्वत्सभासु च काव्यपाठः सम्पादितः सहभागिता च कृता। एतदतिरिच्य अखिलभारतीयप्राच्यविद्यासम्मेलनस्य पुणेनगरस्थस्य, उज्जैन-जयपुर-अहमदाबाद-कुरुक्षेत्र-शान्तिनिकेतन-विशाखापत्तन-धारवाड-जादवपुर-कोलकाता-हरिद्वार-पुरीवाराणसीतिरुपतिप्रभृतिनगरेष्वायोजितेषु अधिवेशनेषु स्वकीयशोधपत्रवाचनेन, विद्वद्भिश्च वाचितशोधपत्रेषु प्रदत्त-टिप्पणीभिः कविवरशुक्लः विशिष्टं स्थानमभजत्। कविः स्वकीयेन वैय्यक्तिकप्रयासेन प्राच्यविद्यासम्मेलनस्यावसरे कविसमवायस्यापि आयोजनं सञ्चालनं च सम्पादितवान्। एतस्यैव प्रभावेण अग्रिमसम्मेलनेषु पूर्वतः एव कविसम्मेलनाय समयो निर्धारितः, अखिलभारतीयप्राच्यविद्यासम्मेलनस्य २००२ तमवर्षस्य कविसमवाये कविरयम् आध्यक्ष्यं निरवहत्, २००४ तमवर्षस्य कविसमवायस्य सञ्चालनमकरोत्। डॉ. शुक्लेन नवहदेली (१९७२), वाराणसी (१९८०), फिलाडेल्फिया (१९८४-अमेरिका)-बैंग्लूरु (१९९७)-तुरीनो (इटली) २००२- एडिनबरा-२००७, नवदेहली(२०१२)नगरेषु आयोजितेषु विश्वसंस्कृत- सम्मेलनेषु न केवलं शोधपत्राणि पठितानि अपितु कविसमवायस्य कृतेऽपि समयप्रावधानं कारितं किञ्च स्वरचनाधर्मितायाः परिचयार्थं

निरन्तरताऽपि स्थापिता, परिणामतः 2006 तमवर्षस्य (World Sanskrit Confrence) विश्वसंस्कृतसम्मेलने कविसमवायस्य प्रावधानमभूत्। समवायेऽस्मिन् कवितां प्रस्तोतुं भारतसर्वकारः श्रीरमाकान्तशुक्लस्य चयनम् अकरोत्। तत्र प्रसिद्धरचनायाः 'भाति मे भारतम्' इत्यस्याः पाठोऽभूत्।

१.३ व्यक्तित्वम्

कविवररमाकान्तशुक्लस्य दर्शनं मया प्रप्रथमतया हरिद्वारे श्री हरिहराश्रमे कस्यचन कविसमवायस्योपलक्ष्ये कृतम्, तदानीमहं आचार्यकक्षायाः छात्रः आसम्, पूर्वमहं कविवरस्य 'भाति मे भारतम्' इत्यस्या रचनाया विषये तु जानामि स्म परञ्च साक्षात् कविमुखात् तस्य रचना तत्रैव मया श्रुता। कविवरस्य व्यक्तित्वं तु नितरां कीर्तियुक्तं वर्तते। अस्य वाक्शक्तिस्तु आनन्ददायिनी अपूर्वचमत्कारोत्पादिका च वर्तते। यदा अयं मञ्चात् श्लोकान् गायति, तदा प्रेक्षकवर्गः श्रोतृवर्गश्च आनन्दोदधौ निमज्जितो भवति। एवमनुभूयते यत् एकवारं इतोऽपि परम् अयं श्लोकान् श्रावयेत् गीतानि च गायेत्।

डॉ. जयदेवजानी 'रसराजः' डॉ. शुक्लमहोदयं सरस्वत्याः गगनविहारि-हंसमिव वर्णयति –

भवदीयमुखं सुचिरं मधुरं भवतो नयने श्रुतिशास्त्रतटे।
वदनं कवितावनिताहसनं, स्मितमस्ति सुधाब्धिसमं सरलम्॥
गमनं कविसिंहपदावलिवत्, पठनं जनचित्तविनोदकरम्।
कविता भवदीयमुखाब्जकला, कवितान्यकवित्वतुलारहिता॥
कविता रसराजसुधासरणी कविताश्रवणाज्जनता जगताम्।
डयतेऽथ विचारविहारवरे गगने स्वरसानुभवेन सदा॥''[९]

डॉ. शुक्लस्य यदाऽपि दर्शनं भवति सर्वदाऽपि कविवरस्य विविधाः व्यक्तित्वस्य पक्षाः अक्षिसात् क्रियन्ते, कदाचित् कविः विद्वन्मण्डलमण्डायमानः मूर्धन्यो विद्वान् प्रतीयते, तत्क्षणमेव सः हासपरिहासमूर्त्तिः प्रतीयते, कदाचिदयं गुरुः, कदाचित् सुहृत्, कदाचित् संगीतकारः, कदाचित् लेखकः कदाचिच्च परामर्शदातृरूपेण अस्माकं दृष्टौ समायाति। उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. महावीर अग्रवालः वदति यत् – **'डॉ. शुक्ल जैसे कवीश्वरों पर प्रत्येक भारतीय को गर्व है''**[१०]

डॉ. कृष्णकुमारअग्रवालमहोदयस्य शब्देषु- **''डॉ. शुक्लस्य व्यक्तित्वेन, विद्वत्तया, प्रतिभया च सम्पूर्णमपि संस्कृत् जगत् उपकृतमस्ति''**[११] डॉ. हर्षदेवमाधवः कविवरं काव्याकाशस्य 'पूर्णचन्द्रं' कथयति, लिखति च - **रमाकान्तावतारः संस्कृते एकादशतमोऽयं भगवदवतारः''**[१२]

डॉ. रमाकान्तशुक्लस्य 50 वर्षाणां समाप्तावधौ, डॉ. अभिराजराजेन्द्र-मिश्रस्य संपादकत्वे 'देववाणीसुवासः' नामकोऽभिनन्दनग्रन्थः प्रकाशितोऽभूत्। यत्र संस्कृतजगतः नैके कवयः, विद्वांसः कविवरस्य व्यक्तित्वस्य विषये लिखितवन्तः। कवेः व्यक्तित्वं बहुस्नेहयुक्तं वर्तते। अयं सर्वदाऽपि मित्रवत् व्यवहरति। स्वकीयच्छात्रान् अपि 'जी', (महोदय) शब्दैः सम्मानपूर्वकं सम्बोधयति।

डॉ. शुक्लस्य व्यक्तित्वे संघटनशक्तिरपि वर्तते। सः निर्भीकः सन् कमपि, श्लोकं श्रावयितुं कथयति, कविः अर्वाचीनसंस्कृतसाहित्यस्य प्रसारे कटिबद्धः वर्तते, आ. रामकिशोरशर्ममहोदयः अस्मिन् विषये कथयति यत्-

''दिल्लीस्थदेववाणीपरिषदः संस्थापकः संस्कृतसमाजव्यापकः, पण्डितराजीयप्रभृतिनाटकपुञ्जप्रणेता, परिषदश्च नेता, उत्तरप्रदेशशासन-प्राप्तपुरस्कारः, पवित्रसंस्कारः, शोधग्रन्थनिर्माता, रचनापरिचयदाता, अर्वाचीनसंस्कृतसाहित्यपरिचितः, तत्प्रचारसमर्चितः, अर्वाचीनसंस्कृत-साहित्यपरिचय-अर्वाचीनसंस्कृतमहाकाव्यविमर्शनामकखण्डत्रयात्मक-ग्रन्थसम्पादनदक्षः कृतार्वाचीनरचनारक्षः, आकाशवाणी-नाटकमञ्च-समादृतकृतिः, सहनीयसुमतिः स्वप्रणीतं, दूरदर्शनाभिनीतं, ''भाति मे भारतम्'' - रचनानिर्देशकः, काव्यकलोपदेशकः, मौरीशसप्रभृतिदेश-कृतायोजनेषु, संस्कृतसम्मेलनेषु, स्वकवितागायकः प्रतिभापरिचायकः, विभिन्नसंस्कृतसंस्थानस्वरचित-कवितागानप्राप्तपराप्रतिष्ठः, हिन्दी-संस्कृतसाहित्यानुकरणीयनिष्ठः, सर्वथार्चनीयचरित्रः, अयं सत्पुत्रः ''अनुव्रतः पितुः पुत्रः'' इति वेदोपदेशमक्लेशलेशं श्रद्धापूर्वकं शिरस्यादधानः सततं सावधानः, गानकलामर्मज्ञस्य, पुण्यप्रज्ञस्य, अनेककाव्यरचयितुः स्वपूज्यपितुः, स्वकृतिभिरनवरतं, श्राद्धमाचरतीति महत्प्रमोदास्पदम्''[१३]

कविवर-रमाकान्तशुक्लस्य वदने सर्वदा स्मेरमुखता भवति, तस्य कार्ये गम्भीरता परिलक्ष्यते, तस्य उन्नतः ललाटः, विशालं शरीरम्, सुमधुरः कण्ठः, ओजस्विस्वरः, निर्भीकता, सम्पादनक्षमता सर्वान् अतिशेते। प्रो. राधावल्लभत्रिपाठी तु कविवरं - **'परिकरकविः'** इत्युपाधिना विभूषयति।

कविवरस्य कार्यक्षेत्रम् अध्यापनं वर्तते। कालिदासेन मालविकाग्निमित्रे शिक्षकस्य याः विशेषताः लिखिताः ताः सर्वाः अपि अस्मिन् वर्तन्ते -

शिलष्टा क्रिया कस्यचिदात्मसंस्था,
सङ्क्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां,
धुरि प्रतिष्ठापयितव्य एव[१४]॥

अयं कविः छात्राणां विशिष्टः अध्यापकः आसीत्, यतोहि कवेः अध्यापने या मधुरता भवति स्म, उच्चारणे या परिशुद्धिः, उपस्थापने च या प्रस्तुतिः भवति स्म सा छात्राणां अधिगमे स्थायित्वं प्रददाति स्म।

शोधकर्त्तुः डॉ. शुक्लमहोदयेन सह प्रथमसाक्षात्कारः 2009 तमवर्षे फरवरीमासे जातः, तदानीम् आरभ्य अद्य यावत् शोधकर्त्रा कवेः व्यक्तित्वस्य विविधानां पक्षाणां सूक्ष्मावलोकनं कृतम्, संस्कृतस्य भारतस्य चोत्कर्षाय सः सर्वदा लालायितस्तिष्ठति। सर्वेभ्य आदरप्रदानं ज्ञानप्रदानं च तस्य व्यक्तित्वे समाहितो विशिष्टो गुणो वर्तते। ज्ञानार्जनं तस्य प्रचारणं च तस्य मुख्यं ध्येयम्। गवेषकः कवेः व्यक्तित्वात् तस्य प्रथमसाक्षात्कारे एव प्रभावितो वर्तते। आतिथ्यसत्कारः, प्रकृतिप्रेम, संस्कृताराधनं, छात्रेभ्योऽवसरप्रदानं, आगन्तुकेभ्यः समयदानम् इत्याद्याः कवेः विशेषताः सन्ति। कविः स्वकीयस्य वपुषः सम्यक्तया रक्षणं करोति, शरीरे तैलमर्दनमपि सः करोति। कवेः यावत् विशालं शरीरं वर्तते ततोऽप्यधिकं विशालं तस्य हृदयं वर्तते। समाजस्य दुर्बलानाम् उत्थानाय तस्य हृदयं लहलहायते।

पाश्चात्य-काव्यवित् - 'कालरिजमहोदयः' वदति- **यथा सः अस्ति, तथैव लिखति'** अस्मिन् सन्दर्भे शुक्लस्य रचनाः दृष्टिपथं समायान्ति।

१.४ सम्मानाः

१. राष्ट्रपति-सम्माननम्(२००९ वर्षीयं)-मई ६, २०११ तमखैष्टाब्दे।

२. 'पद्मश्री' उपाधिः - अप्रैल ०५, २०१३ तमखैष्टाब्दे।

३. जीवितसमयसाधनापुरस्कारः Lifetime Acheivement Prize (संस्कृतवाणीसाहित्याभिवृद्धिप्रचारयोः स्वजीविते परिकॢप्तानेक-साधनाविशेषस्य विशिष्य श्रीमदुभयवेदान्त विल्लूरूडादूरश्रीभाष्य-सिंहासनाधिपति श्रीमदाशुकविसार्वभौम-श्रीनिधिस्वामिनां वसुमती-शतकस्य रमाभिधया संस्कृतटीकया, तथा तदीयया गङ्गास्तुतेः राष्ट्रभाषायां परिवर्तनेन च कॢप्तवरिवस्याविशेषस्य 'पद्मश्री' डॉ. रमाकान्तशुक्लमहोदयस्य कृते ११-१२-२०१३ तमखैष्टाब्दः)

४. गीतसरस्वतीसम्मानः, अयं सम्मानः लोकभाषाप्रचारसमित्या २३-९-२०१३ तमखैष्टाब्दे उडीसा प्रान्ते भक्तकविजयदेवसमारोहे प्रदत्तः।

५. सर्वशुक्लोत्तराकाव्यसङ्कलनाय-कौस्तुभपुरस्कारः-भारतीयविद्याभवनम् नवदेहली, २०१३ तमखैष्टाब्दः।

६. संस्कृतप्रचारकमण्डलनवदेहली 'इत्यनेन संस्थानेन' 'कविरत्न' 'कवि-शिरोमणि' 'संस्कृतराष्ट्रकविसम्मानैः' उपाधिभिश्च कविरयं विभूषितः।

७. हिन्दीसंस्कृतसेतुसम्माननम्-भारतीयसाहित्यसङ्गम नवदेहली।

८. 'भारतजनताऽहम्' इति काव्यम् उत्तरप्रदेशस्य कालिदाससम्मानेन पुरस्कृतम्। २००९ तमखैष्टाब्दे।

९. 'नाट्यसप्तकम्' इति नाट्यसङ्कलनाय देहलीसंस्कृताकादम्या अखिलभारतीयमौलिकरचनापुरस्कारः प्रदत्तः।

१०. संस्कृतसाहित्यसेवासम्मानम्, संस्कृताकादमी नवदेहली (१९९७)

११. सुरभारती-सेवासंस्थानमैनपुरी इत्यनया संस्थया अभिनन्दनपत्रं प्रदाय कविवरः सम्मानितः (०७.०२.१९८४)।

१२. आगराविश्वविद्यालयस्य १९६१ तमवर्षस्य मुंशीरामशर्मास्वर्णपदकम् (एम.ए. हिन्दीकक्षायां सर्वोच्चाङ्कप्राप्त्यर्थं श्रीशुक्लाय अयं पुरस्कारः)

१३. पी.डी. गुप्ता सिल्वर जुबली गोल्डमेडल - १९६० (एन.आर.ई. सी. महाविद्यालये सर्वोत्तमाय छात्राय अयं पुरस्कारः प्रदीयते Best boys of the college in 1960)

१४. वाराणसेयसंस्कृतविश्वविद्यालयस्य अखिलभारतीयसंस्कृतवादविवाद प्रतियोगितायां प्रथमपुरस्कारः, १९६० तमखैष्टाब्दे।

१५. श्रीसङ्कर्षणव्यासशताब्दमहोत्सवपुरस्कारः, उज्जयिनी, २०६५(वि).

१६. उत्तरप्रदेशसंस्कृताकादम्या 'पण्डितराजीयम्' कृतिः संस्कृतसाहित्य-पुरस्कारेण पुरस्कृता। 'जयभारतभूमे' कृतिरियमपि संस्कृतसाहित्य-पुरस्कारेण सम्मानिता किञ्च भाति मे भारतम्, अभिशापम् - इमे द्वे पुस्तिकेऽपि अनेनैव पुरस्कारेण सम्मानिते।

१७. संस्कृतसमाराधकसम्मानः, देहलीसंस्कृताकादमी१९९४-९५ वर्षस्य।

१८. जैनाचार्यरविषेणकृतपद्मपुराण एवं तुलसीकृतरामचरितमानस इति ग्रन्थ उत्तरप्रदेशर्सकारेण विशेषपुरस्कारेण पुरस्कृतः १९७४

१९. कविसपर्याकायक्रमः, राष्ट्रियसंस्कृतसंस्थानम् - २००८

२०. 'देववाणीसुवासः' अभिनन्दनग्रन्थः - १९९३

२१. उत्तरप्रदेशसंस्कृतसंस्थानेन एकादशसहस्त्ररुप्यकात्मकः २००९तम वर्षीयो विशिष्टः पुरस्कारः 'सर्वशुक्लोत्तरा' काव्य संग्रहाय प्रदत्तः।

२२. उत्तरप्रदेशसंस्कृतसंस्थानेन २०१२तमवर्षीयः नारदपुरस्कारः संस्कृत-पत्रकारिताक्षेत्रे उत्कृष्टयोगदानार्थ डा. शुक्लाय प्रदत्तः।

२३. उ.प्र.सं.संस्थानेन२०१३तमवषीर्य एकविंशतिसहस्रारूप्यात्मको विशिष्टः पुरस्कारः 'मम जननी' इति काव्यप्रणमनार्थं डा.शुक्लाय समर्पितः।

२४. वाराणस्याः २०१४तम वर्षीयो 'वाकोवाक्य'-सम्मानः।

२५. हिम्मतनगरगुजरात-निम्बार्कशिखरसम्मानः(२०१३)डा.शुक्लाय प्रादीयत।

२६ दिल्लीस्थं विद्याभूषणसम्मानः(एकलक्षरुप्यकात्मकः)डा. शुक्लायोद्घोषितः।

२७. कविवरशुक्लस्य कृतिषु- काशी हि.वि.वि., वाराणसी-आगरा-विश्वविद्यालय-मगधविश्वविद्यालय-राजस्थानविश्वविद्यालय-एच. एन.बी. गढवालविश्वविद्यालय-अहमदाबाद-विश्वविद्यालय-मेरठ-गुजरात-जीवाजी-विश्वविश्वविद्यालयेषु शोधकार्यं जातम्।

एतदतिरिच्य अध्ययन-काले कविना विविधाः सम्मानाः प्राप्ताः। यथा-बरेलीकालेजस्य गीतासंस्कृतपरिषदः वादविवादप्रतियोगितायां मदनलालदाना-चलवैजयन्ती प्रथमपुरस्कारश्च, एन.आर.ई.सी. महाविद्यालयस्य विविधासु स्पर्धासु प्रथमपुरस्कारः। कविवरशुक्ल भारतीयसंस्कृतपत्रकारसंघस्य अध्यक्षो वर्तते। २०११ तमवर्षे अस्य पञ्जीकरणं जातम्। दिल्लीसंस्कृताकादम्या कविवराय अखिलभारतीयसंस्कृतपत्रकारितासम्मानोऽपि प्रादीयत।

कविवरः विविधसम्मेलनेषु आध्यक्ष्यमपि निरवहत्। विविधकविसमवायेषु बहुधा सम्मानितः।

१.५ कृतयः

डॉ. रमाकान्तशुक्लस्य लेखनी दृश्य-श्रव्योभयविधयोः प्रसृता वर्तते। भवता स्वीयरचनाभिः संस्कृतसाहित्यस्य या समृद्धिः विहिता, तत्परिचयः संक्षेपेण प्रस्तूयते।

काव्य-रचनाः

१. कालिदासपुराणम् - २७ श्लोकेषु निबद्धा इयं रचना कविना छात्रावस्थायामेव लिखिता। इयं राधाकृष्णसंस्कृतमहाविद्यालयस्य हस्तलिखित-पत्रिकायां (मन्दाकिन्याम्) १९५६तमवर्षे प्रकाशिता। अस्यां रचनायां कविना कालिदासकृतीनां परिचयः प्रदत्तः।

२. कृष्णाय तुभ्यं नमः - इयमपि छात्रावस्थायाः रचना वर्तते, अस्यां तावत् अष्टौ श्लोकाः शार्दूलविक्रीडिते वर्तन्ते। १९६० तमे वर्षे वाराणसेयसंस्कृतविश्वविद्यालये समायोजिते कविसमवाये इयं रचना कविना पठिता।

३. विन्दति सुखम् - अत्र अष्टौ पद्यानि वर्तन्ते। इयं १९६०तमवर्षे वाराणस्यां कविसमवाये श्राविता।

४. भ्राता मे - आर्याच्छन्दसि संरचितानाम् अष्टपद्यानामयं संग्रहः, यत्र अग्रजस्य श्री कृष्णकान्तशुक्लस्य वर्णनं विरोधाभासादिष्वलंकारेषु सम्पादितमस्ति।

५. भ्रमरचरितम् (मधुपवृत्तिः) - वसन्ततिलकाच्छन्दसि निबद्धेयं

रचना १९६२ तमे वर्षे- 'विश्व-संस्कृतम्' नामके त्रैमासिकपत्रे प्रकाशिता, इयम् अन्योक्तिपरकरचना वर्तते।

६. भाति मे भारतम् - कविवरशुक्लस्य इयं प्रसिद्धा रचना विद्यते, राष्ट्रभावेन संवलितायामस्यां रचनायां भारतस्य अन्तर्बाह्यप्रकृत्योः मनोहारि चित्रणं प्रस्तूयते। अस्यां १०८ श्लोकाः सन्ति येषां माध्यमेन कविः स्वकीयमाराध्यदेवं 'भारतं' प्रसादयितुमिच्छति, इयं रचना मालाकाव्ये शतककाव्ये च गण्यते, अस्याः रचना १९७९ तमे वर्षे जाता, एतद् राष्ट्रीयभावनाप्रधानं शतककाव्यं वर्तते। कविः भारतस्य विशिष्टतानां वर्णनं कृत्वा भारतीयेषु आत्मनिष्ठराष्ट्रस्य स्वाभिमानं जागरयति। स्रग्विणीच्छन्दसि प्रणीतेऽस्मिन् काव्ये भारतस्य सामाजिकं, धार्मिकं सांस्कृतिकञ्च पक्षं समुद्घाटयति कविः, काव्यमेतत् विविधेषु विश्वविद्यालयेषु बी.ए., एम.ए. कक्षापाठ्यक्रमेषु निर्धारितं वर्तते। माध्यमिककक्षास्वप्यस्य अंशतोऽध्यापनं क्रियते।

७. जय भारतभूमे - 'जय भारतभूमे' एकं राष्ट्रियं शतपद्यात्मकं काव्यं वर्तते। 'जय भारतभूमे' शीर्षकान्विता रचना कवेः काव्यसङ्ग्रहो वर्तते यस्मिन् च (१) जय भारतभूमे (२) भजे भारतम् (३) मम भारतं विजयते (४) भारतभूमिर्विलसति (५) जय भारतमेदिनि (६) भारताख्यः स्वदेशः (७) दिव्यं मम भारतम् सदृशाः रचनाः सङ्कलितास्सन्ति। अस्मिन् काव्ये भारतस्य प्रतिष्ठां, सुरक्षां शालीनताञ्च प्रति जनान् जागरूकान् करोति कविः। अत्र भारतीयसभ्यतायाः, संस्कृतेः ज्ञानविज्ञानयोः च महनीयराशेः सगौरवम् उल्लेखः वर्तते।

८. वाणीं वयं वन्दामहे - कविवरेण अस्मिन् काव्ये मातुः सरस्वत्याः वन्दनं कृतमस्ति। अस्य काव्यस्य रचनातिथिः - १४-९-१९९४ वर्तते। इयं रचना सर्वशुक्लोत्तरायामपि सङ्कलिताऽस्ति।

९. सुरभारती विजयते - रचनेयं सुरभारत्याः गुणगानं सम्पादयति। अस्याः रचनातिथिः-२५.१२.१९७५ वर्तते।

१०. भाति मौरीशसम् - १७.०३.१९८४तमे खैष्टाब्दे मारिशसदेशे रचिता इयं रचना स्रग्विणीछन्दसि वर्तते, अत्र २५ श्लोकाः विद्यन्ते। इयं कविता मारिशसदेशस्य सामाजिकं, धार्मिकं सांस्कृतिकञ्च स्वरूपमुद्घाटयति।

११. भारतजनताऽहम् - १५.०७.१९८६ तमे वर्षे रचितेयं कविता भारतीयजनमानसस्य वैशिष्ट्यं प्रतिपादयति। अस्मिन् ५३ पद्यानि सन्ति।

१२. वेदवाणीं नुमः - एतत् स्तोत्रकाव्यं वर्तते। वेदानां महत्त्वं प्रतिपादयन्ती इयं कविता राष्ट्रस्नेहम् अभिव्यनक्ति, अस्याः रचनातिथिः २८.४.१९९५ वर्तते।

१३. धन्वन्तरिं तमीडे - कवितायामस्याम् आयुर्वेदकर्त्तुः भागवतो धन्वन्तरेः वन्दनमस्ति। (अस्य रचनातिथिः ०८.०९.१९९१ अस्ति)

१४. महाकालमालिका - एतद् कवेः स्तोत्रकाव्यं वर्तते, यस्मिन् विविधेषु भूभागेषु स्थितानां शिवालयानामर्चनं कृत्वा, भौगालिक-राष्ट्रिय-सांस्कृतिक एकतायाः परिचयं प्रस्तुवन् शिवत्वं संस्थापयितुं प्रयतते कविः। अस्य रचना १९९२ तमे वर्षे शिवरात्रौ अभूत्।

१५. नमः शास्त्रिणे वीरधुर्याय तस्मै - अस्यां कवितायां कविना प्रतिभासम्पन्नानां प्रधानमंत्रिचराणां लालबहादुरशास्त्रिणां व्यक्तित्वस्य चर्चा कृता। अस्याः कवितायाः रचनातिथिः २.१०.१९६५ वर्तते।

१६. उज्जयिनीयं जयति - 'उज्जयिनीयं जयति' शीर्षकान्वितायां कवितायां कविः उज्जैनस्य गौरवगानं प्रस्तुवन् नगर्याः ऐतिहासिकं, साहित्यिकं प्राकृतिकञ्च सौन्दर्यं वर्णयति, रचनातिथिः १३.११.१९८२ ई. खैष्टाब्दे वर्तते। कविना उज्जैनस्य यात्रा बहुधा कृताऽस्ति अथ च स्वकीयामनुभूतिमेव कविः प्रस्तौति अस्मिन् शीर्षके।

१७. राजस्थानम् - भ्रमणशीलः कविः देश-देशान्तरेषु गत्वा तत्रत्यायै रमणीयतायै साहित्यिकं कलेवरं प्रददाति, राजस्थानमपि तादृशी एव रुचिररचना वर्तते, यस्यां कविना राजस्थानस्य तीर्थानां, वीराणां, वीराङ्गनानां, लोककलानाञ्च वर्णनं समुपस्थापितमस्ति किञ्च सम्पूर्णमपि राजस्थानदर्शनमेव कारितम्, सप्तदशश्लोकेष्वेव। कविना स्ववाक्कलायाः वर्णनशैल्याश्च समृद्धं स्वरूपमत्र समुपस्थापितमस्ति।

१८. अहं स्वतन्त्रता भणामि - इयं कविता कविवरशुक्लस्य प्रत्यग्रराष्ट्रभक्तिकपरकवितासु प्रमुखा वर्तते, १९८३ तमखैष्टाब्दस्य स्वतंत्रतादिवसे रचितायामस्यां कवितायां तात्कालिकस्य तिक्तयथार्थस्य सङ्केतेन सहैव

आशावादितायाः दर्शनं कारयति कविः। स्वतंत्रताया आत्मावलोकनस्य च मार्मिकं दृश्यं दर्शयति कविः।

१९. रौति ते भारतम् - अस्यां रचनायां देशस्य चिन्तनीया स्थितिः वर्णिताऽस्ति, देशस्य दुःस्थितौ दुःखेन करुणाप्लावितः कविः कवितां सृजति, अस्याः रचनातिथिः १२.१०.१९८५ ई. वर्तते।

२०. राष्ट्रदेवते -उग्रवाद-वधूदाह-निर्धनता-भ्रष्टाचारादिभिः दुःखितः वर्तते कविः। कथं राष्ट्रदेवस्य सर्मचना करणीया अस्माभिरित्येव वर्णनं वर्तते कवितायामस्याम्। आराधकस्य राष्ट्रदेवम्प्रति साक्रोशं निवेदनमस्ति। गीतस्य रचनातिथिः २९.१२.१९८५ वर्तते।

२१. फिलाडेल्फिया - षष्ठविश्वसंस्कृतसम्मेलनं 'फिलाडेल्फिया' नगरे आसीत्, तस्यैव सम्मेलनस्य कार्यक्रमाणां वर्णनमनेन शीर्षकेण करोति कविः। अस्याः रचनातिथिः १७.१०.१९८४ वर्तते।

२२. मेघप्रबोधनम् - इयं रचना कविना ०५.१०.१९८७ तमे दिनांके प्रणीता। १९८७ तमे वर्षे शताब्द्या भीषणतमः शोषो भारतेऽभवत्। जबलपुरे मध्यप्रदेशसंस्कृताकादम्या समायोजिते संस्कृतकविसमवाये प्रस्तोतुमियं रचना कविना रेलयाने लिखिता। यदा जबलपुरं कविः प्राप्तस्तत्पूर्वमेव वृष्टिः सञ्जाता। मन्ये कविवचनं मेघेन श्रुतम्।

२३. अकालजलद! - १९८८ तमखैष्टाब्दस्य मार्चमासस्य १३ तारिकायां उत्तरभारतस्य विविधस्थलेषु उपलवृष्टिः जाता। असमयवृष्ट्या बहुसस्यहानिर्जाता। असमये समागतान् मेघान् निन्दति कविः। सस्येषु करकाचयं निपात्य त्वया निन्द्यमाचर्यते मेघ!। रचनातिथिः १३-१५.०३.१९८८ वर्तते।

२४. स्वागतं पयोद ते - कवितायामस्यां सुकाले समागतानां मेघानां स्वागतं करोति कविः। रचनातिथिः १५.०७.१९८८।

२५. नेहरुं तं स्मरामो वयं सादरम् - स्वतंत्रभारतस्य प्रथमप्रधानमन्त्रिणः कार्यकुशलतया, तस्य विश्वशान्तये कृतप्रयासैः प्रभावितः सन् कविः तस्य व्यक्तित्वं कर्तृत्वञ्चाभिलक्ष्य बालदिवसे तज्जन्मोत्सवे च इमां कवितां रचयति। रचनातिथिः ११.११.१९८८ वर्तते।

२६. जाबालिपुरं चल - मध्यप्रदेशस्य जाबालिपुरे संस्कृताकादम्या

समायोजिते सम्मेलने भागग्रहणाय इयं कविता कविवरं प्रेरयन्ती विद्यते किञ्च कवितायामस्यां तत्रत्यं प्राकृतिकं सौन्दर्यम्, सभ्यतां तत्रत्यां संस्कृतिं च कविः वर्णयति। रचनाकालः २२.१२.१९८८ वर्तते।

२७. उत्तरमङ्गलम् – नूतनवर्षमङ्गलकामनया समन्वितेयं कविता स्रग्विणीछन्दसि १५.०१.१९९० तमे रचिता वर्तते। कविः विविधानां समस्यानामपहारार्थं मङ्गलकामनां करोति।

२८. एकं सद् बहुधा विलोक्यते भारतम् – संगच्छध्वं संवदध्वमिति कामनया संवलितेयं रचना भारतराष्ट्रस्य एकतां प्रदर्शयति। अस्माकं भारतं नित्यमपि एकतायाः पाठं पाठयति। (रचनातिथिः ३१.०१.१९८९)

२९. किं जीवनं ते – इयं कविता व्यङ्ग्यात्मिका वर्तते, रचनाकालः १९.०३.१९९१ वर्तते।

३०. वदत नेतारो मनाक् – इयं कविताऽपि व्यङ्ग्यकविता वर्तते। रचनाकालः १९.१०.१९९३ वर्तते।

३१. ब्रूहि जगन्नाथस्वामिन् – अस्यां कवितायां कविः जगन्नाथस्वामिनं विविधान् प्रश्नान् पृच्छति। राजीवगान्धिनः हननेन (मृत्युना) कविः दुःखितो वर्तते। जगन्नाथपुर्याः यात्राक्रमे- ०५.०६.१९९१ तमे वर्षे इयं रचिताऽस्ति।

३२. वन्दनीयास्ते – इयं रचना मुक्तकानां समूहः वर्तते। अत्र देशस्य चिन्तनीया स्थितिः वर्णिताऽस्ति। 'वन्दनीयास्ते' शब्दोऽयं वन्दनीयाः+ते(तव), वन्दनीया+आस्ते, वन्दनीया+ते इति त्रिभिः प्रकारैः सम्मुखमायाति। (रचनातिथिः १४.०१.१९९३)

३३. मदीयकविते कुरुष्व गानम् –कविवरशुक्लस्य इयं कविता विदुषाम्, कवीनाम्, संगीतज्ञानाम्, देशभक्तानाञ्च वन्दनं कुर्वती देशभक्तिभावनया संवलिताऽस्ति। अस्याः रचनाकालः – २६.१९.१९९३ खैष्टाब्दः वर्तते।

३४. वन्द्यतां काऽपि सा शासनासन्दिका – अस्यां काव्यरचनायां आसन्दिकायाः महिमा वर्णितोऽस्ति, अस्याः शासनासन्दिकायाः कारणेनैव नैकानि कुकृत्यानि जायन्ते। अस्याः एव कारणेन छन्ददात्री प्रजा पीड्यते। व्यङ्ग्यपूर्णशैल्या रचिता इयं रचना २६.६.१९९६ तमे वर्षे दृष्टिपथमागता।

३५. तं सुभाषं स्मरामो वयं सादरम् - बुद्धिमतः सुभाषस्य कार्याणां स्मरणं कारयन्ती इयं कविता स्वतंत्रतासेनानिनं सुभाषचन्द्रं सादरं प्रणमति।

३६. आशाद्विशती - देववाणीपरिषदाः एकोनविंशत्युत्तरैक-शतग्रन्थरूपेण आशाद्विशती प्रकाशितं मुक्तककाव्यमेतत्। प्रकाशनवर्ष-२०१२

इमाः अतिरिच्यापि कविवरस्य तस्य स्मृतिर्विजयते पुरुषोत्तमस्य (१४.०९.१९९६), स्वतंत्रतायाः स्वर्ण जयन्ती (१५.८.१९९७), लोकतंत्रेऽस्मिन् (२०.०१.१९९८) प्रणम्याः कारगिलवीराः (२६.०५.१९९९ तः २६.०७.१९९९ खैष्टाब्दं यावत्), योऽयं कृतः शपथस्त्वया (३१.१०.१९९९), भावसन्धिः (२०००ई.), त्वं चन्दनमसि हे प्रभो (१२.०२.२००० ई.), तुरीनो स्मृतिसपादशतकम् (०७.०४.२०००), महाकुम्भे (१४.०१.२००१), मित्रतां कामये शात्रवं चाश्रये (१४.०७.२००१ तः १६.०७.२००१यावत्), आतंकवादस्य १घोरताण्डवः (११.०९.२००१), भारतस्य जनता समीक्षते (२४.१२.२००१), किं कुर्यात् (१६.०२.२००२), योऽयमातङ्कवादः (१५.०१.२०००), श्रीवरदेश्वराष्टकम् (३०.०३.२००३), यानावरोधो दुस्त्यजः शकटावरोधो दुस्त्यजः, श्रावणमासे, निर्वाचने प्राप्ते (१३.०४.२००४), पोलकहालस्थटर्नरहाउसवातायनात् (१७.०७.२००६), मम तथा विहगदम्पत्योर्विदेशयात्रा (१७.०७.२००६), अपहृतविमाने, मातरं प्रति पुत्रस्य जङ्गमभाषसन्देशः (१२.०७.२००६) कविसहृदय-संवादः (१४.०७.२००६) एडिनबरानगरोत्तमे (१४.०८.२००६), अभिनवहितोपदेशः (१४.०८.२००६), स्मरामि ब्रह्मचारिणम्, स्वतंत्रदेशः सुतरां विभाति (१५.०१.२००७) पुनर्नो भारते भूयात् (२००७), दीपमाला, राजतां कालिदासः, परमाण्वनुबन्धः (२४.०७.२००८), धर्मक्षेत्रे कुरुक्षेत्रे (२००८), कुरुक्षेत्रे मशकदंशतो रक्षा (२००८), आशा (२४.१२.२००८) शीर्षकान्विताः रचनाः विद्यन्ते।

नाट्यरचना

रचनाकलायाः चरमोत्कर्षो भवति काव्यकलायाम्। काव्यस्य च रमणीया विधा वर्तते नाटकम्, रमणीयकाव्यस्यास्य नाट्यकलायाः १०भेदाः अष्टादश उपभेदाश्च वर्तन्ते।[१५] 'काव्येषु नाटकं रम्यम्' इमामुक्तिं मनसि

निधाय, उक्तेः रमणीयताञ्चानुभूय नाट्यशास्त्रस्य प्रणेत्रा भरतमुनिना-ऋग्वेदात् पाठ्यसामग्रीं स्वीकृत्य, सामवेदात् गीतं स्वीकृत्य, यजुर्वेदादभिनयं, अथर्ववेदाच्च रसान् संगृह्य ब्रह्मणा सृष्टेः पञ्चमवेदस्य उत्पत्ति-वर्णनं कृतमस्ति।[१६] अतः दृश्यश्रव्ययोः परिणतिः किञ्च वस्तुनः साकारतायाः प्रदर्शनमेव नाटकस्य गरिमा वर्तते। नाट्यकारस्य भरतमुनेः मतानुसारं ''नाटकं शोकाकुलानां श्रमातुराणाञ्च कृते शान्तिदायकं भवति''[१७]।

कविवरशुक्लेन अर्वाचीनसाहित्ये नूतनविधासु नाट्यलेखनं कृतमस्ति तेन लिखितानि नाटकानि ध्वनिनाटकानि रेडियोनाटकानि वा आकाशवाण्या प्रसारितानि अथ च तेषामभिनयः रङ्गमञ्चेष्वपि बहुधा जातः, उभाभ्यामपि एतानि लोकप्रियतामाप्नुवन्, तेषां विवरणं प्रस्तूयते –

१. चक्रव्यूहभङ्गम्[१८] – अस्य नाटकस्य रचना विंशशताब्देः षष्ठदशके जाता- 1970 तमे वर्षे एतत् प्रसारितम्।

२. पुरश्चरणकमलम्[१९] – हिन्दीभाषायाः महाकवेः पं. सूर्यकान्त-त्रिपाठि'निराला'महोदयस्य 'राम की शक्तिपूजा' काव्यस्य नाट्यरूपान्तरणं वर्तते नाटकमिदम्। नाटके अतिरिक्तं कथ्यमपि संयोजितमस्ति यथावसरम्। अनेन माध्यमेन नाटककारेण सन्मार्गगमने पराजयमनुभूतवतां जनानां हृत्सु आशायाः संचारः कृतः।

३. पण्डितराजीयम्[२०] – नाटकेऽस्मिन् पण्डितराजजगन्नाथस्य 'शाहजहाँ- सुपोषितायाः' लवङ्ग्याः प्रेमाख्यानमस्ति। अस्माकं समाजः अन्तर्जातीय- विवाहमद्यापि न मनुते समुचितम्, तद्विषयमेवाधिकृत्य कविः समाजाय नूतनां दृष्टिं प्रददाति।

४. अभिशापम्[२१] – नाटकेऽस्मिन् देवयानीकचयोः प्रेमप्रकरणस्य प्रस्तुतीकरणं कृत्वा मदिरापानस्य दोषान् प्रदर्शयति कविः।

५. विक्रमोर्वशीयम्[२२] – कालिदासस्य नाटकस्य ध्वनिरूपान्तरणं वर्तते नाटकमिदम्। राज्ञः पुरुरवसस्य उर्वश्या सह प्रेमपरिणयः वर्तते। नाटकेनानेन कविना अपहरण-बलात्कारादि समस्यानां प्रदर्शनं सम्पादितमस्ति।

६. दाराशिकोहीयम्[२३]- नाटकेऽस्मिन् शाहजहाँसुतस्य, सहिष्णु-शीलसंस्कृतसम्पूजकस्य दाराशिकोहस्य औरंगजेबस्य च जीवनाख्यानं प्रस्तुतं कविना श्रीशुक्लेन।

७. आलोकिनी[२४] - आलोकिन्यां रामकथायाः सामासिकी प्रस्तुतिः वर्तते। लंकाविजयानन्तरं रामस्य अयोध्यायां राज्याभिषेकस्य दीपोत्सवस्य च वर्णनं वर्तते।

८. चक्रानुसरणम् (नियतिचक्रम्)[२५] - कवेः विल्हणस्य राजकुमार्या सह समुद्भूतायाः प्रीतिकथायाः वर्णनम् वर्तते। अन्ते तयोः मेलनं कारयति कविः।

९. गंगावतरणम् - लोकप्रसिद्धकथायाः ध्वन्यङ्कनं कृतमस्ति कविना। राज्ञः सगरस्य सहस्रसंख्याकानां पुत्राणाम् उद्धाराय भगीरथेन तपोबलेन, पतितपावन्याः गङ्गायाः पृथिव्यामानयनं वर्णितमस्ति कविवरशुक्लेन। जीवनदायिनीयं गङ्गा प्रकृतेः प्राणस्वरूपा वर्तते।

१०. शुचिगान्धीयम्[२५] - महात्मना गान्धिना भारते भारतेतरेषु च देशेषु उषित्वा या शुचितायाः साधना कृता, तस्या एव साधनायाः परिचयं प्रददाति रूपकमेतत्।

काव्यसङ्ग्रहाः

कवेः कवितासंसारस्य साक्षिभूताः नैके भारतीयाः वैदेशिकाश्च सन्ति। भ्रमणशीलः कविः देशदेशान्तरेषु गत्वा स्वकीयामभिव्यक्तिं काव्यरूपेण करोति तत्रत्यं सौन्दर्यं, तत्रत्या संस्कृतिः आचार-विचारः सर्वमपि कविना स्वलेखन्या अभिव्यज्यते। कवेः काव्यसङ्ग्रहत्रयं पाठकानां समक्षं विद्यते।

१ सर्वशुक्ला[२६] - सर्वशुक्लाकाव्यसङ्ग्रहः २००३ तमे वर्षे प्राकाश्यमागतः। देहली संस्कृताकादम्याः आर्थिकानुदानेन प्रकाशितेऽस्मिन् काव्यसङ्ग्रहे वाणीं वयं वन्दामहे, सुरभारती विजयते, भाति मे भारतम्, दूरदर्शने प्रस्तुतं भाति मे भारतम्, जय भारतभूमे, भाति मौरिशसम्, भारतजनताऽहम् सदृश्यः कविताः विद्यन्ते। सङ्ग्रहस्यान्ते कवेः संक्षिप्तः परिचयोऽपि प्रस्तावितः।

२ भारतजनताऽहम्[२७] - 'भारतजनताहम्' कवितासङ्कलनं २००१ तमे खैष्टाब्दे देववाणीपरिषदा प्रकाशितमभवत्। अस्मिन् सङ्कलने ४० रचनाः सङ्कलितास्सन्ति। अत्र बहूनां कवितानां हिन्दीभाषयाऽपि अनुवादः वर्तते। कासाञ्चन आंग्लेऽपि अनुवादः वर्तते।

३. मम जननी[२८] - सद्यः प्रकाशितेऽस्मिन् काव्यसङ्ग्रहेः पञ्चविंशतिः स्फुटकाव्यानि सन्ति। चतुर्थस्य सर्वशुक्लोत्तराकाव्यङ्ग्रहस्य साकल्येन विवरणं शोधकार्येऽस्मिन् प्रस्तोस्यते।

अनूदिताः ग्रन्थाः

डॉ. उमाकान्तशुक्लस्य कूहा खण्डकाव्यस्य, श्री श्री सुन्दरराजस्य श्रीहनूमत्पञ्चाशत्, शरणागतिषोडशी अन्यापदेशकाव्यानां च हिन्दी भावानुवादः। मौहम्मदकबीरउमरमहोदय-लिखित-अमीना उपन्यासस्य आंग्लतः संस्कृते छायानुवादः।

सम्पादिताः ग्रन्थाः

संस्कृतसुधा, संस्कृतगुच्छः, अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (खण्डत्रयम्), अर्वाचीनसंस्कृतसाहित्यपरिचयः (खण्डद्वयम्), अर्वाचीन-संस्कृतसङ्ग्रहः (खण्डत्रयम्), अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम् १९७९ तः अद्यावधि) देहलीसंस्कृताकादम्या अखिलभारतीयसंस्कृतपत्रकारितासम्मानेन सभाजितम्)।

●

सन्दर्भाः

१. नीतिशतकम्, श्लोक-३२, भर्तृहरि।
२. देववाणी-सुवास, पृ. २/३ - सम्पादकः - अभिराजराजेन्द्रमिश्रः,देववाणीप्रकाशनम्, नवदेहली-१९९०
३. देववाणी-सुवासः - प्रथमखण्डः प्राग्वचिकम् दि. १९९० सम्पादकः- अभिराजराजेन्द्रमिश्रः, देववाणीप्रकाशनम्, नवदेहली-१९९०
४. पारम्परिक श्लोकः
५. तदेव
६. मिश्रः प्रकाशचन्द्रः अर्वाचीनसंस्कृतम्, २२/३, पृ.- २५, सम्पादकः- रमाकान्त-शुक्लः, देववाणीप्रकाशनम्, नवदेहली।
७. देववाणी-सुवासः, द्वितीयः प्रसरः, पृष्ठसं. ४८, सम्पादकः - अभिराजराजेन्द्रमिश्रः, देववाणीप्रकाशनम्, नवदेहली-१९९०
८. देववाणी-सुवासः, प्रथमखण्ड, पृ.सं. ५४, सम्पादकः - अभिराजराजेन्द्रमिश्रः, देववाणीप्रकाशनम्, नवदेहली-१९९०

९. देववाणी-सुवासः, प्रथमखण्ड, पृ.सं. ५४, सम्पादकः - अभिराजराजेन्द्रमिश्रः, देववाणीप्रकाशनम्, नवदेहली-१९९०

१०. देववाणी-सुवासः, पृ.सं. ५४, सम्पादकः - अभिराजराजेन्द्रमिश्रः, देववाणी-प्रकाशनम्, नवदेहली-१९९०

११. देववाणी-सुवासः, पृ.सं. 54, सम्पादकः - अभिराजराजेन्द्रमिश्रः, देववाणी-प्रकाशनम्, नवदेहली-१९९०

१२. देववाणी-सुवासः, पृ.सं. ५४, सम्पादकः - अभिराजराजेन्द्रमिश्रः, देववाणी-प्रकाशनम्, नवदेहली-१९९०

१३. देववाणी-सुवासः, प्राग्वाचिकम्, पृ.सं. ०६, सम्पादकः - अभिराजराजेन्द्रमिश्रः, देववाणीप्रकाशनम्, नवदेहली-१९९०

१४. मालिविकाग्निमित्रम्, महाकविकालिदासः, विश्वविद्यालयप्रकाशनम्, वाराणसी।

१५. साहित्यदर्पणम्, ६/३/३/३, व्याख्याताः - शेषराजशर्मा 'रेग्मी', चौखम्बाप्रकाशनम्, वाराणसी।

१६. सर्वशास्त्रार्थसम्पन्नं सर्वशिल्प प्रवर्तकम्।
नाट्याख्यं पञ्चम् वेदं सेतिहासं करोम्यहम्।।
जग्राह पाठ्यं ऋग्वेदातसामभ्यो गीतमेव च।
यजुर्वेदादभियान् रसोनाथर्वणादपि।। नाट्यशास्त्रम्- १/१६/१७
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।

१७. दुःखार्त्तानां श्रमर्तानां शोकार्त्तानां तपस्विनाम्। विश्रामजननं लोके नाट्यमेतद् भविष्यति।। - नाट्यशास्त्रम्

१८. अर्वाचीनसंस्कृतम्। ५/३१, देववाणीपरिषद्, नई दिल्ली।

१९. अर्वाचीनसंस्कृतम्। ६/३१, देववाणीपरिषद्, नई दिल्ली।

२०. तत्रैव-६/४, १५ अक्टूबर, १९८४, देववाणीपरिषद्, नई दिल्ली।

२१. अर्वाचीनसंस्कृतम्। ११/३, १५ जुलाई, १९८९, देववाणीपरिषद्, नई दिल्ली।

२२. अर्वाचीनसंस्कृतम्। ५/३१, देववाणीपरिषद्, नई दिल्ली।

२३. अर्वाचीनसंस्कृतम्। ११/४, १५ अक्टूबर, १९८९, देववाणीप्रकाशनम्, न.दिल्ली।

२४. अर्वाचीनसंस्कृतम्। १/३, १५ अक्टूबर, १९८९, देववाणीप्रकाशनम्, नई दिल्ली।

२५. अर्वाचीनसंस्कृतम्। १४/२, १५ अप्रैल, १९९२, देववाणीप्रकाशनम्, नई दिल्ली।

२५. अर्वाचीनसंस्कृतम्। २२/३, ३१ अगस्त, २०००, देववाणीपरिषद्, नई दिल्ली।

२६. देववाणीपरिषद्-२००३, नई दिल्ली।

२७. अर्वाचीनसंस्कृतम् ८/३, देववाणीपरिषद्, नई दिल्ली।

२८. देववाणीपरिषद्, ग्रन्थाङ्क-१२३, २०१३, नई दिल्ली।

द्वितीयोऽध्यायः

आधुनिककाव्यपरम्परा सर्वशुक्लोत्तरा च

कविवररमाकान्तशुक्लस्य लेखनी श्रव्य-दृश्योभयविधयोः विजयते। सर्वशुक्लोत्तरा प्रसिद्धः काव्य-सङ्ग्रहः वर्तते, सङ्ग्रहेऽस्मिन् अष्टषष्टिः रचनाः विद्यन्ते याश्च विविधस्थानेषु विविधविषयान् स्वीकृत्य रचितास्सन्ति। सर्वशुक्लोत्तरायां कविः सामाजिकसमस्यानाम् उन्मूलनाय कृतसङ्कल्पो दृश्यते। एतासु रचनासु क्वचित् राष्ट्रस्य अनितरसाधारणवैशिष्ट्यस्य दर्शनं भवति क्वचित् अद्यतनीयस्य कटुयथार्थस्य सङ्केतः प्राप्यते। क्वचित् स्वतन्त्रतायाः गुणगानं क्वचिच्च कारगिलवीराणां पूजा, क्वचित् आतंकवादस्य क्वचिच्च निर्वाचनस्य वर्णनं वर्तते।

सर्वशुक्लोत्तराकवितासङ्कलनं सर्वशुक्लाया अनन्तरं प्रकाशितं सङ्कलनमस्ति, अस्मिन् सङ्कलने आगताः रचनाः कवेः छात्रावस्थया आरभ्य रचिताः सन्ति। 'मधुपवृत्तिः' शीर्षकान्विता रचना कवेः छात्रावस्थायाः रचना वर्तते या खलु १९६१ तमे वर्षे रचिताऽस्ति। अत्र १९८० तः २००८ ईसवीयवर्षं यावत् रचितानां रचनानामाधिक्यमस्ति। सङ्कलनस्यास्य प्रकाशनं देववाणी-परिषदा २००८ तमे ईसवीये वर्षे कृतम्।

२.१ आधुनिककाव्य-परम्परा

वसुधैव कुटुम्बकमित्यस्योद्घोषिका संस्कृतभाषा न केवला भाषा अपितु अस्माकं दायस्वरूपाऽपि विद्यते, संस्कृत-काव्यसाहित्यस्य अजस्रा धारा आवैदिककालात् आधुनिकं यावत् निरन्तरं प्रवहमाना वर्तते। विकासक्रमदृष्ट्या वेदाः काव्यस्योद्गमस्थलानि वर्तन्ते। लौकिकसंस्कृते रामायणम् आदिकाव्यं वाल्मीकिश्च आदिकविरूपेण विज्ञैः सर्वैरपि सादरं स्वीक्रियते।

लौकिकसंस्कृतसाहित्यस्य मुख्यतः त्रयो भेदाः स्वीक्रियन्ते। गद्यकाव्यम्, पद्यकाव्यम्, मिश्रकाव्यञ्चेति। मुक्तककाव्यमपि अस्यैव अपरः पक्षः मन्यते। गद्यकाव्यं मुख्यतो द्विविधा विभज्यते कथा, आख्यायिकारूपेण परञ्च आधुनिक-संस्कृसाहित्ये गद्यकाव्यस्य त्रयोदश विविधाः विधाः प्रचलितास्सन्ति। यथा-

कथा, लघुकथा, कथासङ्ग्रहः, हास्यकथा, व्यङ्ग्यकथा, जीवनी, चरितकाव्यम्, आख्यायिका/ऐतिहासिककाव्यम्, उपन्यासः, अनूदितगद्य-काव्यञ्चेत्यादयः।

संस्कृत-छन्दोबद्धरचनायाः (पद्यकाव्यस्य) मुख्यतः षड् भेदाः सन्ति, यथा- महाकाव्यम्, खण्डकाव्यम्, गीतिकाव्यम्, ऐतिहासिककाव्यम्, स्तोत्रकाव्यं मुक्तककाव्यञ्च। परम् आधुनिकपद्यसाहित्ये त्रिंशत् विविधाः विधाः प्रचलितास्सन्ति किञ्च एतासु सर्वास्वपि विधासु सर्जनात्मकचिन्तनं निरन्तरमपि प्रचलदस्ति। एताः विधाः अधोलिखितास्सन्ति-

१. पद्यम् (कविता)
२. खण्डकाव्यम्
३. लघुकाव्यम्
४. पद्यसङ्ग्रहः/कवितासङ्ग्रहः
५. काव्यम् (सामान्यकाव्यम्)
६. काव्यसङ्ग्रहः
७. स्तोत्रकाव्यम्
८. स्तोत्रसङ्ग्रहः
९. लहरीकाव्यम्
१०. शोककाव्यम्
११. रागकाव्यम्
१२. दूतकाव्यम्
१३. चरितकाव्यम्
१४. विलापकाव्यम्
१५. विदेहकाव्यम्
१६. शतककाव्यम्
१७. प्रबंधकाव्यम्
१८. प्रबन्धकाव्येतिहासः/ऐतिहासिककाव्यम्
१९. पत्रकाव्यम्/पत्रसङ्ग्रहः
२०. गीतसङ्ग्रहः
२१. गौरवकाव्यम्
२२. प्रशस्तिकाव्यम्
२३. व्यङ्ग्यकाव्यम्
२४. महाकाव्यम्
२५. अनूदितकाव्यम्
२६. अनूदितकाव्यसङ्ग्रहः
२७. मुक्तकम्
२८. मुक्तकसग्रहः
२९. यात्रावृत्तम्
३०. गीतिकाव्यम्
३१. सङ्कलनम्

एतासां सर्वासां विधानां संक्षिप्ता काव्यसूची प्रदीयते –

१. पद्यकाव्यम्/पद्यसङ्ग्रहः

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. आक्षरी	साधुशरणसिंहाः	१९९८	पटना
२. गीतामृतम्	गिरिधारीलालशास्त्री	१९९९	वाराणसी
३. गीतानन्तरसम्	बटोहीझाः	१९९८	लखनऊ
४. वनतल्ली	रवीन्द्रकुमारपण्डा	१९९६	बड़ौदा
५. उर्वी (प.स.)	रवीन्द्रकुमारपण्डा	१९९९	बड़ौदा
६. उत्कलिका	हरिदत्तशर्मा	१९८९	इलाहाबाद
७. गर्तः	प्रमोदकुमारनायकः	१९९८	पुरी

२. लघुकाव्यम्

क्रसं.रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. अभिनवकाव्यम्	जनमेजयविद्यालंकारः	१९५९	कानपुर
२. कुटुम्बिनी	लक्ष्मणसिंहअग्रवालः	१९८९	हरियाणा
३. फाल्गुनः	वे. राघवः		मद्रास
४. शक्तिसाधनम्	यतीन्द्रविमलचौधुरी	१९६०	कलकत्ता
५. रामचन्द्रनन्दनम्	श्रीरामचन्द्रफुल्लेलः	१९९३	हैदराबाद
६. हरिचरितम्	परमेश्वरभट्टः	१९४८	आड्यार लाइब्रेरी

४. खण्डकाव्यम्

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. अध्यात्मशिवायनम्	श्रीधरभास्करवर्णेकरः	१९४७	नागपुर
२. अश्रुवीणा	मुनिनथमलः	१९५९	राजस्थान
३. कचदेवयानीयम्	सन्निधानं सू.ना.शास्त्री	१९६१	सिकन्दराबाद
४. कालिदासरहस्यम्	श्रीधरभास्करवर्णेकरः		नागपुर धन्तौली
५. गजेन्द्रमोक्ष	गोपीनाथटण्डनः	१९९१	वाराणसी
६. नलिनीचरितम्	ये.एस.सुन्दररेशशर्मा	१९४८	तंजौर
७. प्रतापविजयम्	ईशदत्तशास्त्री	१९३९-72	प्रयाग
८. भूदानयज्ञगाथा	गणपतिशंकरशुक्लः	१९६२	मन्दसौर
९. मन्दाक्रान्तावृत्तम्	कालीपदतर्काचार्यः	१९७१	कलकत्ता
१०. महावीरचरितम्	शिवप्रसादभारद्वाजः		होशियापुर, पंजाब
११. रेडियोदूतम्	पद्मनंदचतुर्वेदी		'सूर्योदय' मासिकपत्रम्

१२. काश्मीरोदयम् (ऐति. खण्डकाव्य)	सूर्यमणिरथः	२०१३	पुरी, उड़ीसा

५. **काव्यम्/सामान्यकाव्यम्**

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. अभिनवमेघदूतम्	वसन्तत्र्यम्बकशेवडे	१९९०	वाराणसी
२. अमृतमन्थनम्	मंगलदेवशास्त्री	१९५६	वाराणसी
३. आम्रपाली	मिथिलाकुमारीमिश्रा	१९८४	पटना
४. इन्द्रविजयं (सं. आद्यादत्त ठाकुर)	मधुसूदनशर्मा मैथिलः	१९३०	लखनऊ
५. उत्कलिका	हरिदत्तशर्मा	१९८९	इलाहाबाद
६. ऋतम्भरा	लक्ष्मणसिंह अग्रवालः	१९९०	बल्लभगड
७. कामिनीकौतुकम्	विघ्नेश्वर शर्मा	१९७३	गोकर्ण
८. कालोऽस्मि	हर्षदेवमाधवः	२०००	अहमदाबाद
९. कुचेलवृत्तम्	मेननदेवकी देवी	१९६१	दिल्ली
१३. भवते रोचते यथा	दिगम्बरमहापात्रः	१९९६	
१०. कृष्णदौत्यम्	गोपालकृष्णभट्टः	अनङ्कितः	उडुपी
११. गान्धिगौरवम्	शुक्लः रमेशचन्द्रः	१९६९	अलीगढ
१२. देशोऽयं कुरुते-	हरिनारायणदीक्षितः	1९९२	दिल्ली
१४. भाति मे भारतम्	रमाकान्तशुक्लः	१९८०	दिल्ली
१५. यशोधरा	शरभाचार्यः	१९७०	गुंटूरू
१६. रवीन्द्रप्रतिभा	दीनेशचन्द्रदत्तः	१९६८	जयपुर
१७. राजेन्द्रप्रसादाभ्युदयम्	श्रीपादकृष्णमूर्तिशास्त्री	१९६०	राजमुण्डरी
१८. वनमाला	वे. कुटुम्बशास्त्री	२०००	तिरुपति
१९. वेलेण्टाइनडेसन्देशः	वनमालीविश्वालः	२०००	इलाहाबाद
२०. श्रीतिलकयशोऽर्णवः	माधवः श्रीहरेअणे	१९७०	पुणे

६. **काव्यसंग्रहः**

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. अग्निजा	व्योमशेखरः	१९८४	विलासपुर
२. आयतिः	राधावल्लभत्रिपाठी	१९७८	सागर
३. आसीच्च मे मनसि	हर्षदेवमाधवः	१९९६	अहमदाबाद
४. आहुतिः स्वातन्त्र्ययज्ञे	रामशंकर अवस्थी	१९९५	कानपुर

५.	ऋतुपर्णा	वनमालीविश्वालः	१९९९	इलाहाबाद
६.	कस्मै देवाय हविषा०	अभिराजराजेन्द्रमिश्रः	१९९७	इलाहाबाद
७.	काकली	जानकीवल्लभशास्त्री	१९३५	गया
८.	त्रिपथगा	रामशंकरअवस्थी	१९९ह	कानपुर
९.	पञ्चगव्यम्	नित्यगोपालकटारे	अनङ्कितः	होशंगाबाद
१०.	प्रमथः	रेवाप्रसादद्विवेदी	१९८८	वाराणसी
११.	भारतवैभवम्	के. एस. नागराजन्	१९७४	बंगलौर
१२.	भावस्थिराणिजननान्तर०	हर्षदेवमाधवः	२०००	अहमदाबाद
१३.	मधुपर्णी	अभिराजराजेन्द्रमिश्रः	२०००	इलाहाबाद
१४.	मरीचिका	राजेन्द्र नानावटी	१९९३	बड़ौदा
१५.	मृगया	हर्षदेवमाधवः	१९९४	अहमदाबाद
१६.	मृद्वीका	राजेन्द्रमिश्रः	१९९५	इलाहाबाद
१७.	रथ्यासु जम्बुवर्णानां०	हर्षदेवमाधवः	१९९३	अहमदाबाद
१८.	रात्रिर्गमिष्यति	रामशंकरअवस्थी	२००३	कानपुर
१९.	वीणा	रामकरणशर्मा	१९९०	दिल्ली
२०.	व्यथा	वनमालीविश्वालः	१९९७	प्रयाग
२१.	शब्दानां निर्मक्षिकेषु०	हर्षदेवमाधवः	१९९३	अहमदाबाद
२२.	शिञ्जारवः	कृष्णलालः	१९६५	दिल्ली
२३.	सर्वशुक्लोत्तरा	डॉ. रमाकान्तशुक्लः	२००८	दिल्ली

७. स्तोत्रकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
1.	पुष्पाञ्जलिः	विष्णुदत्तमिश्रः	१९६६	गया
2.	भक्तिरसार्णवः	करपात्रस्वामी	१९६८	कलकत्ता
3.	रामरसायणम्	लक्ष्मणसिंहअग्रवालः	१९८९	वल्लभगड
4.	वसन्ततिलकम्	रामकिशोरमिश्रः	१९८९	मेरठ
5.	श्रीगजाननप्रार्थनास्तोत्रम्	श्रीधरभास्करवर्णेकरः	१९६२	नागपुर
6.	श्रीपादसप्ततिः	रामकृष्णस्वामिनाथः	१९८३	दिल्ली

८. स्तोत्रसंग्रहः

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	अनुकम्पालहरी	के. आर. सुब्रह्मण्यम्	१९९८	हैदराबाद
२.	रामकृष्णभागवतम्	राजेन्द्रसुन्दरभट्टाचार्यः	१८८८ शक सं.	कलकत्ता

९. लहरीकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	अनुकूललहरी	रवीन्द्रकुमारपण्डा	२०००	
२.	मातृभूलहरी	श्रीधरभास्करवर्णेकरः	१९७२	मद्रास
३.	मीरालहरी	क्षमारावः	१९४४	नि.सा.प्रे. बाम्बे
४.	लहरीदशकम्	राधावल्लभत्रिपाठी	१९६६	सागर
५.	विनोदलहरी	माधवकविः	१९८५	मुम्बई
६.	विरहलहरी	भि. वेलणकरः	१९६७	मुम्बई
७.	विषादलहरी	श्रीभाष्यंविजयसारथिः		वारंगल
८.	ललितालहरी	श्रीरामदेवः	१९९९	जोधपुर
९.	संगीतलहरी	जगदीशचन्द्रप्राणशंकरः	१९८५	जोधपुर

१०. शोककाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	अन्तिमयात्रा	भगवन्तशर्मा	१९६४	दिल्ली
२.	त्वां कथं विस्मरामि	राजेन्द्रभारद्वाजः	१९९८	बरेली
३.	परिदेवनम्	परमानन्दशास्त्री	१९८०	अलीगढ़

११. रागकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	अभिनवरागगोविन्दम्	शिवप्रसादभारद्वाजः	१९७९	होशियापुर
२.	गीतधीवरम्	राधावल्लभत्रिपाठी	१९९६	सागर
३.	ललितगीतालहरी	ओगेटिपरीक्षितशर्मा	१९९८	'शारदा' मासिक

१२. दूतकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	काकसन्देशः	एस. आर. राजगो०	१९४२	मदुरा
२.	कामदूतम्	रामचन्द्रहरि०शाण्डि०	१९८८	उल्लासनगर
३.	गन्धदूतम्	परमानन्दशास्त्री	१९७७	अलीगढ़
४.	तरंगदूतम्	कृपाराम त्रिपाठी	१९८८	बलरामपुर
५.	दूतप्रतिवचनम्	इच्छाराम द्विवेदी	१९८९	दिल्ली
६.	भारतसन्देशः	शिवप्रसादभारद्वाजः	२०१९वि.	होशियारपुर
७.	भ्रमरदूतकाव्यम्	रुद्रन्यायपंचाननः	१९४०	कलकत्ता
८.	मृगाङ्कदूतम्	राजराजेन्द्रमिश्रः	२००३	दिल्ली

१३. चरितकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	शंभुस्मृति	नर्मदाशंकरशास्त्री	१९९९	गुजरात
२.	गाँधीचरितम्	वासुदेवशास्त्री	१९५९	सोलापुर

१४. विलापकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	दुःखनिर्झरः	रघुपतिशास्त्री	१९१३	लश्कर
२.	सुरभारतीक्रन्दनम्	जगदीशप्रसादसेमवालः	१९८७	होशियारपुर

१५. विरहकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	द्वैतकाव्यम्	द्विजेन्द्रलालशर्मा	१९६४	जयपुरम्

१६. शतककाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	ग्रामशतकम्	डॉ. निरञ्जनमिश्रः	२०१३	हरिद्वारम्
२.	अक्कमहादेवीशतकम्	मल्लिकार्जुनपारडी	१९७२	धारवाड
३.	आतंकवादशतकम्	वागीश शास्त्री	१९९२	वाराणसी
४.	आर्यान्योक्तिशतकम्	अभिराजराजेन्द्रमिश्रः	१९८३	इलाहाबाद
५.	इन्दिराकीर्तिशतकम्	श्रीकृष्णसेमवालः	१९७६	दिल्ली
६.	इन्दिरायशस्तिलकम्	रमेशचन्द्रशुक्लः	१९७६	मुजफ्फरनगर
७.	इन्दिराशतकम्	रामाशीष पाण्डे	१९८६	रांची
८.	प्रहेलिकाशतकम्	वैद्यरामस्वरूपशास्त्री	१९६३	बंबई
९.	ब्रह्मचर्यशतकम्	मेधाव्रतकवि	२०१०वि.	दिल्ली
१०.	राष्ट्रदर्पणः	लक्ष्मणसिंहअग्रवालः	१९८२	फरीदाबाद
११.	शतपत्रम्	रेवाप्रसाद द्विवेदी	१९८७	वाराणसी
१२.	शान्तिशतकम्	शीलनमिश्रः	१९५०	शिलौंग
१३.	श्रीगुरूरविदासशतकम्	शिवप्रसादभारद्वाजः	१९८४	देहरादूनम्
१४.	संस्कृतशतकम्	अभिराजराजेन्द्रमिश्रः	१९९९	इलाहाबाद
१५.	सद्बोधशतकम्	पाण्डुरंगः	१९६०	वलामे, नाडियाद
१६.	सुन्दरीशतकम्	गिरिराजकिशोर व्यासः	१९८७	तिरहासोरों, एटा
१७.	देवभूमिग्रामशतकम्	श्रीहेमचन्द्रबेलवालः	२०१४	नवदेहली

१७. प्रबन्धकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	सरस्वत्यष्टकम्	म.म. रामावतारशर्मा	१९५७	दरभंगा

१८. प्रबंधकाव्येतिहासः/ऐतिहासिककाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	कामरूपशासनावली	पद्मनाभभट्टाचार्यः	१९३१	रंगपुरम्
२.	कार्णाटराजतरंगिणी	काशीनाथमिश्रः	१९९४	पटना
३.	लौहपुरुषावदानम्	शिवप्रसादभारद्वाजः	१९९०	देहरादूनम्

१९. पत्रम्/पत्रसंग्रहः

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	कालिदासचरितसुधा	भि. वेलणकर	१९६१	मुंबई
२.	पत्रकाव्यम्	सत्यव्रतशास्त्री	१९९४	दिल्ली

२०. गीतम्/गीतसंग्रहः

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	गरबासंग्रहः	वासुदेवपाठकः	१९८६	अहमदाबाद
२.	गीतमन्दाकिनी	इच्छारामद्विवेदी	१९९२	दिल्ली
३.	गीतकन्दलिका	हरिदत्तशर्मा	१९८३	इलाहाबाद
४.	निर्झरिणी	नलिनी शुक्ला	१९८९	कानपुर
५.	निर्झरिणी	भास्कराचार्य त्रिपाठी	१९९७	दिल्ली
६.	मातृगीताञ्जलिः	हरेकृष्णमेहेरः	१९९७	उड़ीसा
७.	राष्ट्रगीताञ्जलिः	कपिलदेव द्विवेदी	१९७८	वाराणसी

२१. गौरवकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	धारायशोधराः	दिगंबरमहादेवकुलकर्णी	१९८७	सतारा

२२. प्रशस्तिः/प्रशस्तिकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	जगद्गुरुवैभवम्	मधुसूदन ओझा	१९९०	जोधपुर
२.	जनार्दनचरितम्	प्रह्लादनारायणवाजपेयी	१९८९	उदयपुर
३.	धर्मानन्दचरितम्	राजेन्द्रमिश्रः	१९९३	इलाहाबाद
४.	भारतप्रशस्तिः	श्री कुञ्जनराजा	१९५०	आयड्यर लाइब्रेरी

५. युद्धवृद्धसौहार्दम्	ए. गोपाल अयंगरः	१९३७	मद्रास
६. श्रीगोरवेलप्रशस्तिः	श्रीधरपाठकः, प्रगिरिधरशर्मा	१९१५	प्रयागः
८. श्रीमद्गौरीप्रशस्तिः	पी. वासुदेवः	१९५१	त्रिचूर
९. श्रीमद्दिवाकराचार्यच०	केशवरामशर्मा	१९९३	शिमला
१०. श्रीलक्ष्मणप्रशस्तिः	गणेशरामशर्मा	१९४५	डूंगरपुरनगर
११. वीतरङ्गिणी	शशिधरशर्मा	१९६७	होशियारपुर

२३. व्यंग्यकाव्यम्

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. मत्कुणायनम्	शिवप्रसादभारद्वाजः	१९८०	देहरादूनम्
२. लघुवंशम्	वीरभद्रमिश्रः	'सर्वगंधा' मासिकपत्रिकायाम्	
३. हीरोचरितम्	वनेश्वरपाठकः	१९८२	मीठापुर, पटना
४. संस्कृतव्यंग्यविलासः	प्रशस्यमिश्रशास्त्री	१९९०	इलाहाबाद

२४. महाकाव्यम्

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. अपराजिता वधूः	पूर्णचन्द्रशास्त्री	२०००	दिल्ली
२. इन्दिरागाँधीचरितम्	सत्यव्रतशास्त्री	१९७६	दिल्ली
३. उत्तरसीताचरितम्	रेवाप्रसादद्विवेदी	१९९०	वाराणसी
४. ऊर्मिलीयमहाकाव्यम्	नारायणशुक्लः	१९७३	उत्तरप्रदेश
५. कर्णार्जुनीयम्	विन्ध्येश्वरीप्रसाद०	१९८९	वाराणसी
६. झाँसीश्वरीचरितम्	सुबोधचन्द्रपन्तः	१९७९	इलाहाबाद
७. नाचिकेतसम्	कृष्णप्रसादघिमिरे	१९७१	काठमाण्डू
९. बलदेवचरितम्	श्रीनिवासरथः	दूर्वापत्रिकायाम्, बाणगंगा	
१०. भीष्मचरितम्	हरिनारायणदीक्षितः	१९९१	दिल्ली
११. मोहभङ्गम्	रसिकबिहारी जोशी	१९७८	जोधपुर
१२. विश्वमानवीयम्	विद्याधरशास्त्री		बीकानेर
१३. श्रीनेहरूचरितम्	ब्रह्मानंदशुक्लः	१९६९	खुर्जा
१४. जानकीजीवनम्	अभिराजराजेन्द्रमिश्रः	१९८८	इलाहाबाद
१५. वामनावतरण	अभिराजराजेन्द्रमिश्रः	१९९४	इलाहाबाद
१६. गङ्गापुत्रावदानम्	डॉ. निरञ्जनमिश्रः	२०१३	हरिद्वार

२५. अनूदितकाव्यम्/काव्यसग्रहः

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	अग्निजा (का.सं.)	ग.बा. पलसुक्ते	१९५८	पुणे
२.	अस्ताचलीयम्	गोविन्दचन्द्रपाण्डेयः	१९९१	वाराणसी
३.	आंग्लरोमांचम्	हरिहर वि. त्रिवेदी	१९७४	वाराणसी
४.	कविताञ्जलिः	कपालिशास्त्री	१९४६	पांडिचेरी
५.	कवितावली (तुलसीदासकृतकवितावल्याः अनुवादः)	प्रेमनारायणद्विवेदी	२०००	दिल्ली
६.	केशवीयम् (मलयालमतः अनूदितं महाकाव्यम्)	नारायणपिषारोटी	अनङ्कितः	तृशूर
७.	कामायनी (जयशंकरप्रसादरचित 'कामायनी' रचनायाः अनुवादः)	भगवान् दत्त शास्त्री	१९६०	कलकत्ता
८.	गिरिगीता (Serman on the mountain इत्यस्य अनुवादः)	के.पी. उर्मीस	अनङ्कितः	तिरुवनन्तपुरम्
९.	गीताञ्जलिः (रवीन्द्रनाथटैगोरमहोदयस्य 25 कवितानां संस्कृते अनुवादः)	अमरेन्द्रमोहनतर्कतीर्थः	१९३०	कलकत्ता
१०.	गीर्वाणज्ञानेश्वरी (द्वि. भाग) (मराठी ज्ञानेश्वरी इत्यस्य अनुवादः)	अनन्तविष्णुश्वासनीस	१९३१	बाम्बे
११.	चिन्तनाश्च चिदुन्मेषाः (श्री अरविन्दस्य Thoughts & glimpses इत्यस्य अनुवादः)	श्री अरविन्दाश्रमः	१९६९	पांडिचेरी
१२.	तमिलकम्बरामायणम्	आद्याचरण झा	१९९६	पटना
१३.	पञ्चवटी (मैथिलीशरणगुप्तस्य हिन्दीकाव्यानुवादः)	राधावल्लभत्रिपाठी	१९९८	सागर
१४.	नेहरूचरितमहाकाव्यम्	अमीरचन्दशास्त्री		नई दिल्ली
१५.	मनोबोधः (रामदासस्य 'मनाचेश्लोक' इत्यस्यानुवादः)	रामदासानुदासः	१९७६	पूना
१६.	राष्ट्रस्मृतिः	रामरायमोहनराय मुंशी	२००७वि.	अहमदाबाद
१७.	विष्णुचित्तीयम् (आंध्रकाव्यानुवादः)	कुंटिमट्टिशेषशर्मा	१९८९	वेल्लूर
१८.	श्रीमान् विंस्टनचर्चिलः	वासुदेवशास्त्री	१९६४	पुणे

१९. श्रीवेंकटेश्वरवचन०	सन्निधानं सू.ना.शा.	१९७१	
२०. शतकसप्तकम् (तेलगूतः अनूदितम्)	ति.गु. वरदाचार्यः	१९६३	हैदराबाद
२१. रामचरितमानसः (महाकाव्यानुवादः)	जनार्दनगंगाधररयटे	१९८१	लखनऊ

२६. मुक्तकम्/मुक्तकसग्रहः

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. इन्द्रधनुः	ओमप्रकाश ठाकुरः	१९९३	दिल्ली
२. कण्टकाञ्जलिः (व्यंग्यप्रधानमुक्तकम्)	कण्टकार्जुनः	१९६८	पूना
३. क्व गच्छामि	अन्नदाचरणः	१८२०	संस्कृतचन्द्रिका'
४. विनोदिनी	रुद्रदेवत्रिपाठी	१९६७	मन्दसौर
५. तरङ्गलेखा	शिवप्रसादभारद्वाजः	१९८१	देहरादून
६. मन्दाकिनी	श्रीभाष्यविजयसारथिः	१९८०	वारंगल
७. हासविलासः	प्रशस्यमित्रशास्त्री	१९८६	कानपुर

२७. यात्रावृत्तम् (पद्यम्)

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. उत्तराखण्डयात्रा	शिवप्रसादभट्टाचार्यः	१८७०	कलकत्ता
२. पारिजातमंजरी (कश्मीरी भाषातः अनूदितम्)	जगन्नाथशास्त्री		श्रीनगर
३. विचित्रपरिषद्यात्रा	क्षमाराव:	१९८३	बंबई

२८. गीतिकाव्यम्/गीतिसंग्रहः

क्रसं. रचना	रचयिता	प्र.वर्षम्	स्थानम्
१. गाँधीगीता	श्रीनिवासताडपत्रीकरः	१९४८	पूना
२. गेयगैर्वाणी	वरदराजः		चित्तूर
३. परिदेवनम्	परमानन्दशास्त्री	१९८०	अलीगढ़
४. राष्ट्रवाणी	रामनाथपाठकः	१९५१	आरा
५. रासकेली	श्रीभाष्यविजयसारथिः	१९९१	करीमनगर
६. मातृगीताञ्जलिः	हरेकृष्णमेहेरः	१९९७	उड़ीसा

२९. संकलनम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	आधुनिकसंस्कृत०	वनमालाभवालकरः	१९६९	इलाहाबाद
२.	आधुनिकसंस्कृतकाव्य०		१९९६	लखनऊ वि.वि.

३०. नीतिकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	सन्तोषकल्पतरुः	परमानंदशास्त्री		अलीगढ़
२.	नीतिविधिविमर्शः	हरिहरनाथत्रिपाठी	१९८०	

३१. श्लिष्टकाव्यम्

क्रसं.	रचना	रचयिता	प्र.वर्षम्	स्थानम्
१.	सर्वमङ्गलोदयम्	म.म.पञ्चाननतर्करत्नम्	१८६०श.	वाराणसी

काश्चन प्राचीनाः, आधुनिकाः कवयित्र्योऽपि सन्ति यासां रचना उपलब्धाः तास्तावत् -

क्रसं.	रचना	रचयित्री	प्र.वर्षम्
१.	विजयांकारचितानि स्फुटपद्यानि		८५० ई.
२.	मथुराविजयम्	गङ्गादेवी	१३८० ई.
३.	अभिनवरमाभ्युदयम्	अभिरामकामाक्षी	१४२५ ई.
४.	रघुनाथाभ्युदयम्	रामभद्राम्बा	१५९०
५.	रामकथा	मधुरवाणी	१५९०
६.	सत्याग्रहगीता	पण्डिताक्षमाराव	१९४० ई.

एताः विहाय सुभद्रा, फल्गुहस्तिनी, मोरिका, इन्दुलेखा, मारुला, विकटनितम्बा, शीलाभट्टारिका, देवकुमारिका, तिरुमलाम्बासदृशीनां कवयित्रीणां स्फुटपद्यानि प्राप्यन्ते।

२.२ सर्वशुक्लोत्तरायाः विषयवस्तु

कविवररमाकान्तशुक्लेन विरचिता 'सर्वशुक्लोत्तरा' आधुनिकः ग्रन्थः विद्यते। अस्मिन् ग्रन्थे काव्यसङ्कलने वा विविधाः विषयास्सङ्कलिताः सन्ति। कविमूर्धन्येन, शुक्लमहोदयेन मङ्गलाचरणे वाण्याः स्तुतिः 'वाणीं वयं वन्दामहे' इति शीर्षकेण कृता वर्तते। इयं वाणी तावत्-ध्वन्यौचितीवक्रोक्तिदा, वागात्मिका, नादात्मिका छन्दोमयी, ज्योतिर्मयी लोकावलम्बनरूपिणी च दरीदृश्यते।

विद्वद्वरेण्येन सर्वशुक्लोत्तरायां सुरभारत्याः संस्कृतस्य जयगानमपि सुसम्पादितम्। इयं सुरभारती ललिता, अमृता, चित्तं विकाशयन्ती, नित्या सर्वशुक्ला च विजयते। अस्मिन्नेव क्रमे वेदवाणीं नुमः इति शीर्षकत्वेन वेदवाण्याः स्तुतिरपि कृताऽस्ति।

अस्मिन् सङ्कलने अष्टषष्टिः रचनाः सङ्कलितास्सन्ति। अत्र काश्चन रचनाः भक्तिपरकाः, काश्चन विविधस्थानवैशिष्ट्यपरकाः, काश्चन राष्ट्रियभावनापरकाः, काश्चन व्यङ्ग्यपरकाः, काश्चन जीवनदर्शनचिन्तनपरकाः काश्चन शुभकामनापरकाः, काश्चन सत्पुरुषवर्णनपरकाः, सांस्कृतिक-वैशिष्ट्यपरकाः काश्चन पर्वसम्बन्धिन्यो रचनाः सन्ति।

आध्यात्मिकं वर्णनम् – सर्वशुक्लोत्तरायाः प्रारम्भ एव विद्या-वैभवप्रदात्र्याः वाण्याः वन्दनया विद्यते।

कुन्देन्दुहिमधवलां धवलवस्त्रावृतां हंसस्थितां,
अक्षय्यविद्याविभवदां वाणीं वयं वन्दामहे[१]॥

अनया रचनया कविवरशुक्लस्य आध्यात्मिकज्ञानस्य परिज्ञानं भवति सहैव कविवरस्य आध्यात्मिकरचनासंसारेण सहृदयपाठकाः परिचिताः भवन्ति तथा च आत्मानमपि सुरभारत्याः चरणयोः समर्प्य सरस्वत्युपासनायै अर्थात् स्वाध्यायकर्मणि संलग्नं कुर्वन्ति। मातुः सरस्वत्याः यः परिचयः कविना प्रदत्तः स तु अतीव रोचकः अस्ति–

यास्ते परा पश्यन्तिका या मध्यमा या वैखरी,
सृष्टिस्थितिप्रलयेश्वरी सुयशस्करी मंगलकरी।
तमसो जनान् ज्योतिर्नयति या, तां विधातुर्गेहिनीं,
शुक्लां सुमतिदां मातरं वाणीं वयं वन्दामहे[२]॥

सर्वशुक्लोत्तरायां भक्तिपरकरचनासु वाणीं वयं वन्दामहे, सुरभारती विजयते, वेदवाणीं नुमः, धन्वन्तरिं तमीडे, महाकालमालिका, श्रीवरदेश्वराष्टकं कविताः प्रमुखाः सन्ति।

ललितभावधात्र्याः सुरभारत्याः वन्दनेन कविः भक्तिरसे निमज्जितः दृश्यते। वेदवाणीवन्दनेन कविना वेदवाण्याः भावना अपि प्रकटिता? तद्यथा–

नैव पश्येदभद्रं नरश्चक्षुषा
नैव चाकर्णयेद्वाप्यभद्रं क्वचित्।
भावनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः[३]॥

सर्वेषाम् आरोग्यकामनया कविना धन्वन्तरेः अर्चनाऽपि सर्वशुक्लोत्तरायां कृता। 'महाकालमालिका' नामरचनायाम् उज्जयिनीस्थ-देवाधिदेवमहाकालस्य सम्पूर्णस्तोत्ररचनया पूजनं विहितमस्ति। इयं रचना २००६ तमे वर्षे सपरिष्कारं रचिताऽस्ति। संस्कृतस्य कृते समर्पितजीवनोऽयं कविः स्वकवितासु वाण्याः वैभवं समधिकतरं कर्तुमुद्यतो दृश्यते।

महापुरुषसम्बद्धं चिन्तनम् - कविवरआचार्यरमाकान्तशुक्लः स्वकीये काव्यसङ्ग्रहे महापुरुषाणां गुणगानमपि प्रमुखं मनुते। यत्र-तत्र रचितासु कवितासु कविः क्वचित् श्रीलालबहादुरशास्त्रिणं स्मरति कदाचित् नेहरुं स्मरति, कदाचित् सुभाषं, क्वचित् कालिदासं स्मरति, कुत्रचित् राजर्षि-पुरुषोत्तमदासटण्डनं स्मरति। अधोलिखिताः कविताः तत्तत्स्मारिकाः इव सन्ति

- नमः शास्त्रिणे वीरधुर्याय तस्मै।
- नेहरुं तं नमामो वयं सादरम्।
- तं सुभाषं स्मरामो वयं सादरम्।
- तस्य स्मृतिर्विजयते पुरुषोत्तमस्य।
- स्मरामि ब्रह्मचारिणम्।
- राजतां कालिदासः।

संस्कृतकविषु विशेषतः कालिदासे अयं कविः नितरां स्निह्यति। येषां महापुरुषाणां कृपया वयमद्य स्वतन्त्राः स्मः तान् स्वसंग्रहे जीवनवृत्तवर्णनपूर्वकं वर्णयित्वा कविना काचित् विशिष्टा देशभक्तिरपि प्रदर्शिताऽस्ति। देशभक्तं सुभाषं स्मरन् कविः लिखति-

यस्य चात्यन्तमोजःप्रदैर्भाषणैः
पारतन्त्र्यार्दिता भारतीया जनाः।
कर्तुमैच्छन् स्वदेशं स्वतन्त्रं द्रुतं
तं सुभाषं स्मरामो वयं सादरम्[४]॥

राजर्षिपुरुषोत्तमदासस्तु कश्चन विलक्षण एव महापुरुषः, समाजसेवकः, भाषाविद्, महान् राजनीतिज्ञ आसीत्। स्वतन्त्रतासंग्रामे बहुषु पर्यायेषु अयं कारागारेऽपि निबद्धः। वस्तुतः राजर्षिः स्थितप्रज्ञः, तमेव स्मरन् कविः वदति-

तत्याज यो हि पदवीं विधिमन्त्रिसंज्ञां
कांग्रेससंज्ञकदलस्य च मुख्यतां वा।
तत्याज किन्तु न हि यो निजराष्ट्रभाषां
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य[५]**॥**

हरियाणाराज्ये जींदजनपदे लब्धजन्मनः ब्रह्मचारिणः गुणगानमपि कविः सर्वशुक्लोत्तरायाम् इत्थं करोति-

योऽसावाजीवनं तप्त्वा तपो ब्रह्मण्यलीयत।
तं देवेन्द्रस्वरूपाख्यं स्मरामि ब्रह्मचारिणम्[६]**॥**

वस्तुतः कविना महापुरुषाणां कार्याणां समुद्घाटनेन समाजे कश्चन सन्देशः दत्तः, तद्यथा - 'महापुरुषाः स्वकर्मभिः यथा ख्यातिं लब्धवन्तः तथैव सामान्यपुरुषोऽपि तेषां कर्माण्यनुसरन् स्वस्थसमाजनिर्माणाय स्वयोगदानं दद्यात्'। इति।

जीवनदर्शनपरकरचनाः - कविवररमाकान्तशुक्लस्य जीवनदर्शनचिन्तनपरकरचना अधोलिखितास्सन्ति।

- किं जीवनं ते।
- आशा।
- मदीय कविते! कुरुष्व गानम्।
- विलसितं नियतं नियतेरिदम्।

'आशा' इति कवितायां कवेः आशावादित्वं स्फुटति, न केवलं कविः स्वकीयाम् आशावादितां प्रकटयति अपितु समाजेनापि आशावादिना भाव्यमिति तस्य कवितासु ज्ञायते। तद्यथा-

अहमस्म्याशावादी सास्ते मे प्रेरणादात्री।
नैवापयातु सा मे हृदयात्संजीवनी शक्तिः[७]**॥**

कविः स्वकवितायां छात्रान्, कृषकान्, रुग्णान्, विरहिणीः, आबालवृद्धान् च आशायाः पाठं पाठयन् दृश्यते-

विफलीभूतैश्छात्रैः कदापि हेयाऽस्ति नैवाशा।
आगामिनी परीक्षा तेभ्यो दास्यति समधिकाङ्कान्[८]॥

'आशा' भर्तृहरेः कथनानुसारं 'नदी' वर्तते अस्याः नद्याः पारं न कोऽपि गन्तुं पारयति सरलतया, यदि कश्चित् पारयति चेत् स तु महायोगीति। इयमाशा धन्वनि मधुरं पिपासाहरं च जलं भवति, महासमुद्रे च इयं पतितस्य कृते पोतः भवति। मम प्रेयानायास्यति इत्याशया विरहिणी अखिलां नीरसरजनीं नयति।

'किं जीवनं ते' इत्यत्र विद्वान् कविः मानवं, तस्य मानवतां स्मारयति सत्कार्याय प्रेरयति तस्यागमनप्रयोजनञ्च वदति। तद्यथा-

न दाक्षिण्यं, न सौशील्यं, न कीर्तिः।
न सेवा, नो दया, किं जीवनं ते?॥[९]

हे मानव! त्वयि गते आगते चापि न कश्चित् प्रभावितो जायते, त्वं क्षणे रुष्टः, क्षणे च तुष्टः जायसे। अहो चलचित्त! किं जीवनं ते? किमपि तव जीवनं नास्ति। इदं निस्सारजीवनं किमर्थं त्वं जीवसि? जीवने काचित् सार्थकता आनेया, किञ्चिदुद्देश्यं न ते, तव मुखे तु मधु मनसि कालकूटः वर्तते, तव जीवनं निस्सारमेव। अस्यां कवितायां कविः मानवं रञ्जयति, सद्कर्मणि च तस्य मानसं स्थापयति। कवितापठनेन पाठकस्य रोमराशिरुत्थितो जायते, काचित् स्फूर्तिश्च जागर्ति।

व्यङ्ग्यपरकरचनाः - आचार्यरमाकान्तशुक्लेन स्वकाव्य-संग्रहेऽस्मिन् सामाजिकदुष्कर्मणां निन्दा कृता। अयं सहजभावेन व्यङ्ग्यात्मक-शैल्या च तानि दुष्कर्माणि निन्दति। अस्माकं राजनीतौ अद्य दुष्कर्मप्रकृतिकाः जनाः देशं लुण्ठन्तः सन्ति समाजञ्च मलिनं विदधति। कवेः व्यङ्ग्य क्वचित् अत्यन्ततिरस्कृतवाच्यध्वनौ समायाति क्वचिच्च अर्थान्तरसङ्क्रमिते।

भारते स्वतन्त्रताप्राप्त्यनन्तरमेव वञ्चनानि अगणितानि जातानि, शासनासन्दिकायाम् उपविष्टाः जनाः कोट्यर्बुदानां वञ्चनं कुर्वन्तः सन्ति-

लक्षकोट्यर्बुदानामहो वञ्चनं
शान्तभावेन यां प्राप्य कर्तुं क्षमम्।
यां श्रितैश्छन्ददात्री प्रजा पीड्यते
वन्द्यतां काऽपि सा शासनासन्दिका।[१०]

सर्वशुक्लोत्तरायां व्यङ्ग्यपरकरचनासु - वन्दनीयास्ते, वन्द्यतां काऽपि सा शासनासन्दिका, लोकतंत्रेऽस्मिन्, योऽयं कृतः शपथस्त्वया, किं कुर्यात्, निर्वाचने प्राप्ते, अभिनवहितोपदेशः प्रमुखास्सन्ति।

वन्दनीयास्ते इत्यस्मिन् काव्ये कविवरः भारतस्य अद्यतनीं दशां दृष्ट्वा चिन्तानिमग्नो दृश्यते। तन्मुखात् कुत्रचित् रोगिणां, बलात्कारिणां लुण्ठकानां च कृते सहसैव व्यङ्ग्यात्मिका वाणी स्फुरति। अद्यत्वे ये समाजस्य हितचिन्तकाः त एव परोक्षापरोक्षरूपेण हिंसामुत्पादयन्ति-

अहिंसाचत्वरे हिंसा, सहिष्णुत्वाजिरे द्वेषः।
क्वचित् गृहयुद्धघोषः, किं दशेयं वन्दनीयास्ते?॥[११]

अद्यतनीयभ्रष्टाचारोऽपि समापनीय एवेति धिया कविः "अभिनव-हितोपदेशे" भणति यत् ये जना अद्यत्वे सत्कर्मसु लीनाः ते सुवर्णपुष्पां पृथिवीं जेतुं न पारयन्ति इत्ययं व्यङ्ग्यः - तद्यथा-

सुवर्णपुष्पां पृथिवीं जयन्ति ये
न तेष्विदानीं कृतविद्य इष्यते।
यशोऽधिगन्तुं सुखलिप्सया वा
न सौम्य ते सन्ति गुणाः क्षमा मनाक्॥[१२]

कवेः व्यङ्ग्यात्मिकेयं वाणी लक्ष्यभेदिका वर्तते, अद्यतनस्थितेः साक्षात्कारोऽपि कविना स्वकाव्ये कृतः। कवितामाध्यमेन कुरीतीनां शमनं वाञ्छति कविः, इयं स्थितिस्तु सामान्यान् जनान् पोषयति धनसम्पन्नान् च प्रबलान् करोति।

राष्ट्रियचिन्तनम् - कविवरशुक्लः राष्ट्रियतायाः उद्घोषकः गीतकारः वर्तते। तस्य रचनाः श्रोतृषु राष्ट्रप्रेम्णः सञ्चारं करोति। श्रोतृवर्गः राष्ट्रियभावनया स्फुरितस्तिष्ठति। स्फुरणमेतदेव राष्ट्रं देवीपदं प्रापयति। राष्ट्रियचिन्तनपरकरचनासु डॉ. शुक्लः आराधकः राष्ट्रं च तदाराध्यं वर्तते। सर्वशुक्लोत्तरायां-अहं स्वतन्त्रता भणामि, रौति ते भारतम्, भारतजनताऽहम्, एकं सद् बहुधा विलोक्यते भारतम्, ब्रूहि जगनाथस्वामिन्, स्वतंत्रतायाः स्वर्णजयन्ती, भारतस्य विजयोऽयम्, प्रणम्याः कारगिलवीराः, भारतस्य जनता समीक्षते, स्वतंत्रदेशः सुतरां विभाति शीर्षकान्विताः रचनाः राष्ट्रिय-भावनापरकरचनास्सन्ति याः प्रतिपदं श्रोतृसमूहे राष्ट्रसम्मानं जनयन्ति।

कविवररमाकान्तशुक्लः प्रखरवक्ता, कुशलसम्पादकः, सुप्रबन्धकः संगीतपारङ्गतश्च विद्यते। कविवररचितानि राष्ट्रियभावनापरकाणि काव्यानि कं नोद्वेलयन्ति? भारतीयजनास्तु अभिमानधनाः, विनयोपेताः, कठिनाः कुलिशादपि, सुकुमाराः च पुष्पादपि, एतादृशं स्वाभिमानं यस्य रचनासु स्यात् सः तु राष्ट्रकविः। "भारतस्य विजयोऽयं" इति काव्यसंग्रहे सोऽतीव गर्वेण भारतस्य महिमानं वर्णयति यत् १९७१ तमे वर्षे भारतपाकयुद्धे नवतिसहस्रसंख्यकानां सैन्यानां बन्दीकरणम् (विपक्षिसैनिकानां बन्दीकरणमेव) एव भारतस्य विजयः। तद्यथा-

एकसप्ततौ दिसम्बरे किल नवतिसहस्रं पाकाः।
बद्धाः निरागसां हन्तारो भारतस्य विजयोऽयम्॥[१३]

वस्तुतस्तु राष्ट्रं देवतुल्यम्, तदेव कविः देवस्य समर्चनं कर्तुम् उद्यतः दरीदृश्यते। परमुग्रता-विहिंसन-प्रवञ्चन-बलात्कारान् श्रुत्वा कथं ते पूजनं करोमि इत्येव वदति।

ब्रूहि राष्ट्रदेवते कथं नु पूजनं करोमि ते
उग्रताविहिंसनोत्थचीत्कृतीः शृणोमि चेत्।
राष्ट्रदेवते! कथं नु कीर्तनं करोमि ते॥[१४]

यदा कविः देशे जायमानं प्रवञ्चनम्, चौरकार्यम्, स्वार्थम्, बलात्कारादिकुकृत्यानि च पश्यति तदा सः दुःखितो भवति-

यदा-यदा शृणोम्यहं वधूविदाहपातकम्
यदा-यदा शृणोम्यहं बलात्कृतिं विहंसनम्
तदा-तदा भवाम्यरुन्तुदव्यथा प्रपीडिता
इयं व्यथा प्रणाशमेतु येन, तद्विधीयताम्॥[१५]

अयं कृतज्ञदेशभक्तकविः अस्माकं गौरवचिह्नानां कारगिलवीराणां वन्दनां न कदापि विस्मरति-

मई षड्विंशदिवसादैषमो मासद्वयं यावत्।
अघोषित-पाक-रण-जयिनोऽभिनन्द्याः कारगिलवीराः॥[१६]

"भारतस्य जनता-समीक्षते" इति काव्यसंग्रहेऽस्मिन् अयं राष्ट्रवीरः कथयति यत् यः कोऽपि राष्ट्रस्य हिताहिते संलग्नः तं भारतस्य जनता समीक्षते, अस्माकं भारतं सुखसमृद्धियुक्तं स्यात्, सुदृढं सुरक्षितं च भवेत्

इत्येव देशस्य जनता वाञ्छति-

राष्ट्रमस्तु सुखशान्तिपूरितं राष्ट्रमस्तु सुदृढं सुरक्षितम्।
राष्ट्रमस्तु सुयशःसमृद्धिमत् भारतस्य जनता समीहते॥[१७]

कस्यचन देशस्य विकासाय कानि-कानि कार्याणि आवश्यकानि केषां साहाय्येन तत् राष्ट्रं सुशोभितं भवति। इत्येतत्- "स्वतंत्रदेशो नितरां विधाति" इति कवितायां दृग्गोचरं भवति। तद्यथा-

सुनेतृभिः कर्मकरैः कृषाणैः सुसैनिकैर्नित्यमतन्द्रितैश्च।
सुशिक्षयोद्योगगृहैर्बुधैश्च स्वतंत्रदेशः सुतरां विभाति॥[१८]

कस्यचिदपि कुटुम्बस्य निर्माणे युगलमावश्यकम्, कुटुम्बेन ग्रामस्य निर्माणं भवति, सुग्रामेण राज्यनिर्माणं, राज्यानां सम्मेलनेन च कस्यचन राष्ट्रस्य निर्माणं भवति। यदि अस्माभिस्सर्वैरपि सम्भूय अस्मिन् महायज्ञे एकापि आहुतिः प्रदत्ता चेत् सुराष्ट्रनिर्माणं नूनमेव भविष्यति। इत्येवाशयो महाकवेः शुक्लमहोदयस्यापि वर्तते। तद्यथा-

लोलुपा नायका नैव सन्त्वत्र भोः
सन्तु कर्त्तव्यशून्या न चापि प्रजाः।
देशसेवां मिलित्वा कुरुध्वं समे
येन भूयोऽपि भासेत नो भारतम्॥[१९]

परमराष्ट्रभक्तस्य कविवररमाकान्तशुक्लस्य नैकाः रचनाः वर्तन्ते यत्र राष्ट्रभावनाया अभिव्यक्तिः विद्यते। "भाति मे भारतम्" तु सम्पूर्णमपि तादृशमेव काव्यम्। शुक्लमहोदयस्य "सर्वशुक्लोत्तरा" काव्यसंग्रहे राष्ट्रियभावनासम्बन्धिन्यः कविताः सहृदयपाठकानां मनांसि अनुरञ्जयन्ति। एतेषु काव्येषु आकाश्मीरात् कन्याकुमारीं यावत् सम्पूर्णस्यापि भारतदेशस्य वर्णनं समुपलभ्यते। कविवरेण विद्वन्मूर्धन्येन राष्ट्रस्य विकासाय ये केऽपि आवश्यकभूताः प्रस्तावाः ते सर्वेऽपि स्व कवितामाध्यमेन प्रस्तुताः।

२.३ सर्वशुक्लोत्तरायाः वैशिष्ट्यम्

सर्वशुक्लोत्तरा काव्यसङ्ग्रहः कवेः रचनासंसारस्य परिचयं कारयन् तादृशः कवितासमूहो वर्तते यस्यां तावत् कविः विविधविषयप्रतिपादनेन पाठकहृदि सुतरां आदरं बिभर्त्ति। कवितास्तु सामाजिकवैविध्यं प्रतिपादयन्त्येव,

परं छन्दोलङ्कारध्वन्यादिकाव्यशास्त्रीयदृष्ट्याऽपि इदं काव्यसङ्कलनं स्वकीयं वैशिष्ट्यं प्रतिपादयति। कौस्तुभपुरस्कारेण सम्मानितः अयं कवितासमूहः न केवलं कवेः सामाजिकं चिन्तनं प्रदर्शयति अपितु राजनीतिक-राष्ट्रिय-प्राकृतिक-दार्शनिकभावनाः अपि प्रदर्शयति।

सर्वशुक्लोत्तरायाः राष्ट्रियं वैशिष्ट्यम् - सर्वशुक्लोत्तरायां राष्ट्रियभावनासन्निबद्धाः विविधाः रचनाः अस्याः राष्ट्रियवैशिष्ट्यं निर्धारयन्ति। काव्यसङ्कलनेऽस्मिन् अहं स्वतंत्रता भणामि, रौति ते भारतं, भारतजनताहम्, एकं सद् बहुधा विलोक्यते भारतम्, ब्रूहि जगन्नाथस्वामिन्, स्वतंत्रतायाः स्वर्णजयन्ती, भारतस्य विजयोऽयम्, प्रणम्याः कारगिलवीराः, भारतस्य जनता समीक्षते, सदृश्यः कविताः अस्य राष्ट्रियं महत्त्वं सम्पादयन्ति, सङ्कलने कविः राष्ट्रियभावनासम्बद्धान् विविधविषयान् प्रस्तौति। क्वचित् कविः स्वतंत्रतामाध्यमेन नागरिकान् प्रेरयति, क्वचित् राष्ट्रस्य दुर्दशां प्रस्तौति, क्वचित् भारतस्य स्वाभिमानं कर्मनिष्ठाञ्च प्रदर्शयति, क्वचित् कारगिलयुद्धस्य वीरान् प्रणम्य तेषां शौर्यं प्रदर्शयति, क्वचिच्च भारतीयानामुन्नतिं समुपवर्णयति।

'रौति ते भारतम्' इति कविताशीर्षकान्वितेनविचारेण, कविः वर्तमानकालिकीं पैशाचवृत्तिं वर्णयति -

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि पश्यत् पठत्।
किञ्च हत्यापहारादि-गाथा वहत्
रौति ते भारतं रौति ते भारतम्।[२०]

कविः-कारगिलयुद्धे अदम्यशौर्यप्रदर्शनेन विजयप्रदातॄणां वीराणां कृतज्ञताज्ञापनं प्रणामाञ्जलिना करोति -

रणे क्षतविक्षताङ्गा अप्यदम्योत्साहपरिपूर्णाः।
जिगीषापूरितात्मानः प्रचण्डाः कारगिलवीराः॥[२१]

सर्वशुक्लोत्तरायां राष्ट्रियभावनापरकरचनाः पाठकसम्मानिताः वर्तन्ते सर्वशुक्लोत्तरायाः इदमेव प्रप्रथमं वैशिष्ट्यं वर्तते।

सामाजिकं वैशिष्ट्यम् - काव्यसङ्ग्रहेऽस्मिन् कविशुक्लेन समाजस्य याथातथ्यं वर्णनं सम्पादितम्। कवेः लेखनी विविधान् सामाजिकान्

विषयान् स्वकीय-रचनायाः आमुखं मनुते। कवेः रचनासु क्वचित् धार्मिकोन्मादः, क्वचित् अपवञ्चना, क्वचिदुत्कोचः, क्वचित् बलात्कारिणां निन्द्यपैशाचकृत्यानि, क्वचित् वधूविदाहतापादि दुर्घटनाः दृग्गोचरीक्रियन्ते तद्यथा –

देशे निरागसां संहारं लुण्ठनं सतां च वधूदाहान्।
श्रावं श्रावं दर्शं दर्शं व्यथमाना भारतजनताहम्।।[२२]

देशेऽस्मिन् विविधाः वर्णपरम्परा विविधाः जातयः, तथापि अत्रत्या अखण्डता तु विश्वप्रथिता एव। एकं सद् बहुधा विलोक्यते भारतम् इति शीर्षकान्वितेन काव्येन भारतस्य इयमेव स्थितिः दर्शिताऽस्ति –

भिन्नमस्तु भाषाभूषासु पदे-पदे
भिन्नमस्तु लोकाचारेषु पदे-पदे।
भिन्नमस्तु पूजापद्धतिषु पदे-पदे
आत्मन्येकमभिन्नमस्ति मे भारतम्।।[२३]

अत्रत्यः समाजः अभिन्नं वर्तते। अयं भारतीयसमाजः कोटि-कोटि-जनचेतनायां, नित्यनवीनोत्सवपर्वावलिषु, विश्वबन्धुतायाम्, जिजीविषायां नितरां विराजते, एतादृशः भारतीयसमाजः जगतो हृदयं जयति।

एवं क्रमेण समाजस्य सर्वेषामपि घटकानां वर्णनं कविना यत्र तत्र कृतम्, येन रचनायाः वैशिष्ट्यं वर्धमानं वर्तते।

आध्यात्मिकं महत्त्वम् – कविना अस्मिन् काव्यसङ्ग्रहे विविधाः अध्यात्मपरकरचनाः सङ्गृहीताः येन कवेः भक्तिभावनायाः ज्ञानमपि पाठकेषु भवति, सङ्ग्रहेऽस्मिन् वाणीं वयं वन्दामहे, सुरभारती विजयते, वेदवाणीं नुमः, धन्वन्तरिं तमीडे, महाकालमालिका, श्रीवरदेश्वराष्टकम् सदृश्यः रचना आध्यात्मिकं महत्त्वं विदधति। देव्याः सरस्वत्याः वन्दनया एव अस्य प्रारम्भो जायते –

कुन्देन्दुहिमधवलां धवलवस्त्रावृतां हंसस्थितां
वरकच्छपीझङ्कृतिपरां ब्रह्मेशनारायणनुताम्।
मालाधरां पुस्तकधरां, निःशेषजाड्यविलोकिनीम्
अक्षय्यविद्याविभवदां वाणीं वयं वन्दामहे।।[२४]

कविः सर्वेषां मङ्गलकामनायै धन्वन्तरिम् ईडते, कवेः इयं भावना "सर्वेऽपि सुखिनः स्युः", सर्वशुक्लोत्तरायाः महत्त्वं कोटिपरिमितं वर्धयति। तद्यथा-

सर्वे भवन्तु सुखिनः, सर्वे निरामयाः स्युः।

इयमस्ति यस्य काङ्क्षा धन्वन्तरिं तमीडे।।[२५]

कवेः आध्यात्मिकः संसारः विस्तृतः वर्तते। कविः आध्यात्मिक-चिन्तनेऽपि जनमानसस्य मङ्गलकामनाम् एव करोति।

कविवरस्य रचनासु भारतीयवीराणां चित्रणं सर्वदैव सहृदयान् आह्लादयति, कविना क्वचित् भारतीयकारगिल-युद्धरतानां वीरताप्रदर्शनस्य वर्णना कृता, क्वचित् वीरपुरुषस्य सुभाषस्य वीरोन्मादः प्रदर्शितः। आजादहिन्द नाम्ना बलं योजयित्वा यः भारतीययुवकान् प्रेरणान्वितान् कृतवान् सः सुभाषः सदा स्मर्यते -

येन आजाद हिन्देति नाम्ना बलं
योजयित्वाद्भुतं कर्म सम्पादितम्।
वीरचेतोमयूराम्बुदं हर्षदं
तं सुभाषं स्मरामो वयं सादरम्।।[२६]

कवेः वाणी क्वचित् वीरधुर्यं प्रणम्य, क्वचिद् नेहरुं नत्वा कृतज्ञताम् अर्पयति। काव्यसङ्ग्रहस्य एतदपि वैशिष्ट्यं यत् कविः आबालवृद्धान्, पूर्वजान्, महात्मनः, वीरान्, कवीन् च संस्मृत्य धन्यमात्मानं मनुते।

सर्वशुक्लोत्तरायां विविध-देश-प्रदेशदर्शनमपि कविना स्वलेखन्या कारितम्। न केवलं भारतस्य दर्शनीयस्थलानामपितु वैदेशिकस्थलानां वर्णनमपि कविना विशिष्टतया सम्पादितम्, एडिनबरा-नगरस्य बहूनि दृश्यानि कविना एकस्यां कवितायां गुम्फितानि। एकं दृश्यं तावत् -

दृश्यानि-युवतीनां-याः स्वदेहयष्ट्यास्तनूकरणार्थं धावनं कुर्वन्ति, तरूणां ये वायुना स्पृष्टाः सानन्दमान्दोल्यन्ते[२७]

उज्जयिन्याः लोकातिशयं चित्रं प्रस्तूय कविना स्वकीयं रचनाकौशलं सुस्थापितं यदवलोक्य पाठं-पाठं च विज्ञा अपि आनन्दिताः भवन्ति। उदात्त-भाविकादि-आलङ्कारिकं वर्णनं तावत् -

रविकरचुम्बितकमलविकासैः मदकलसारसनादैः
मालविकानां सुमधुरहासैः विवुधशिरोमणिवादैः।
देवोत्थानवह्निखेलाभिर्नवनवदीपविलासैः
भैरवगढमुद्रितवस्त्राणां चेतोहरैः सुहासैः।।
बालवृद्धयूनां परिहासैर्या जयति जगच्चित्तम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।।[२८]

मेघस्य स्मरणेनैव कालिदासस्य मेघदूतं स्मर्यते, काव्यङ्ग्रहेऽस्मिन् मेघसम्बद्धानां कवितानां वर्णनेन भारतीयऋतुपरिवर्तनचक्रसम्बन्धिनी चर्चाऽपि समासादिता। मेघप्रबोधनं कृत्वा कविः तस्य कर्त्तव्यं स्मारयति। कवेः जीवनदर्शनसम्बद्धं चिन्तनमपि पाठकानां समक्षं समायाति, कवेः दर्शनं–परोपकाराय पुण्याय जीवितं जीवितुमेव मन्ये। कवेः 'किं जीवनं ते' कविता जनान् विशिष्टाचरणाय प्रेरयति–

तवागमने तथा गमने न चर्चा
वराक प्राघुणिक! किं जीवनं ते।।[२९]

मानवेन तादृशी कर्त्तव्यता समाराधनीया येन तस्य गमनानन्तरमपि जनाः तं स्मरेयुः। इमाः कविता आशान्वितान् कुर्वन्ति जनान्।

कवेः व्यङ्गात्मिका वाणी राजनीतिनिपुणान् मिथ्याप्रलोभयितॄन् राजनीतिज्ञान् च सम्बोधयति, प्रबोधयति। जनान् वञ्चयित्री शासनासन्दिका छन्ददात्रीं प्रजां सर्वदैव पीडयति, कवेः व्यङ्गात्मिका वाणी तां वन्दते।

लक्षकोट्यर्बुदानामहो वञ्चनं
शान्तभावेन यां प्राप्य कर्तुं क्षमम्।
यां श्रितैश्छन्ददात्री प्रजा पीड्यते
वन्द्यतां काऽपि सा शासनासन्दिका।।[३०]

निर्वाचनसमयस्य स्थितिरपि कविना सम्यक्तया वर्णिता। 'निर्वाचने प्राप्ते' कविता राजनीतिकदलानां घटाटोपं प्रदर्शयति। कवेः इयं कविता निर्वाचनस्य कुत्सितं दृश्यं प्रदर्शयति। एतत् तु विशिष्टमेव वर्तते यत् सर्वविध दृश्यं कविः सहजतया पाठकानां समक्षं स्थापयति।

सर्वशुक्लोत्तरायां सर्वविधं सामाजिकं दृश्यजातमवलोकयितुं शक्यते। कविः स्वकवितासु भारतस्य सुदृढया स्थित्या सहैव जर्जरामवस्थामपि प्रदर्शयति,

एतासु कवितासु वर्षस्य प्रारम्भिकसमयात् अन्तं यावत् वर्णनं प्राप्यते, यावती राष्ट्रियता अत्र वर्तते - सामाजिकताऽपि तावती एव। आध्यात्मिकप्रेम्णा ओतप्रोतः कविः राष्ट्रियसौविध्यमपि प्रदर्शयति, भारतस्य कथमुन्नतिः स्यादेतत् प्रवचनमपि सर्वशुक्लोत्तरायाः परमं वैशिष्ट्यम्। प्रमुखं वैशिष्ट्यं तु एतस्याः भारतप्रेम एव। नाऽत्राऽतिशयोक्तिः यत् सर्वशुक्लोत्तराकाव्यसङ्ग्रहस्य सरसा सरला च संस्कृतभाषा सहृदयानां संस्कृतानभिज्ञानामपि हृदयानि भृशमाकर्षति। कवेः लेखन्यां साक्षात् वाग्देवी विराजमाना इवावलोक्यते तेनैव स्वकीये काव्ये एकत्र भणितम्-

जिह्वां मे कीलयितुं शक्तः कः कोऽत्र जगति मातुर्जातः।
वाणी विहरति मे सदोज्ज्वला गर्जन्ती भारतजनताहम्।।[३१]

२.४ आधुनिककवितायां सर्वशुक्लोत्तरायाः स्थानम्

आधुनिककविता काव्यसंसारेऽस्मिन् स्वकीयं विशिष्टं स्थानं भजति। आधुनिककाव्यज्ञाः बहवो विद्वांसः स्वकीयरचनाकर्मणा विख्यातास्सन्ति तेष्वयं कविः रमाकान्तशुक्लः प्रमुखः वर्तते। आधुनिककविषु डॉ. राजेन्द्रमिश्रः, डॉ. राधावल्लभत्रिपाठी, डॉ. छज्जूरामशास्त्री, डॉ. निरञ्जनमिश्रः, डॉ. हर्षदेवमाधवः, डॉ. इच्छरामद्विवेदी, डॉ. पुष्पादीक्षितः, डॉ. रामकरणशर्मप्रभृतयो विद्वांसः प्रमुखाः सन्ति। कविवरशुक्लस्य कवितासु माधुर्यं ज्ञेयत्वं च सुष्ठु विद्यते, सर्वशुक्लोत्तराकाव्यसङ्ग्रहः न केवलं विविधविषयाणां वर्णनं विदधाति अपितु बहुविधकुसंस्कारेष्वपि कुठाराघातं करोति।

एतत्पंक्तिलेखनेन आधुनिककवितायाः ये त्रिंशद् भेदाः दर्शिताः ते अधिकांशतया सर्वशुक्लोत्तराकाव्यसङ्ग्रहे सन्निविष्टाः सन्ति। सर्वशुक्लोत्तरा वस्तुतस्तु काव्यसङ्ग्रहः परञ्च अस्मिन् काव्यसङ्ग्रहे नैकाः काव्यविधाः संगृहीताः कविना। सर्वशुक्लोत्तरायां सङ्गृहीताः सर्वाः भक्तिपरकरचनाः स्तोत्रकाव्यस्यानुभूतिं कारयन्ति। वाणीं वयं वन्दामहे, सुरभारती विजयते, वेदवाणीं नुमः, महाकालमालिका, श्रीवरदेश्वराष्टकम् इत्येताः कविताः स्तोत्रकाव्ये अन्तर्भूताः सन्ति। अस्मिन् काव्यसङ्ग्रहे नैकानि खण्डकाव्यान्यपि द्रष्टुं शक्यन्ते, यथा- उत्तरमङ्गलम्, तुरीनोस्मृतिसपादशतकम्, अभिनवहितोपदेशः चेत्यादयः। व्यङ्ग्यपरकरचनाः व्यङ्ग्यकाव्यानां परम्परां वर्धयन्ति, वन्दनीयास्ते,

वन्द्यतां काऽपि सा साशनासन्दिका, लोकतंत्रेऽस्मिन्, योऽयं कृतः शपथस्त्वया, किं कुर्यात्, निर्वाचने प्राप्ते इत्येताः कविताः व्यङ्ग्यकाव्ये अन्तर्भवन्ति। कविना मुक्तककाव्यपरम्पराया अपि निर्वाहः कृतः। अत्र बहूनि छन्दोमुक्तान्यपि काव्यानि विलसन्ति-यथा- पोलकहालस्थ-टर्नरहाउस -वातायनात्, मम तथा विहगदम्पत्योर्विदेशयात्रा, अपहृतविमाने, कविसहृदय- संवादः।

सर्वशुक्लोत्तराकाव्यसङ्ग्रहः आधुनिकपरम्परायाः निर्वाहं सुदृढतया करोति। अत्र सङ्कलिताः रचना आधुनिकीम् एव विचारसरणिं प्रसारयन्ति। आधुनिक-काव्यकर्तृषु राजेन्द्रमिश्रः, राधावल्लभत्रिपाठी, हरिदत्तशर्मा, छज्जूरामशास्त्री, बच्चू-लाल-अवस्थी, हर्षदेवमाधवः, रेवाप्रसादद्विवेदः, शिवजीउपाध्यायः, हरिनारायणदीक्षितसदृशाः नैके कवयः आधुनिककाव्यशोभां विवर्धयन्तः गीर्वाणवाणीं सेवन्ते। सर्वेऽपि आधुनिकाः कवयः समाजस्य-भ्रष्टाचार-शिक्षा-राजनीति- आजीविका-कदाचार-बलात्कारसदृशसमस्याः उत्थाप्य काव्यं कुर्वन्ति। सर्वशुक्लोत्तरायां इमे विषयाः प्रमुखां भूमिकां निर्वहन्ति। कवेः सामाजिकचिन्तनं प्रसिद्धमेव।

तद्यथा-

जलं न लभ्यते तथा यथा सुरा पदे-पदे
वचांसि सन्ति भूरिशो, न हि क्रियाः पदे-पदे।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे
इयं दशा समर्थनं किमर्हतीति चिन्त्यताम्।।[३२]

सुरापेयस्य एतावती वृद्धिर्जायते यत् जलं तथा न लभ्यते यथा सुरा। अधिकारिणः नेतारो वा केवलं डिण्डिमघोषेणोद्घोषयन्ति, कर्मणि तेषां न काऽपि श्रद्धा।

सर्वशुक्लोत्तरायां राजनीतेः चर्चाऽपि कविना प्रतारणचातुरीरूपेण सम्पादिता, राजनीतिरपि भ्रष्टाचारे दक्षा-

इयं देवी प्रतारणचातुरी, भ्रष्टावने दक्षा।
मता नृपनीतिसञ्ज्ञा, वन्दनीया लोकतंत्रेऽस्मिन्।।[३३]

जानकीजीवन-वामनावतरणादिमहाकाव्यकारो डॉ. राजेन्द्र मिश्रः स्वकीये मृगाङ्कदूते भव्यभारतमेवं चित्रयति चित्ताकर्षकरूपे -

गन्तव्या ते जलधिरसनाऽऽवेष्टिता भारती भूः
आद्यै यत्र प्रसभमुदिता संस्कृतिर्विश्ववारा।
तत्राप्याद्या तरणितनयाजाह्नवीसङ्गभूमिः
सृष्ट्यै यत्र द्रुहिण उवसि क्लेशितात्मा तताप॥[३४]

न केवलं भारतमान्तरिकरूपेणापितु बाह्यरूपेण चित्रयति डॉ. चन्द्रभानुरेवम्–

सरितो वक्षसि हारा विन्ध्यो भाति मेखलामानम्
पल्लवलसिता निविडवनाली रुचिरं नवपरिधानम्।
आस्तां कविकुलमस्य मनोरमरूपवर्णने लीनम्
भारतवर्षं राष्ट्रं जीव्याच्चिरकालं स्वाधीनम्॥[३५]

डॉ. राजेन्द्र मिश्र–डॉ. चन्द्रभानु–सदृशानां कवीनां भारतवर्णनमिव डॉ. रमाकान्तशुक्लस्य भारतवर्णने सादृश्यं दरीदृश्यते। तद्यथा–

आशां वृणुते नैव निराशां भारतम्
सद्गुणमेव स्मरति न दोषं भारतम्।
कलहविवादान् शमयति लोके भारतम्
शान्तिं जगति तनोति शुभं मे भारतम्॥[३६]

सर्वशुक्लोत्तरायां ते विषया सहजतयैव कविना वर्णिता ये विषया अधुना कवितायां मण्डिताः सन्ति, न केवलं भारतवर्णने अपितु सर्वशुक्लोत्तरायां बालसुलभगीतान्यपि कविना प्रस्तुतानि। बालसुलभगीतानाम् इयं परम्परा अत्याधुनिकी वर्तते। डॉ. राजेन्द्रमिश्रस्य 'कौमारम्' शीर्षकान्वितं पुस्तकं शिशुगीतसङ्कलनमस्ति। रमाकान्तशुक्लस्य 'श्रावणमासे' शीर्षकान्विता कविताऽपि लघुबालानुगुणमेव रचिताऽस्ति। तद्यथा–

शालां यान्ति क्लिन्नाः बालाः श्रावणमासे।
मशकमक्षिका–दष्टा लोकाः श्रावणमासे॥[३७]

आचार्य राजेन्द्रप्रसादमहोदयस्य नदीगीतस्य पद्यम्। तद्यथा -

तुहिनाचलनलिनी गङ्गा
अस्माकं जननी गङ्गा।
क्वचित्फेनिला, क्वचिन्निर्मला
क्वचिच्च शैवलिनी गङ्गा॥[३८]

द्वयोरपि कवयोः शिशुगीतयोः सादृश्यम् आधुनिकसंस्कृतसाहित्ये आचार्य रमाकान्तशुक्लस्य सर्वशुक्लोत्तरायाः स्थानं निर्धारयति।

कवेः श्रीनिवासरथमहोदयस्य कारुणिककथा आधुनिक संस्कृतसाहित्ये गीतललामीभूताऽस्ति। कविः श्रीनिवासरथः समयस्य विषमतां प्रदर्शयति-

विपत्रितेयं जीवनलतिका
केवलकुटिलकण्टकाकुलिता
दूरे कुसुमकथा।
सूर्ये तपति तमिस्रा प्रभवति
भवति नयनमयथा।।[३९]

कवेः सर्वशुक्लोत्तरायां मुक्तच्छन्दसि लिखिता इयं कारुणिकी रचना तस्य आधुनिकसंस्कृतसाहित्ये स्थानं सुष्ठुतया द्रढयति। -

तव पौत्रं त्वत्सकाशं प्रापयिष्यति
इदानीमपि सज्जनाः सन्त्येव
त्वया तु जीवितव्यमेव
पौत्रस्य लालनार्थम्
नवाङ्कुरोऽयं तव वंशस्य
पुत्रशोके मर्तुं त्वं स्वतंत्रा नाऽसि, नमो नमः।।[४०]

आधुनिकसंस्कृतसाहित्ये वर्णनासौन्दर्यं चारुतरं प्राप्यते तत्तद् रचनासु। श्रीमुल्लपूडिनारायणमहोदयस्य पुत्रसञ्जीवननामकाव्ये वर्णनासौन्दर्यं दिङ्मात्रमुदाह्रियते -उज्जयिनीवर्णनं तद्यथा-

शिप्रातरङ्गाऽहतचारुवप्रा विप्रादिभिर्दत्तसुरेशतृप्रा।
क्षिप्रार्पितारिव्यसनोरुदृप्रा सुप्रातरामा ललितास्यसृप्रा।।[४१]

उज्जयिन्याः वर्णने कविवरशुक्लोऽपि सिद्धहस्तो वर्तते।

हारास्तारास्तरला गुटिका भाण्डसमूहा भव्याः
पुष्पस्तबकाः शेखरहारा माला नव्याः नव्याः।
शिप्रावाता कविसङ्घाता महाकालशिवभक्ताः
केकित्रासककबरीभाराः सुरभिलधूपसनाथाः।
लोलापाङ्गैर्लसितास्तन्व्यः श्यामा मध्ये क्षामाः।
श्रोणीभाराद्विलसितगमनाः तन्त्रीवादनकामाः।।[४२]

वर्णनसौन्दर्येऽपि सर्वशुक्लोत्तरा आधुनिककाव्यानि अतिशेते। एवम्प्रकारेण विविधविषयपरिपूता सर्वशुक्लोत्तरा आधुनिकसंस्कृतसाहित्यस्य अमूल्यो निधिः वर्तते, यत्र कविना आधुनिककाव्यपरम्परायां सन्निहिताः प्रायशः सर्वेऽपि विषयाः सङ्गृहीताः रचिताश्च। कवेः काव्यसङ्ग्रहः नूनमेव सहृदयपाठकानां सुखं वर्धयतु इत्येव मे कामना।

सर्वशुक्लोत्तरायां सङ्गृहीतरचनाभिः न केवलं भारत एव संस्कृतकाव्यलोकप्रियता परिवर्धिता अपितु विदेशेष्वपि संस्कृतस्य महान् प्रचारः प्रसारश्च व्यधायि। संक्षेपेणेदमेव कथनं पर्याप्तं यत् विंशशताब्द्याः अनेन कविना स्वीयरचनामाधुर्येण संस्कृतस्य प्रचाराय, प्रसाराय परिवर्धनाय च मनसा वाचा कर्मणा वा यद्योगदानमर्पितं तदनुपमेयमतुलनीयञ्चाऽस्ति।

●

सन्दर्भाः

१. सर्वशुक्लोत्तरा, वाणीं वयं वन्दामहे, श्लोक सं. १, देववाणीप्रकाशनम्, नई दिल्ली-२००८
२. सर्वशुक्लोत्तरा, वाणीं वयं वन्दामहे, श्लोक सं. ६, देववाणीप्रकाशनम्, नई दिल्ली-२००८
३. सर्वशुक्लोत्तरा, वेदवाणीं नुमः, श्लोकः सं. २, देववाणीप्रकाशनम् नई दिल्ली-२००८
४. सर्वशुक्लोत्तरा- तं सुभाषं स्मरामो वयं सादरम्-श्लोक सं. ७, देववाणी परिषद्, नई दिल्ली-२००८
५. सर्वशुक्लोत्तरा- तस्य स्मृतिर्विजयते पुरुषोत्तमस्य श्लोक. ६, देववाणी परिषद्, नई दिल्ली-२००८
६. सर्वशुक्लोत्तरा, स्मरामि ब्रहमचारिणम्- श्लोक सं. ७, देववाणी परिषद्, नई दिल्ली-२००८
७. सर्वशुक्लोत्तरा, आशा, श्लोक सं. ५४, देववाणीपरिषद्, नई दिल्ली-२००८
८. सर्वशुक्लोत्तरा, किं जीवनं ते, श्लोक सं. ४, देववाणीपरिषद्, नई दिल्ली-२००८
९. सर्वशुक्लोत्तरा, किं जीवनं ते, देववाणी परिषद्, नई दिल्ली-२००८
१०. सर्वशुक्लोत्तरा, वन्द्यतां काऽपि शासनासन्दिका, श्लोक सं. ३, देववाणी परिषद्, नई दिल्ली-२००८
११. सर्वशुक्लोत्तरा, वन्दीयास्ते, श्लोक सं. १३, देववाणी परिषद्, नई दिल्ली-२००८
१२. सर्वशुक्लोत्तरा, अभिनवहितोपदेशः, श्लोक सं. १ख, देववाणीपरिषद्, नई दिल्ली-२००८
१३. सर्वशुक्लोत्तरा, भारतस्य विजयोऽयम्, श्लोक सं. ३, देववाणीपरिषद्, नई दिल्ली-२००८

१४. सर्वशुक्लोत्तरा, राष्ट्रदेवते-१, २, देववाणीपरिषद्, नई दिल्ली-२००८
१५. सर्वशुक्लोत्तरा- अहं स्वतंत्रता भणामि-श्लोक सं. ७, देववाणीप्रकाशनम्, नई दिल्ली-२००८
१६. सर्वशुक्लोत्तरा- प्रणम्याः कारगिलवीराः-श्लोक सं. २
१७. सर्वशुक्लोत्तरा- भारतस्य जनता समीक्षते-श्लोक सं. ३०
१८. सर्वशुक्लोत्तरा- स्वतंत्रदेशः सुतरां विभाति-श्लोक सं. १
१९. सर्वशुक्लोत्तरा- रौति ते भारतम्- श्लोक सं.-१९
२०. रौति ते भारतम्, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीपरिषद्, नवदेहली।
२१. कारगिलवीराः, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीपरिषद्, नवदेहली।
२२. भारतजनताऽहम्, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीपरिषद्, नवदेहली।
२३. एकं सद् बहुधा विलोक्यते भारतम्, श्लोक-३, आचार्यरमाकान्तशुक्लः
२४. वाणीं वयं वन्दामहे, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नवदेहली।
२५. धनवन्तरिं तमीडे, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नवदेहली।
२६. तं सुभाषं स्मरामो वयं सादरम्, रमाकान्तशुक्लः देववाणीप्रकाशनम्, नवदेहली।
२७. पोलकहालस्थ टर्नरहाउसवातायनात्, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीप्रकाशनम्, नवदेहली।
२८. उज्जयिनीयं जयति-श्लोक-८, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीप्रकाशनम्, नवदेहली।
२९. किम् जीवनं ते, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीप्रकाशनम्, नवदेहली।
३०. वन्द्यतां काऽपि सा शासनासन्दिका-४, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः , देववाणीप्रकाशनम्, नवदेहली।
३१. भारतजनताऽहम्, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीपरिषद्, नवदेहली।
३२. अहं स्वतन्त्रता भणामि, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीपरिषद्, नवदेहली।

३३. लोकतन्त्रेऽस्मिन्, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः देववाणीप्रकाशनम्, नवदेहली।
३४. पारिजातम् (मासिकं पत्रकं) कानपुरम् ६/२, अंक-सम्वत् २०४४ वी., पृ. ८-९ साभारम् देवशु.
३५. विंशशताब्द्याः संस्कृतसाहित्ये चित्रितं भारतम्, डॉ. कैलाशनाथद्विवेदी, देववाणीशुवासः, सम्पादन, राजेन्द्रमिश्रः, दे.प., न.दि., १९९३
३६. सर्वशुक्लोत्तरा, एकं सद् बहुधा विलोक्यते भारतम्, आ. रमाकान्तशुक्ल, दे.प., नई दिल्ली-२००८

३७. सर्वशुक्लोत्तरा, श्रावणमासे, आ. रमाकान्तशुक्ल, दे.प., नई दिल्ली-२००८
३८. कौमारम्, नदीगीतम्, डॉ. राजेन्दमिश्रः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली-२००८
३९. श्रीनिवासरथ की कविता में कारूणिक प्रसङ्ग, डॉ. ओमप्रकाश राजपाली, देववाणीसुवासः, १९९३
४०. सर्वशुक्लोत्तरा-मातरम्प्रति पुत्रस्य जङ्गमभाष सन्देशः, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नवदेहली-२०००
४१. पुत्रसंजीवनम्, श्री मुल्लपूडिनारायणः।
४२. सर्वशुक्लोत्तरा, उज्जयिनीयं जयति, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नवदेहली।

तृतीयोऽध्यायः

सर्वशुक्लोत्तरा-रचनानां समीक्षणम्

३.१ सर्वशुक्लोत्तरायां सङ्कलितानां भक्तिपरकरचनानां समीक्षणम्

कविशुक्लो विविधानां गतिविधीनां चित्रणं काव्यमाध्यमेन करोति। काव्यशैल्या वृत्तान्तप्रस्तुतिः कवेरनुपमा शैली वर्तते। कविः कवितानां वैविध्येन पाठकानां मनोरञ्जनं स्यादिति विश्वासेन कविताः करोति। यथा भारतवन्दनं विहितं तथैव कुलदेवी, ज्ञानदेवी, प्रकृतिदेवी चापि समये समये कविना काव्यविषये निधायाराधिताः। सर्वशुक्लोत्तरायां कविना षट् कविताः भक्तिपरकताः भक्तिभावसमन्विताश्च रचिताः। कविना स्वीया आध्यात्मिकी भावना एताभिः कविताभिः प्रस्तुता। कविना विशिष्टतया देव्याः सरस्वत्या वन्दनं सर्वतोभावेन विहितम्। आध्यात्मिकताया विकासेन अस्माकं आन्तरिकशक्तेः जागरणं भवति।

वाणीं वयं वन्दामहे –

'वाणीं वयं वन्दामहे' कविताकुञ्जे कविः मातुः सरस्वत्या वन्दनं विदधाति। कविः धवलां देवीं सरस्वतीं समाराध्य सर्वजनानां मानसपरिष्कारपूर्वकं संस्कृतसेवार्थं समर्पणाय प्रार्थयते। 'गीतिका' मात्रिकच्छन्दसि रचितेयं रचना कवेरनुपमां प्रतिभां प्रकाशमाना परादिवाग्भिस्संयुतां देवीं सरस्वतीं स्मरन्तीव प्रारभते। तद्यथा–

यास्ते परा पश्यन्तिका या मध्यमा या वैखरी
सृष्टिस्थितिप्रलयेश्वरी सुयशस्करी मंगलकरी।
तमसो जनान् ज्योतिर्नयति या तां विधातुर्गेहिनीं
शुक्लां सुमतिदां वाणीं वयं वन्दामहे।।[1]

सुरभारती विजयते -

'सुरभारती विजयते' रचनेयं १९७५ तमवर्षस्य रचना वर्तते। अस्यां देववाण्याः सरस्वत्याः समाराधना कृता। इयं दिक्पालच्छन्दसि रचिता वर्तते। देववाणीपरिषदः नैककलाकरैः नैकसमारोहेषु रचनाया अस्या मधुरपाठः कृतः। अस्यां रचनायां सम्पूर्णस्यापि संस्कृतसाहित्यस्य वास्तविकं चित्रणं कृतं वर्तते। षड्दर्शनानि पुराणादीनि च सम्यगुपवर्णितानि। मारिशसदेशे महात्मगांधी संस्थाने समायोजितेऽन्ताराष्ट्रियसंस्कृतसम्मेलने कविनास्या निजमुखादेव काव्यपाठो विहितः। प्राच्यविद्यासम्मेलनस्य विविधेषु अधिवेशनेषु कविनास्याः पाठः कृतः। देहल्या राज्यशिक्षासंस्थानस्य राज्यशैक्षिका- नुसन्धानपरिषदः गोष्ठीषु चापि कविना सुरभारती विजयते काव्यरत्नादस्मात् काव्यपाठः कृतः। कविः संस्कृते अमृतत्वम् अमरत्वं च पश्यति-

अज्ञैर्मृतेति गदिता ह्यमरत्वभावभरिता।
नित्यं प्रवर्धमाना सुरभारती विजयते।।[२]

वेदवाणीं नुमः -

संस्कृतसाहित्यं लौकिकसाहित्ये वैदिकसाहित्ये चापि विभक्तं वर्तते। वेदानामुत्पत्त्या साकं संस्कृतवाङ्मयस्यापि आविर्भावो भवति। वेदोऽस्माकं धर्ममूलमितिधिया अस्मच्चिन्तनधाराया अभिवृत्तिकारणं वेदा एव सन्ति। यतस्तत एव मानवीयसंस्कृतेः शुभारम्भो ज्ञायते। संस्कृतसाहित्यस्य नाऽभविष्यत्किमपि अस्तित्वं यदि वेदवाणी नाऽभविष्यत्। वेदा भारतीयसंस्कृतेः कोषा वर्तन्ते। न केवलं ज्ञानभाण्डागाररूपेणैव वयमेतान् जानीमः, अपि तु समस्तचराचरवस्तुसङ्ग्राहकत्वमप्येतेषु धार्यते चेन्न तत्र काचनातिशयोक्तिः भविष्यति। मन्त्रद्रष्टार ऋषयो वेदेषु मानवजीवनस्य विविधपक्षाणां चर्चा कृतवन्तः। मानवस्य समाजाय राष्ट्रियवैयक्तिकजीवनाय च कानि कर्तव्यानि स्युरित्यपि वेदेषु विस्तरेण वर्णितम्।

समर्पणभावनया राष्ट्ररक्षा कर्तव्येति अस्मद्वैदिकवाङ्मये प्राप्यते। अस्माभिर्जागरूकैर्भाव्यम्, अस्माभिः संघे भूत्वा कार्यं कार्यं चेति वेदा उपदिशन्ति। अत एव स्वकीयस्वास्थ्यलाभचिन्तनपूर्वकं देशस्य समाजस्य च हिताय अस्माभिः प्रयत्नो विधेयः। या धरा अस्मत्कृते फलान्नादिकं प्रदाय बहुहितं करोति

तस्या अपि संरक्षणायास्माभिः प्रयत्नो विधेयः। यस्य देशस्य पवित्रभूमौ वयं सुखेन जीवनं यापयामः सा भारतभूमिरस्माभिः संसेव्या, रक्षितव्या च तत्संस्कृतिरनुपमानुकरणीया च।

अद्य समाजे मानवीयमूल्यानां ह्रासो जातः। एतादृशावसरे अपेक्षितं भवति यद्वयं स्वकीयामजरां संस्कृतिं न विस्मरेम। कविशुक्लस्य प्रत्येकमपि रचना आदर्शाणां मर्यादायाश्च घातकानां जनानां कृते प्रेरिका भवति। सर्वास्वपि रचनासु परमादर्शो दृग्गोचरो भवति। अस्यां रचनायां तु विशेषतः कविशुक्लेन ते वेदा वर्णिता ये खलु वस्तुतः मानवादर्शप्रतिबिम्बरूपा एव सन्ति।

वेदानां सारं कवितारूपेण प्रस्तूय कविशुक्लो यथा जगत उपकारं करोति तथा खलु न कश्चिदपि महता प्रयत्नेनापि कर्तुं प्रभवति। काव्यसरलता कवेः प्रमुखगुणो वर्तते। वेदवाणी कविना एवं गीता-

पश्य देवस्य काव्यं यदास्तेऽमृतं
यज्जराबाधितं नो भवेज्जातुचित्।
अस्य संज्ञाऽस्ति वेदः सदा पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥[३]

भारतभूरस्मदादीनां मातृभूर्वर्तते। भूमिरस्माकं माता भवतीति शिक्षापि वेदशिक्षैव। ऋग्वेदेऽथर्ववेदे चापि एतस्योद्घोषका नैके मन्त्रास्सन्ति। भूमिं मातरं मत्त्वा तत्सेवासपर्यादिकं क्रियेतेति शिक्षापि वेदेष्वेवास्ति। कविः वेदसारमित्थं प्रकटीकरोति।

अस्ति माता मदीया धरेयं तथै-
वास्म्यहं तत्सुतस्तत्सपर्यापरः।
घोषणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥[४]

यथा वेदेषु राष्ट्रोन्नयनप्रेरणा वर्तते तथैव कवेः काव्येष्वपि सर्वत्र समाजोन्नतिकामना कृता। यैः साधनैर्जनानां सुखं भवति तत्प्राप्तये बहुप्रयत्नविधानं, यच्च मानवस्य हिताय न भवति तस्य निस्सारणाय मंगलसङ्केता अपि वेदेषु सन्ति। यत्पठनेन नूनमेव बहुविधसमस्यानां समाधानं भवति। 'सर्वे भद्राणि पश्यन्तु' इमां कामनां कविरपि करोति। तद्यथा-

नैव पश्येदभद्रं नरश्चक्षुषा
नैव चाकर्णयेद्वाप्यभद्रं क्वचित्।
भावनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥[५]

मानवजन्मनःपश्चात् वाणीव्यापार एव सर्वोत्तममाचरणीयं तत्त्वं भवति। यथा हि "**वाणी रसवती यस्य, यस्य श्रमवती क्रिया। लक्ष्मीः दानवती यस्य सफलं तस्य जीवनम्**"। इति कथने वेदसन्देशो वर्तते तथैव कविश्शुक्लोऽपि वेदानां सन्देशाननुकरोति, लोकप्रेरणाय च सर्वदा काव्यरूपेण प्रस्तौति। शिवसंकल्पसूक्तमपि कविना लोकमङ्गलकारकं मत्त्वा सरलपद्येन प्रस्तुतम्।

अन्ताराष्ट्रियैकता स्यादिति कविः सर्वदा कामयते। संगच्छध्वं प्रभृति मन्त्राणामनुकरणं नूनं भवेदिति सन्देशं स्वयमपि संचरन् कविः लोकाय काव्यमेवं करोति-

स्याम ऐक्यस्थिताः संवदध्वं समे
मानसं शैवङ्कल्पपूतं भवेत्।
प्रेरणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥[६]

अस्मत्पूर्वजैः सर्वदैव विश्वशान्तिकामना कृता, अस्माभिरपि वेदामृतानुसारं विश्वशान्त्यर्थं प्रयत्नो विधेय इति कवेरात्मविचारः यदा काव्यत्वेन जगतस्समक्षमुपस्थितो भवति तदा नूनमेव स सार अनुकरणीयो जायते। चतुर्दशभुवनेषु शान्तिस्स्यादिति वेदवाण्या सह कविर्नैजं विचारमेवं प्रकटयति-

अन्तरिक्षद्युवारिक्षमासु ध्रुवं
शान्तिसाम्राज्यमास्तां सदा राजितम्।
कामनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥[७]

राष्ट्रसमृद्धिकामना वेदेषु पदे-पदे कृता। यदि राष्ट्रं बलवद् भवति तर्हि तत्रत्यजनता अपि समृद्धा पुष्टा च भवति। आरोग्यकामना, सुखकामना धनधान्यादिकामनापि वेदेषु कृता। सर्वापि प्रकृतिर्यदि यथाकालं नैजकार्यं

करोति तर्हि न कदापि काचित्समस्या समक्षमागच्छेत्। पशवो जीवने सहायका भवन्ति। तेषां पालनं भवेद्, गौः दुग्धप्रदात्री सर्वरत्नप्रदात्रीव वर्तते अतस्तत्सेवा कर्तव्या, इयं शिक्षापि वेदेषु लभ्यते। गोर्दुग्धेन शारीरिकी पुष्टिर्भवति, वत्साश्च कृषिकार्ये सहायका भवन्ति। एवंविधा नैकमङ्गलकामनाः वेदेषु सन्ति, अतो धीमान् कवी रमाकान्तशुक्लोऽपि तदनुकरणाय प्रेरयति-

वारिवाहः सुकाले समागच्छतात्
सन्तु गावश्च पुष्टाः समस्तास्तथा।
मार्गणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥८
राष्ट्रमास्तां सुपुष्टं समृद्धं सदा
त्यागभोगौ सखायौ भवेतां तथा।
देशनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥९

प्रकृतिपूजकः कविशुक्लः प्रकृती रक्षितव्येति सन्देशं प्रयच्छति। प्रकृतिस्थिता सर्वेऽपि प्राणिनो नैजं जीवनं लब्ध्वा समाना भवन्ति। सर्वेषाम् उपयोगिता भवति, कश्चिदपि अपरस्मान्न्यूनो न भवति। देशस्य समुन्नतये कृषि-कर्म सर्वोत्कृष्टं कर्म वर्तते अतस्तत्करणे लज्जा न मन्तव्या। मानवः करणीयम् आचरन् शतं जीवेदिति कामनां वेदवचनानुसारं कविशुक्लोऽपि करोति। तद्यथा-

कर्म कुर्वन् शताब्दो नरो जीवतात्
स्वस्ति पन्था भवेत्प्राणिनां सर्वदा।
ईदृशीं स्वस्थदृष्टिं दिशन्तीं नृणां
वेदवाणीं नुमो वेदवाणीं नुमः॥१०

भारतं खलु तादृशं राष्ट्रं यत्र नैकधर्मावलम्बिनो वसन्ति। सर्वेऽपि सहोदरा इव प्रतिभान्ति। कविः राष्ट्रियैक्यभावनां सर्वधर्मसमभावं चेत्थं कथयति-

नैकधर्मास्तथा नैकवाचो नरा
मातरं भूमिमेनां सदा रक्षत।
राष्ट्रियां वैश्विकीमेकतां तन्वतीं
वेदवाणीं नुमो वेदवाणीं नुमः॥११

एवम्प्रकारेण कविना काव्येनानेन वेदवन्दनं कृतम्। वेदान् सर्वोत्कृष्टान् मत्त्वा कविः तेषां प्रामाणिकान् सर्वथोपयुक्तान् च विचारान् अनुकरणीयान् कथयति। कवेरियमनुपमप्रतिभा यदसौ वेदसदृशविषयमपि काव्यविषयेन प्रस्तूय लोकमनोरञ्जनं करोति।

धन्वन्तरिं तमीडे -

द्वितीयान्ताराष्ट्रियाऽयुर्वेदसम्मेलनं नेपालराजधान्यां १३/९/१९९१ तमे दिनाङ्के समायोजितम्। अस्मिन्नवसरे कविना कवितेयं सम्मेलनारम्भे प्रस्तुता। इतः कानिचन दिनानि पूर्वमेव कवितेयं पत्रिकासु प्रकाशिता जाता।

भगवतो धन्वन्तरेः प्रादुर्भावात्तन्माहात्म्यवर्णनपर्यन्तविषयोऽत्र अतीव रोचको विद्यते। देवदानवाः यदा समुद्रं मथ्नन्ति तदैव धन्वन्तरिरत्नमिदमपि समुद्भूतम्। धन्वन्तरिरायुर्वेदकर्ता मन्यते। अतः आयुर्वेदकर्तुः स्तुतिः कविना रचनायामस्यां कृता। कविः यथाक्रमं भगवतो धन्वन्तरेः गुणगौरवं गायति। तद्यथा-

आविर्बभूव योऽब्धेरमृतं घटे दधानः।
पातुं जनानपथ्याद् धन्वन्तरिं तमीडे॥
विष्णुस्वरूप आयुर्वेदस्य योऽस्ति कर्ता।
भगवन्तमम्बुजाक्षं धन्वन्तरिं तमीडे॥[१२]

आयुर्वेदः खल्वेकाऽदर्शचिकित्सापद्धतिः। यस्या उद्देश्यं मानवाय स्वस्थजीवनकामना भवति। एषा हि भारतस्य प्राचीना चिकित्सापद्धतिः। आयुषो विज्ञानरूपेण आयुर्वेदरूपेण चापि आयुर्वेदः प्रथितः। वैद्यराजः पं. जगदीश प्रसादशर्ममहोदयः कथयति- **"मानवजीवनाय यथा आयुर्वेद आवश्यकोऽस्ति तथैव आयुर्वेदानुयायिनां कृते काव्यमिदमपि आयुर्वेदपरिचायकं भवति।**[१३]**"** आरोग्यकामना वर्तते आयुर्वेदे कविमानसे चापि। द्रष्टव्यं तावत्- कविः आयुर्वेदाचार्यान् प्रति श्रद्धाञ्जलिं समर्प्य निजममूल्यं कर्तव्यं पालयति। स आयुर्वेदप्रवर्तकान् तदनुसारिजनान् च सर्वथोत्तमान् भारतसंस्कृतिसंरक्षकान् जानाति-

आद्यं शरीरमास्ते धर्मस्य साधनं यत्।
तद्रक्षितुं दिशति यो धन्वन्तरिं तमीडे॥[१४]

चरकाय सुश्रुताय प्रथिताय वाग्भटाय।
यः प्रेरणां प्रदत्ते धन्वन्तरिं तमीडे।।
अद्यापि यस्य भक्ता अष्टाङ्गमाचरन्तः।
स्वस्थं जगद्विदधते धन्वन्तरिं तमीडे।।[१५]

कविः, भगवान् धन्वन्तरिर्यथा जगतो हिताय किमप्यद्भुतं विधाय योगदानं करोति तथैव स्वपक्षतोऽपि सर्वजनसौख्याय कामनां करोति। कविशुक्लो भारतीयचिकित्सापद्धतेः अनुसरणाय सततं प्रवर्तयति।

सर्वे भवन्तु सुखिनः, सर्वे निरामयाः स्युः।
इयमस्ति यस्य काङ्क्षा धन्वन्तरिं तमीडे।।[१६]

महाकालमालिका -

महाकालमालिका स्तोत्रकाव्यं वर्तते। अत्र भगवतः शिवस्य स्तुतिः कृता। देशे विविधभागेषु यत्र कुत्रापि चर्चितानि शिवमन्दिराणि सन्ति तेषां महत्त्ववर्णनं संस्थितिवर्णनं चापि कविना काव्येऽस्मिन् विस्तरेण कृतम्। काव्यस्यास्य सर्वोत्कृष्टविशेषता वर्तते यदस्मिन् तादृशानि सरलपद्यानि वर्तन्ते यत्तानि राज्यानां भाषासु रचितानीव प्रतिभान्ति। एतादृशकाव्यरचनेन काव्ये भाषासमालङ्कारप्रतीतिर्भवति। तद्यथा-

एकलिङ्ग जय लिङ्गराज जय
स्थाण्वीश्वर जय नञ्जनगुड जय।
जय गौरीशंकर जय जय जय
जय लोहितनील दिगम्बर जय।।[१७]

श्रीवरदेश्वराष्टकम् -

श्रीरमाकान्तशुक्लमहोदयस्य काव्येषु शैलीवैविध्यं विलसत्येव। कविर्नैकविधाभिः शैलीभिः काव्यं करोति। श्रीवरदेश्वराष्टकमपि एकं स्तोत्रकाव्यं वर्तते। कविना वरदेश्वरमहादेवं सम्पूजयितुमष्टौ श्लोका रचिताः। अष्ट-श्लोकानामेकत्र सङ्ग्रहणं चाष्टकं भवतीति कृत्वा वरदेश्वराष्टकमिदं सिद्धिं भजते। कवेः स्तुतिपरकरचनाभिर्ज्ञायते यत्कविरीश्वरं विनाऽथवेश्वरनाम विना पदमेकमपि अग्रे न सरति। कवेः काव्यरचनाशक्तिः सर्वविधकाव्यं सरलं

सुपाठ्यं च करोति। देवाराधनायां कविः कदाचित्प्रार्थयते कदाचित्समस्यानां सम्मुखमुपस्थापनं करोति।

भगवतः शिवस्य पूजनं कृत्वा कविरतुलनीयां कवित्वशक्तिमाप्नोत्। स स्तोत्रपाठपूर्वकं शिवार्चनाय सर्वान् प्रेरयति-

रमाकान्तेन शुक्लेन श्रीब्रह्मानन्दसूनुना।
कृतं स्तोत्रं पठेद्यस्तु शिवभक्तिं स आप्नुयात्॥[१८]

अस्मिन् स्तोत्रे प्रत्येकमपि चतुर्थं चरणम् "**नौमि वरदाम्बायुतं वरदेश्वरं वरदायकम्**" इति वर्तते। वसन्तपञ्चमीशुभावसरे ६.२.२००३दिनाङ्के वरदाम्बिका मन्दिरस्थापना जाता। अस्मिन्नेवावसरे वरदेश्वरमहादेवस्य विष्णोः दशावताराणां चापि प्राणप्रतिष्ठा सञ्जाता। एतत्स्थानम्- भिवानी-दिल्लीराजमार्गे वर्तते। श्रीकाञ्चीकामकोटिपीठाधीश्वरो जगद्गुरुशङ्कराचार्योऽस्मिन्नवसरेऽत्र सम्प्राप्तः। कविना श्रीशुक्लेन च तदानींतनवृत्तमप्यत्र संकेतितम्।

३.२ राष्ट्रियभावनापरकरचनानां समीक्षणम्

कविवर-रमाकान्तशुक्लस्य कवितासु राष्ट्रियभावनायाः परा काष्ठा दृग्गोचरीभवति। कविना रचितं 'भाति मे भारतम्' राष्ट्रियकाव्यं वर्तते यस्य दशाधिकसंस्करणानि विविधविश्वविद्यालयेषु छात्रेषु राष्ट्रियभावनायाः सञ्चारं कुर्वन्ति। कविः राष्ट्रस्य वन्दनं विविधरीत्या सम्पादयति। सर्वशुक्लोत्तरा काव्यसङ्ग्रहे दशाधिकाः रचनाः राष्ट्रियभावनासम्बद्धास्सन्ति। कविः भारतस्य एकामेकामपि समस्यां स्वीकृत्य रचनां करोति सहैव समस्यानिराकरणायापि उपायान् प्रददाति। 'अहं स्वतंत्रता भणामि' शीर्षकान्विता कविता देशभक्तिं प्रसारयति जनमानसं चोद्वेलयति। "रौति ते भारतम्" रचना भारतीयसमाजस्य कुवृत्तिम् अथ च सामाजिकसमस्यया ग्रस्तस्य भारतस्य वर्णनं करोति। 'भारत जनताऽहम्' कविता भारतजनतावैशिष्ट्यकथनपरा सम्पूर्णभारतजनताप्रतिनिधिभूता च वर्तते। भारतवन्दनपरकरचनासु श्रेष्ठतमेयं रचना। एवं क्रमेण अत्र सङ्गृहीतासु रचनासु- एकं सद् बहुधा विलोक्यते भारतम्, ब्रूहि जगन्नाथस्वामिन्, स्वतंत्रतायाः स्वर्णजयन्ती, भारतस्य विजयोऽयम्, प्रणम्याः कारगिलवीरा, भारतस्य जनता समीक्षते, स्वतंत्रदेशः सुतरां विभाति इत्येताः कविताः भारतस्य एकतामखण्डतां

च कामयन्ते। कवेः श्रीरमाकान्तशुक्लमहोदयस्य यद्यपि सर्वा अपि रचनाः भारतमहिमविभूषित एव तथापि काश्चन रचनास्तु साक्षात् नाम्नाऽपि भारतवन्दपरास्सन्ति। अग्रे शुक्लरचितानां राष्ट्रियभावनापरकरचनानां समीक्षणं यथामति संक्षेपेण च प्रस्तोस्यते।

अहं स्वतन्त्रता भणामि

अस्यां कवितायां स्वतन्त्रता साक्षात् मानवरूपा निजवृत्तवाचिका च कल्पिता वर्तते। कविः स्वतन्त्रतां कर्तृरूपेण प्रस्तौति। सा च निजजीवनगतिं भाषते। काव्ये ''मानवीकरणस्य'' यथा लक्षणं भवति तथेयं कविता सिद्धा भवति। तेन मानवीकरणस्योदाहरणरूपेयं कविता। अथ च मानवीकरणस्य लक्षणन्तु–

अमूर्तमथवा मूर्तं साक्षाद् द्रव्यं निरिन्द्रियम्।
मानवीक्रियते तस्मान् मानवीकरणं मतम्॥

अहं स्वतन्त्रता भणामि कवितेयं १९८३तमवर्षे स्वतन्त्रतादिवसे प्रकाशमागता। तदानीमेव चराचरेषु प्राणान् भरन्तीव कवितेयं ख्यातिं गता। अद्य च भारतस्य नैकभाषासु कवितायाः काव्यरूपान्तरं संरचितम्। २५ जनवरी १९८७ तमदिनाङ्के सर्वभाषाकविसम्मेलने कवितेयं सर्वासामपि कवितानां प्रतिनिधिरूपेण व्यलसत्।[१९] आकाशवाण्याः समस्तकेन्द्रेभ्योऽस्याः प्रसारणमपि जातम्।

कविशुक्लस्य अस्याः कवितायाः हिन्दीभाषायां रूपान्तरणं श्रीमता डॉ.कृष्णमुरारिशर्ममहोदयेन कृतम्। स प्रमुखां सर्वव्याप्तां पङ्क्तिमेवं कथयति– ''मैं स्वतन्त्रता तुम्हें पुकारती सुनो''। डॉ.गुलाबचन्द्रजैनमहोदयेनापि कविताया अस्या हिन्दीरूपान्तरणं विहितम्। सा च हिन्दीरूपान्तरिता कविता 'भारतीयज्ञानपीठ' द्वारा प्रकाशिते **'भारतीय कविताएं १९८३'** इति कवितासङ्ग्रहे सङ्कलिता वर्तते।[२०] डॉ. सुन्दरलाल कथूरिया महोदयः[२१], डॉ. जनार्दनप्रसाद पाण्डेय'मणि' महोदयः[२२], डॉ. पतंजलिकुमारभाटिया[२३] महोदयाश्चापि विशेषेण अस्याः कवितायाः विषये निजविचारान् प्रकटितवन्तः। न कश्चन तादृशो जनो भवेदवशिष्टः यः श्रीशुक्लस्य इमां कवितां सुपठ्य निजमनोभावान् कवितामाहात्म्यं च न अकथयत्। कविताकरणेन देशभक्ति–

प्रदर्शककविः राष्ट्रियचेतनां प्रस्तौति। देशस्य तात्कालिकदशामालोक्य कविना कवितेयं प्रायः षोडशपद्यैः समलङ्कृता। कवितेयं कवेः देशभक्तिं प्रकटयति।

देशस्य स्वतन्त्रतायै ये वीरा निजप्राणाहुतिं दत्तवन्तस्तेषामाशाः कामनाश्च कदा पूरितास्स्युः? तेषां स्वप्नाः कदा सार्थका भविष्यन्ति? सम्प्रति तु स्वतन्त्रतायाः प्रायः सप्तषष्टिवर्षाणि पश्चादपि तस्य पूर्तिर्न दृश्यते यदपेक्षितमासीत्।

स्वतन्त्रताया महत्त्वं तु त एव जानन्ति ये स्वतन्त्रतायै नैजं सर्वस्वमपि त्यक्तवन्तः। ते वीरा ये देशस्वतन्त्रतायै सर्वविधं प्रयत्नं कृतवन्तः ते मृतशरीरा अपि स्वर्गलोकाद् देशदशां दृष्ट्वा करुणविलापं कुर्वन्तीति प्रतिभाति। देशभक्ता अस्माकं प्रेरणास्रोतांसि भवन्ति। ते सदानुकार्याः, ते वन्द्याः स्मर्याश्चापीति कविः श्रीशुक्लः स्वतन्त्रतामुखेनैवं कथयति-

अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम्।
निधाय मानसे च तद् यथोचितं विधीयताम्।
अहं स्वतन्त्रता भणामि........................
मदर्चनाकृते शिरांस्युपायनीकृतानि यैः,
धनं वपुस्तथा मनः सहर्षमर्पितानि यैः।
अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः,
गतास्त एव मे जनाः सदैव वन्दनीयताम्।।
अहं स्वतन्त्रता भणामि.......................[२४]

भारतदेशस्य विविधक्षेत्रेषु जायमानां समुन्नतिं, क्रीडाप्रगतिं, एशियाड ८२ क्रीडायाः सफलमायोजनं च "**स्वतन्त्रता**" स्मरति। भारतस्य नवनिर्माणाय वर्धापनानि यच्छति। देशवीरा यस्याः स्वतन्त्रतायाः प्राप्तये निजप्राणाहुतिं दत्तवन्तः तां स्वतन्त्रतामस्वतन्त्रां दृष्ट्वा कवेः "**स्वतन्त्रता**" सचीत्कारं रौति। भारतस्य सम्प्रति औद्योगिकवैज्ञानिकसमुन्नतिर्जाता, किं च नैतिकमूल्यानां लोपोऽप्यभवत् यः देशविकासे बाधाजनको भवति। कविकल्पिता स्वतन्त्रता देशनागरिकान् सावधानं करोति।

परन्तु वर्तमानया विचित्रकाललीलया
मनाग् विचिन्तिता यदेव वच्मि तन्निशम्यताम्।[२५]

कविः श्रीशुक्लमहोदयः विविधवेदनाभिः परिपीडितं भारतं पीडामुक्तं कर्तुं वाञ्छति। भारतमातुः प्रत्येकमपि सत्पुत्रो वाञ्छति यन्मदीया मातैषा कष्टे मा पततु। कविः स्वतन्त्रतामुखेन विचारमिममेवं कथयति।

यदा यदा श्रृणोम्यहं वधूविदाहपातकम्
यदा यदा श्रृणोम्यहं बलात्कृतिं विहिंसनम्।
तदा तदा भवाम्यरुन्तुदव्यथाप्रपीडिता,
इयं व्यथा प्रणाशमेतु येन, तद्विधीयताम्॥
अहं स्वतन्त्रता भणामि..........................[२६]

आत्मीयैरात्मीयानां हिंसनम्, शिक्षाया असफलनीतयः, निर्धनता, पारस्परिकभेदभावः, सुराया आधिक्यं जलस्य न्यौन्यं, एकस्माद्दलाद् द्वितीयं प्रति पलायनप्रवृत्तिः, विविधा नवा रोगाश्च सम्प्रति दुःखदतत्त्वानि वर्तन्ते। कविः श्रीशुक्लस्तेषां वर्णनं निजकवितायामस्यां तथैव करोति यथा स साक्षात् घटनानां प्रत्यक्षद्रष्टा स्यात्। डॉ. सुन्दरलाल कथूरियामहोदयः कालगतिबोधिकायाः अस्या रचनाया विषये लिखति यत्- ''**कविना देशव्याप्तानां विसङ्गतीनां विरोधः प्रत्यक्षं दृष्टोऽनुभूतश्च वर्तते। यथार्थदृष्ट्या तद्वर्णनं कृतम्। तत्समाधानाय उपायाश्चोक्ताः** इति।'' पूज्यपूजाव्यति- क्रममालोक्य कविः भृशं रोदिति। धर्ममाश्रित्य कृतं कुकृत्यं कविं पीडयति। निर्दोषकृषकाणां मरणं, शिक्षास्तरावनतिः भ्रष्टाचरणाभिवृद्धिश्च कवेः प्रत्यक्षदर्शनविषयाः भवन्ति। स तेषां वर्णने महत्साफल्यमर्जयति। ''**सत्यमेव जयते**'' इतीमं भारतीयं ध्येयवाक्यमादर्शञ्च वचनं कविः भारतीयानां सच्चरित्रबोधकमिव मन्यते। स जानाति यद् कुकृत्यात्प्रत्येकमपि बिभेति। कविश्रीशुक्लस्य ''**अहं स्वतन्त्रता भणामि**'' कवितेयं स्वदुःखानि कथयन्ती प्रत्येकमपि भारतीयं देशोन्नतये प्रयत्नो विधेय इति प्रेरणान्वितं विदधाति।

विलोकयामि वृत्तिहीनतामहं यदा यदा
विलोकयामि नीतिहीनतामहं यदा यदा।
नतानना गतासुका भवाम्यहं तदा तदा
इयं दशा न मेऽस्तु येन, तत्सदा विधीयताम्॥
अहं स्वतन्त्रता भणामि..........................[२७]

कविः श्रीशुक्लो वाञ्छति यन्मदीये भारते कदापि निर्धनता पादौ न प्रसारयेत्, युवका वृत्तिहीना मा भवेयुः, पूज्याः पूजिताः स्युः, दुष्टाश्च दण्डिताः स्युरिति। भविष्यच्चिन्तनपरेयं रचना गाम्भीर्यं सौन्दर्यं गेयतां च दधती अतीव मनोरञ्जनकरी श्रेष्ठा च वर्तते।

रौति ते भारतम्

आचार्यरमाकान्तशुक्लेन रचितं 'भाति मे भारतम्' अद्य सम्पूर्णेऽपि विश्वे सुमधुरेण संगीतेन गीयते अनुभूयते च। तस्मिन् काव्ये कविवरेण भारतस्य सम्पन्नतायाः संस्कृतेश्च दर्शनं कारितमस्ति परञ्च 'रौति ते भारतम्' इत्यस्मिन् काव्ये भारतस्य दुर्बलतायाः वर्णनं विहितमस्ति। कविवरः कस्यचन मुखात् वदति यत् भारतं अनेकैरभावैर्युतं रोदिति।

भारते इदानीं जनसंख्याविस्फोटः जायमानः विद्यते, जनसंख्यावृद्ध्या सर्वत्र जनसम्मर्दः येन सर्वत्राऽपि पङ्क्तिबद्धाः जनाः दृश्यन्ते ये च स्वपर्यायं प्रतीक्षमाणा एव स्व-समयं यापयन्ति मोचयन्ति च दीर्घनिःश्वासान् यैर्व्यथामाप्नुवन् भारतं रौति। रमाकान्त! कि रेलयानेषु भिक्षापरान् बालकान् न पश्यति भवान्? ये ननु गालिभिः पोषिताः, दयोत्पादकाः वस्त्रहीनाश्च दृष्टिपथं समायान्ति तान् वीक्ष्य चिन्तामयं भारतं रौति। वस्तुतः अत्र आचार्येण निर्धनानां बालानां (ये खलु रेलयानेषु भिक्षारताः भवन्ति) प्रत्यक्षं वर्णनं विहितमस्ति। भारते इदानीमपि अनेकानि गृहाणि तादृशाणि सन्ति यत्र रात्रिभोजनाय अन्नमेव न भवति ते तु भिक्षावृत्त्या एव उदरपोषणादिकं साधयन्ति। तादृशा अपि जनाः सन्ति येषां व्यवसाय एव भिक्षार्जनम्।

अद्यतनीयवार्तापत्रेषु प्रतिदिनमपि बलात्कारघटनाः, पैशाचकृत्यानि, हत्यापहरणादिगाथाश्च दृष्टिपथं श्रुतिपथञ्च समायान्ति। भारतस्येयं दुर्दशा जायमाना वर्तते यत् प्रतिदिनं एकस्मिन्नेव नगरे दशाधिका घटनाः तादृश्यो भवन्ति यासु बलात्कार- हत्यापहरणानि श्रूयन्ते। देहलीराज्ये तु इमाः घटनाः जनान्दोलनानां कारणानि भवन्ति। दामिनी(निर्भया)-नाम्न्या नायिकाया जीवदुदाहरणम् अत्र प्रत्यक्षमस्ति। भारतदुर्दशायाः यत्कुत्सितं स्वरूपं तदत्र प्रत्यक्षमिवाभाति। कविवरस्य काव्ये अशिक्षां, प्रवञ्चनम्, यौतुकम् उत्कोचाद्याः बीभत्साः समस्या दृष्ट्वा भारतं रौति। तद्यथा–

यौ तु कप्रेप्सुभिलोलुपैर्निन्दितै-
र्मर्त्यरूपे स्थिते राक्षसैः कौटिकैः।
दह्यमाना वधूर्वीक्ष्य दुःखेन हा
रौति ते भारतम् रौति ते भारतम्[२८]॥

देहव्यापारैः पारवश्याङ्कितैः नृत्यैश्च या दारिद्र्यगाथा उच्चैर्गीयते तया ते भारतं रौति।भारते इदानीं उत्कोचव्यापारः स्वकीयपादान् यथेच्छं प्रसारयति, सर्वकारीय-कार्यालयेषु उत्कोचं विना कार्यसिद्धिरेव न भवति।

क्वाप्यशिक्षातमोभिर्वृतं कष्टदैः
क्वापि रोगैः परीतं महादारुणैः।
नित्यमुत्कोचलीलाविलासैर्युतं ,
रौति ते भारतं रौति ते भारतम्[२९]॥

यत्र युवानो मादकद्रव्यैः क्षीणतां यान्ति, तेषामोजः क्षीयते, युवानो जराजर्जराः दृश्यन्ते तादृशं भारतं रौति, यद् भारतं विश्वबन्धुत्वमुद्घोषयति स्म, यच्च विश्ववन्द्यैश्चरित्रैर्जगत् पावयति स्म, तदेवेदानीं विद्वेष-हिंसया पूरितं प्रतिभाति-

कर्हिचित् विश्वबन्धुत्वमुद्घोषयत्
पावयद्विश्ववन्द्यैश्चरित्रैर्जगत् ।
यत्तदेवाद्य विद्वेषहिंसाप्लुतं
रौति ते भारतं रौति ते भारतम्[३०]॥

भारते यः कराधानकर्त्ताधिकारी स स्वयमेव स्वकीये गृहे कृष्णवित्तादिस्वर्णभाण्डं स्थापयति, उच्चशिक्षां समाप्यापि युवका वृत्त्यर्थं वृथैवाहिण्डन्ते, रक्षाभटाः सैनिकाः एव रक्षणीयान् घ्नन्ति, हिंसका दस्यव एव पूजिताः न तु महात्मानः, एतादृशं भारतं चीत्कारं करोति। वर्तमानकालिकीं स्थितिं कविर्व्यथापूरितेन मनसा, खिन्नचेतसा च वर्णयति-

देहपण्याजिरे नूपुराकर्णनैः
पारवश्याङ्कितैर्नृत्यकृत्यैस्तथा ।
येन दारिद्र्यगाथोच्चकैर्गीयते
तद्व्यथापूरितं रौति ते भारतम्[३१]॥

कविना 'भाति मे भारत'मित्यत्र निगदितं यत् मया वन्दनीयस्य भारतस्य एव चित्रणं प्रस्तूयते, परं कैश्चित् अत्र **दोषा अनेके सन्ति** इति निगदितम् अतो रौति ते भारतम् इत्यस्य रचनां करोमि। कविः कथयति यन्मया 'भाति मे भारत'मित्यत्र एकपद्येन भारतस्य दोषाणां संकेतो विहितः। यथा-

सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः
किन्तु नाहं प्रपश्यामि तान् मन्दधीः।
वन्दनीयं मया कीर्तनीयं मया
मोदतां वर्धतां राजतां भारतम्[३२]॥

कविना वर्णितम् यत् मया केवलं गुणानामेव वर्णनं कृतमासीत् यतो हि देशस्य दोषा कीर्तनेन क्रन्दनेन वा न दूरीभवन्ति, तदर्थं सर्वैरपि मिलित्वा कार्यं करणीयम्। अन्ते च कविः 'संगच्छध्वं संवदध्वं सं वो मनांसि........, इत्याद्यौपनिषदं वाक्यं स्मारयन् मिलित्वा कार्यसाधनार्थं प्रेरयति येन च भारतम्, भा-रतं स्यात्। तद्यथा-

लोलुपा नायका नैव सन्त्वत्र भोः
सन्तु कर्त्तव्यशून्या न चापि प्रजाः।
देशसेवां मिलित्वा कुरुध्वं समे
येन भूयोऽपि भासेत नो भारतम्॥[३३]

अस्याः कविताया रचनाकालः १२.१०.१९८५ ई. वर्षं वर्तते।

भारतजनताऽहम्

भारतजनतावैशिष्ट्यकथनपरा कवितेयं सम्पूर्णभारतजनताप्रतिनिधिभूता वर्तते। वस्तुतस्तु कवे रचनासु भारतवन्दनपरकरचनासु च श्रेष्ठतमेयं रचना। अस्यां 53 पद्यानि सन्ति। नैके विद्वांसः पाठकाश्च कविताया अस्या विशिष्टं महत्त्वं प्रतिपादयन्ति। डॉ. जनार्दन प्रसाद पाण्डेयः 'मणिः' महोदयः कविताया अस्याः सूक्ष्ममूल्याङ्कनं व्यदधात्। तदनुसारम्- 'भारतजनताऽहम्' कवितायां मनीषी, मेधावी, विद्वान् कविः श्रीशुक्लो विश्वस्य समग्रजनतायां भारतीयजनताया वैशिष्ट्यं प्रदर्शयति।

भारतीया जनता यथासमयं कठोरा कोमला च जायते- ''कुलिशादपि कठिना कुसुमादपि सुकुमारा''। सा हि अध्यात्मनदीजलस्नाता, धृतिशीला, बहुवर्णा, रसभरिता दृढकवचा च जनता वर्तते। अत एतादृशजनताया वास्तविकस्वरूपप्रदर्शनरता कवेः प्रतिभेयं वस्तुतोऽनुपमा एव। स हि भारतीयजनतायाः सर्वमपि कार्यजातं प्रामाणिकं मनुते। तद्यथा-

यत्कथितमस्ति तत्सत्यमस्ति अपि कश्चित्तन्मिथ्याकरोति?
श्रद्धेयं वचनं व्याहरामि प्रामाणिकभारतजनताऽहम् ॥[34]

भारतजनताऽहम् शीर्षकान्विता रचना प्रथमतया 'अर्वाचीनसंस्कृतम्' पत्रिकायाः जुलाईमासाङ्के १९८६ तमे खैष्टाब्दे प्रकाशिता तदनु इलाहाबाद-विश्वविद्यालयस्य श्रीनेत्रमण्डपे (सीनेटहाल) १९८७ तमे वर्षे वाचिता। अनया कवितया श्रोतृसमुदाय आनन्दितो जातः। प्रत्येकमपि पाठको मुक्तकण्ठेन प्रशंसावाक्यान्यवदत्। अस्यां कवितायां भारतीयजनतायाः आत्मकथा मार्मिकतया वर्णिता।

भारतभूम्यां जन्म लब्ध्वा मानवो देवस्पृहणीयो जातः। कवेः उद्घोषः वर्तते यत् भारतसदृशी जनता नान्यत्र।-

नाहं भ्रमेऽस्मि नाहं मोहे विश्वं भ्रान्त्वा तथ्यं वदामि।
प्रेरणां जगन्मत्तो लभते धृतिशीला भारतजनताऽहम्॥[35]

कविना 'भारतजनताऽहम्' काव्ये स्वतन्त्रताऽऽन्दोलनमष्टमे श्लोके आत्मनिर्भरता नवमे, १३ अहिंसाप्रधानाण्विकोन्नतिः, १४ भौतिकसाधनसम्पन्नता, १५ पञ्चशीलसिद्धान्तानां रक्षणम्, १६विश्वस्मिन्नपि विश्वे परमाणुनिरस्त्रीकरणप्रयासैः विश्वशान्तेः स्थापनम्, अन्येषां राष्ट्राणां स्वतन्त्रतान्दोलने सहयोग इत्यादीनां प्रमुखाणां राष्ट्रियान्ताराष्ट्रियानां सिद्धान्तानां वर्णनं चर्चा च सम्पादिता।

'भारतजनताऽहम्' शीर्षकान्विते काव्ये निर्धनता-वृत्तिहीनता-बलात्कार-हत्या-वञ्चना-लुण्ठन-आतङ्कवाद-यौतुक-पर्यावरणप्रदूषण-उत्कोचादि बह्व्यः समस्याः कविना सहजतयैवोत्थापिताः। सत्यां समस्यापीडितायामपि भारतीयजनताया धैर्यं साहसञ्च स्तुत्यमेव।-

दारिद्र्यदुःखदावाग्निदग्धदेहाऽपि नो म्रिये ह्यद्यावधि।
साहसजिजीविषाकर्मठतापुत्तलिका भारतजनताऽहम्॥

विषपानपराऽपि स्मितवदना सर्वसहभारतजनताऽहम्।
उच्चावचमार्गे गच्छन्ती सोत्साहा भारतजनताऽहम्॥[३६]

कवेः कथनमस्ति यत् भारतीयजनता दीर्घतरा अपि आपदादिसमस्याः सोढुं शक्नोति परञ्च भारतीयैकताविखण्डकतत्त्वानि न सोढुं शक्नोति।

नो सहे किन्तु देशस्य भङ्गमुन्निद्रा भारतजनताऽहम्।
एकतां कामये नित्यं स्वां जगदीश्वर! भारतजनताऽहम्॥
अविरुद्धान् वापि विरुद्धान् वा ह्येकस्मिन् सूत्रे स्थापयितुम्।
किं किं न मया क्रियते लोके यत्नस्था भारतजनताऽहम्॥[३७]

कविना नेतृणां प्रजातन्त्रस्य च वर्तमानकालिकस्वरूपमपि वर्णितम्। प्रजातन्त्रस्य परिभाषाकेन्द्रीभूता जनता एव अद्य गौणीभूता जाता। नेतृणां चरितस्य सम्यक् प्रतिपादनार्थं प्रयुक्तानि 'नक्र-गृद्ध-गोमायु-करकट-दमनक' सदृशानि प्रतीकानि प्रभावोत्पादकानि।-

नक्राऽश्रुजलं जाने सम्यक् जाने च गृध्रगोमायुगिरम्।
जाने करटक-दमनकचरितं हृदयज्ञा भारजनताऽहम्॥[३८]

राजनीतिककुटिलतां जानन्त्यपि भारतजनता शान्ताऽस्ति परं नर्जुता कारणमस्ति न तु मूर्खता। सा अभिव्यक्तेः स्वतन्त्रतायै जागरूकाऽस्ति। व्यथायुक्ता, चिन्तायुक्ता च जनता जगन्नियन्तृषु विश्वसिति। सा दोषाणां परिहाराय मङ्गलमातनोति।

ये दृश्या मयि दोषा नैकेऽरुन्तुदा अवाच्याः कष्टकराः।
कामये विलोपं वै तेषामतिशीघ्रं भारतजनताऽहम्॥[३९]

कवितायामस्यां भावपक्षेण साकं कलापक्षोऽपि स्पृहणीयः। सरल-सुबोध- पद- विन्यासेन, आडम्बररहितया स्वाभाविक्या अभिव्यक्त्या प्रवाहमय्याः सरसायाः भाषायाः दर्शनं भवति सर्वत्र। भारतजनताया एकस्मिन् स्थले[४०] डा. शुक्लेन भारतीय जनतायाः सूक्ष्मेक्षणसामर्थ्येन कविकर्मणो विशिष्टं पक्षं प्रकाशितम्। पदपादाकुलकच्छन्दसि रचितायामस्यां कवितायां त्रिपञ्चाशत् श्लोकास्सन्ति। अस्याः रचनाकालः १५.०७.१९८६ वर्तते।

एकं सद् बहुधा विलोक्यते भारतम्

सम्पूर्णेऽपि विश्वे शान्तिमिच्छन् कविः श्रीशुक्लः भारतस्य अखण्डतामेकतां चापि प्रथमं कामयते। स तत्कर्तुं यथाशक्ति प्रयतते। राष्ट्रियैक्यमन्ताराष्ट्रियैक्यं च कविः समग्रविकासमूलकं शान्तिस्थापकं च कथयति। कवेः वर्ण्याः श्रेष्ठपुरुषाः स्वभावादेवानुकरणीया भवन्त्येव, अथ च काव्यविषयीभूताश्च ते वीराः महापुरुषाश्चापि देवतुल्या वन्दनीया भवन्ति। कवेः प्रत्येकमपि क्षणं भारतस्योन्नतिं विधातुं व्यतीतं भवति, प्रत्येकमपि वचनं भारतमहिमानं गायदिव प्रतिभाति। श्रीराम-कृष्ण-गौतम-गांधी -चैतन्यमहाप्रभु-रामकृष्णपरमहंस-विवेकानन्दादयो भारतभूमौ जन्मालभन्त। कविस्तत्कार्याणि तद्योगदानं तत्स्मृतिं चापि समक्षमुपस्थापयति। ऐक्यमिच्छन् कविरेवं निजभावान् व्यनक्ति-

एकं सद् बहुधा विलोक्यते भारतम्।
बहुधा सच्चैकं विराजते भारतम्।
एकमखण्डमभिन्नमस्ति मे भारतम्।
रम्यमस्ति सुरवन्द्यमस्ति मे भारतम्।
एकं सद् बहुधा.......................[४१]

भारतं जीवितपुरुषमिव मत्वा कविस्तस्य किमप्यङ्गमशान्तं मा भवेदिति कामयते। परमेश्वरं प्रार्थयमानः स शान्त्यर्थमात्मानुभूतिं प्रकटयति-

यदि पादेऽस्य कदापि निवशते कण्टकं
निखिलतनौ पीडनं भवति मर्मान्तकम्।
यदि वेदना शिरसि समुदेति तदा ध्रुवं
व्यथते सकलतनौ मे निखिलं भारतम्॥
एकं सद् बहुधा..........................[४२]

भारतस्य जनानां भाषाः, आचारव्यवहाराः, दैनिकक्रियाः भोजनादिकं च यद्यपि भिन्नं भिन्नमस्ति तथापि आत्मना ते सर्वेऽपि एकतां प्रकटयन्ति।

वसुधैव कुटुम्बकम् इति मन्यमाना भारतजनता भारतीया मतिर्वा संवेदनाशीलत्वात् सम्पूर्णस्यापि विश्वस्य हृदयमिवास्ति। कृषकाणां कृषिकार्येण, औद्योगिकयन्त्राणामुन्नयनेन, विभिन्नकलानां प्रदर्शनेन च भारतधरेयं सर्वदा सन्तुष्टा

मुदिता च वर्तते। राष्ट्रमिदं केषां मानवमूल्यानां संरक्षणाय कार्यमाचरतीति कविमतिस्तावत्-

यत्र यत्र सत्यं ऋजुता समुदारता
यत्र यत्र करुणा श्रमपरता वीरता।
यत्राहिंसा-त्याग-विवेक-सहिष्णुताः
तत्र तत्र विलसति सुतरां मे भारतम्।
एकं सद् बहुधा.........................[४३]

भारतस्य गौरवगानं कविः निजं दैनिकमाचरणीयं च कर्म मनुते। स राष्ट्ररक्षायै समुद्घोषितां **"वयं राष्ट्रे जागृयाम"** सूक्तिं स्मारयति। कार्यपथि च नियोजयति।

यदा व्योम्नि सागरे शैलशृंगेषु वा
विकटकर्दमे मरौ विजनविपिनेषु वा।
सावधानभटनिवहो रक्षति जन्मगां
गर्वमेति विपुलं निखिलं मे भारतम्।।
एकं सद् बहुधा.........................[४४]

अस्मिन् सर्वश्रेष्ठे प्रजातन्त्रदेशे जनता निजसमस्यानां समाधानाय स्वयमेव तत्परा भवतीति कविरेवं सूचयति-

क्वापि पतति संकटे प्रजातन्त्रं यदा
अवरुध्यते जनानां कण्ठो वा यदा।
सर्वातङ्कभयाशङ्काः परिहृत्य वै
गर्जति सकलं समुज्ज्वलं मे भारतम्।।
एकं सद् बहुधा.........................[४५]

भारतं राष्ट्रं यदा दुःखमग्नं भवति तदा कविहृदयमतीव कष्टमनुभवति। स निजकवितासु राष्ट्रपीडां प्रस्तौति-

क्वापि भवति कुलवधूदाहपापं यदा,
रक्ष्यभक्षणं दुर्बलघातो वा यदा।
क्वापि भवति यदि हिंसाक्रीडा दुःखदा
रोरुदीति करुणं सकलं मे भारतम्।।[४६]

अखण्डमतुलं च कवेर्भारतं विश्वस्मिन् शान्तिसंवाहकं वर्तते। आशाशीलता भारतस्य अस्त्रं शस्त्रञ्चापि वर्तते यद्द्वारा तद्विविधपरिस्थितीनां समाधानं करोति, स्वाभिमानं च न त्यजति। तद्यथा-

आशां वृणुते नैव निराशां भारतं
सद्‌गुणमेव स्मरति न दोषं भारतम्।
कलहविवादान् शमयति लोके भारतं
शान्तिं जगति तनोति शुभं मे भारतम्॥[४७]

कवेः सकलमपि भारतं "**संगच्छध्वं संवदध्वम्** " इति विचारे समाश्रितं वर्तते।

केवलशासनतन्त्रं नो मे भारतम् कोटिकोटिजनतपःश्रमो मे भारतं।
केवलमवनीगृहसम्पनो भारतम् संगच्छध्वं संवदध्वमिति भारतम्॥[४८]

कवेः अस्या रचनाया विषये डॉ. श्रीपतञ्जलिकुमारभाटियामहोदयो लिखति यद्- "**यथा ऋग्वैदिक-ऋषीणां मते 'एकं सद्‌विप्रा बहुधा वदन्ति' इतीयं भारतीयाच्छविरासीत् तथैवाधुनिकभारते 'एकं सद् बहुधा विलोक्यते भारतम्' इति भारतस्य संस्कृतिरस्तीति।**" कवेः अनया रचनया वर्तमानकालेऽपि ऋग्वैदिकसंस्कृतेरनुवर्तनं भवति जगतो जनानां कल्याणाय।

ब्रूहि जगन्नाथस्वामिन्

भारते एकत्र हिंसादिक्रूरकर्मभिः भारतीयसंस्कृतेः शत्रुरूपेण दुष्कृत्यपरायणाः निन्द्या जना ताण्डवं कुर्वन्ति अपरत्र च देशभक्ता देशस्य रक्षार्थं समग्रे देशे भ्रमन्ति। कवी रमाकान्तशुक्लो देशस्य दुःस्थित्या खिन्नः सन् आसुरीप्रवृत्तेर्निराकरणाय लोककल्याणाय च जगन्नाथमेव प्रश्नान् प्रष्टुं विवशते। सः जगन्नाथं देशस्य दुर्दशाताण्डवेन जागरयति कथयति वा।

अस्याः कविताया रचना कविना उत्कलरेलयाने जगन्नाथपुर्याः यात्राकाले कृता। कवी राजीवगान्धिनो हत्यया दुःखितो वर्तते। भारतस्य युवा प्रधानमंत्री राजीवो निर्वाचनप्रचाराय पेरम्बदूरे आसीत्। २१.५.१९९१ तमे खैष्टाब्दे चरणस्पर्शव्याजेन तस्य हत्या कृता। शोकसागरे निमग्नः कविर्व्यथितो जातः। कवेरियं कविता हत्यापूर्वस्य समयस्य कपटपूर्ण व्यवहारं सङ्केतयति।

राजीवगान्धिनो हत्याशोकम् अभिव्यञ्जयन्तीयं कविता

मानवीयशाश्वतमूल्येषु सांस्कृतिकभावनासु च प्रश्नचिह्नानि अङ्कयति।

माला भूता व्याली जीवनलीलान्तकरी
प्रणतिर्भूता प्रकृतिर्जनविश्वासान्तकरी
कुसुमानि कुर्वते कालदूततां निःशङ्कम्
अनृतं सत्यं तर्जयति जगन्नाथस्वामिन्
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्।।[४९]

इदानीं रक्षका एव भक्षका जाता ये शुभ्रकञ्चुकाः सत्यप्रतीकभूताः सन्ति त एवेदानीं प्रजातंत्रस्य हन्तारो जाताः।

पूजादीपा गृहदाहकारिणो दीप्यन्ते
रक्षकाः सन्ति भक्षकाः जगन्नाथस्वामिन्।।[५०]

डॉ. शुक्लसदृशः सुविज्ञः सर्वदाऽपि सत्यस्य पक्षधरो भवति। तस्य कर्मणि विश्वासो विद्यते। स तु क्रियाया अभावे ज्ञानं भारतुल्यं मनुते। कविदृष्टिर्भौतिकताविषयीभूतां खलवृत्तिं निन्द्यति। पृच्छति च जगन्नाथम्–

अमृतं विषायते भारायते तथा ज्ञानं
वरदानं शापायते तमिस्रायते दिनम्।
स्रोतो मरुभूमीयति सेवा लुण्ठना मता।।
वार्ता युद्धीयति कथं जगन्नाथस्वामिन्।
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्।।[५१]

भारतं वैदिककालादेव मातृशक्तेः स्थलं वर्तते, वेदेषु स्त्रीसामर्थ्यस्य वर्णनसरणिः वर्तते।[५२]

देशस्य नवनिर्माणे स्त्रीणामपि महद्योगदानं वर्तते। प्राक्तनं भारतीयेतिहासं नारीणां गौरवगाथाभिः परिपूर्णं वर्तते। देवासुरसदृशे सङ्ग्रामे स्वीयाद्वितीयकौशलेन दशरथमपि चकितचकितं कुर्वत्याः कैकेय्याः योगदानम् अविस्मरणीयं वर्तते। विशाला-कैकेयी-शकुन्तला-सीता-अनसूया-दमयन्ती-सावित्रीसदृश्यः योग्या महिला भारतगौरवं वर्धयन्ति। परमद्य तासां दुर्दशां दृष्ट्वा नैकाः काव्यरचनाः रचिताः। मैथिलीशरणगुप्त[५३], राजाराममोहनरायादि नेतारः तद्दशागौरवं वर्धयितुं प्रयासरताः आसन्। करुणार्द्रहृदयो रमाकान्तो जगन्नाथं कथयति–

दीनाश्च नाद्य नारायणतां गमिता लोके
नार्यश्च नैव पूज्यन्ते तव भक्तैर्लोके।
किं किं दर्शयसि प्रभो जगद्बीभत्सदशां
कुरु कृपां सपदि संसृतौ जगन्नाथस्वामिन्।।
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्।।[५४]

मानवजीवनं बुधैः विश्वसम्पदुच्यते। इयं सम्पत्तिः इदानीं भीतभीता विद्यते। मानवो हिंसया भीतस्सन् स्वाभाविकं कार्यं कर्तुं न शक्नोति। सर्वत्राऽपि अपवञ्चना मानवान् दुःखयति। सज्जनाः प्रतिक्षणं शापितास्सन्ति, ते तु चिन्तासन्ततितन्तुजालनिविडे निमग्ना दृश्यन्ते सज्जना दुर्जनैरवहेल्यन्ते। अतो हे जगन्नाथ! स्वीयया दयादृष्ट्या तेषां दुःखं न्यूनं करोतु।[४] भारतस्य मूल्यानि विलुप्तानि दृश्यन्ते। यत्र विश्वबन्धुत्वमुद्घोष्यते तत्राद्य अहिंसाया नग्नताण्डवं जायते, 'सत्यमेव जयते' इत्युद्घोषणमपि अद्य विलुप्तप्रायमेव। शुक्लस्य कविता विश्वबन्धुत्वभावनयानुप्राणिता वर्तते। सत्य-अहिंसागौरवगायकः रमाकान्तः जगन्नाथं पृच्छति।

या विश्वबन्धुता साभिमानमुद्घुष्टासीत्
महिमानमहिंसा या च जगति भजमानासीत्।
यः सत्यपरिश्रमजयो गीयते स्माऽस्माभिः
क्वासौ विलीयते ब्रूहि जगन्नाथस्वामिन्
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्।।[५५]

डॉ. शुक्लस्य हृदयं जनमानसस्य दुःखेन द्रवीभूतमस्ति, सः स्वीयम् आराध्यं जगन्नाथं तद्दुःखानुभूतिं कारयति। जनानां दुःखानि शमयितुं च प्रार्थयते प्राश्निकरूपेण–

हे विश्वरूप! नैजं रूपं किं नो पश्यसि
हे दीनदयालो! दीनजनान् किं नो पश्यसि?
हे सर्वव्यापक! किं सहसे सर्वस्य शुचं
कुरु नः सत्पथगानाशु जगन्नाथस्वामिन्।
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन्[५६]

कविशुक्लेन कवितायामस्यां विश्वजनीनविकृतीनां दुरवस्थानाञ्च

चित्रणं कृतमस्ति। कविर्दुःखपारावारे निमग्नः, दुरवस्था विश्वशान्तये बाधिकाऽस्ति, अनया विश्वगौरवस्य क्षतिर्जाता। अस्माकं सांस्कृतिकदायस्य हानिर्जायते। स जगन्नाथं सत्पथप्रदर्शनाय प्रार्थयते। भक्त-भगवतोः चरमा परिणतिः दर्शनीयाऽस्ति, सहैव कवेः उदात्तभावनया विभूषितस्य हृदयस्यापि दर्शनं जायते। अस्यां कवितायाम् अष्टौ पद्यबन्धाः सन्ति। अस्या रचनाकालः ६.६.१९९१ ई. खैष्टाब्दः वर्तते।

स्वतन्त्रतायाः स्वर्णजयन्ती

कविशुक्लप्रणीतेयं रचना 'अर्वाचीनसंस्कृतपत्रिकायां' १९९८तमे वर्षे प्रकाशिता, २०००तमे खैष्टाब्दे इयं रचना' संस्कृत स्वातन्त्र्यस्वर्णसौरभम्-पत्रिकायां प्रकाशिता।[५७] स्वतंत्रभारतस्य पञ्चाशत् वर्षानन्तरं रचितायामस्यां कवितायां स्वतंत्रताया मानवीकरणं कृतमस्ति। अस्यां रचनायां स्वातन्त्र्यस्य वीराणां बलिदानं पराक्रमञ्च संस्मृत्य कृतज्ञतां ज्ञापयति कविः किञ्च पञ्चाशत् वर्षाणां विकाशं, विनाशमपि सूचयति। निजसर्वस्वमर्पितवतां लक्ष्मीबाई-भगतसिंह-सुखदेव-ऊधमसिंह-चन्द्रशेखर-अशफाकउल्ला खाँ-पं. रामप्रसाद बिस्मिलसदृशाणाम् असख्यंवीराणां पराक्रमं स्मारयति इयं कविता।

यैर्देशस्य कृते समर्पितं निजसर्वस्वं
दर्शितवन्तो ये चाङ्ग्लेभ्यः पराक्रमं स्वम्।
तान् स्मारयति स्वतंत्रतायाः स्वर्णजयन्ती
सम्प्राप्तेयं स्वतंत्रतायाः स्वर्णजयन्ती॥
क्रान्तिकारिणां तपस्विनां वै विविधतपस्याः
हुतात्मभिर्या कृता देशमातुर्वरिवस्याः।
ता अर्चयति स्वतंत्रताया स्वर्णजयन्ती
सम्प्राप्तेयं स्वतंत्रतायाः स्वर्णजयन्ती॥[५८]

कविर्देशभक्तिपरिपूतायां राष्ट्रियचेतनासमन्वितायाञ्च कवितायामस्यां स्वतंत्रताया स्वर्णजयन्त्या मानवीकरणं कुर्वन् वर्तमानदुर्दशां वर्णयति। स्वतंत्रतायाः अनन्तरं देशे विकासस्य प्रयासो वर्धितः। बहुविधनव्यविकासे सत्यपि चतुर्दिक् विविधविनाशः दृश्यते—

देशे क्रमशो जातो बहुविधनव्यविकासः
किञ्च दृश्यते हन्त! चतुर्दिक् विविधविनाशः।
बोधयतीदं स्वतंत्रतायाः स्वर्णजयन्ती
सम्प्राप्तेयं स्वतंत्रतायाः स्वर्णजयन्ती॥[५९]

राष्ट्रमद्य सङ्कटापन्नं विद्यते, राष्ट्रस्य कृते पुरा हुतनिजसर्वस्वानां महती सङ्ख्या आसीत् परमद्य जना तस्यैव राष्ट्रस्य रक्तं पिबन्ति। देशसेवाऽद्य लुण्ठनपर्यायभूताऽस्ति। येन केन प्रकारेण स्वार्थे लिप्ताः देशसेवकाः लुण्ठनकर्मणा आत्मानं समर्धयन्ति देशं च गर्ते पातयन्ति।

रक्तदायिनो नाम्ना कृत्यै रक्तपायिनः
देशसेविनो नाम्ना, कृत्यैर्देशभक्षिणः।
पदे-पदे विवशा विवशा दृक्पथं नयन्ती
सम्प्राप्तेयं स्वतंत्रतायाः स्वर्णजयन्ती॥[६०]

देशे भ्रष्टाचारसमस्या सुरसा इव मुखं विशदयन्ती स्थिताऽस्ति। सर्वकारीयकार्यालयेषु उत्कोचं विना कार्यसिद्धिरेव न भवति। उत्कोचेन उचितानुचितं कार्यं कारयन्ति। अधुना उत्कोचे शक्तिः वर्तते।[६१] उत्कोचः एव भ्रष्टाचारं जनयति। व्यापारिणः शस्यानि कोशे स्थापयन्ति, अभावे सति महार्घरूपेण तस्य विक्रयं कुर्वन्ति। शासनमपि अपवञ्चनं रोद्धुं नास्ति समर्थम्। यतो हि शासनमपि तत्कर्मणि लिप्तमस्ति, अद्य अमेरिका सदृशाः देशाः भारतस्य अर्थव्यवस्थया भीतभीतास्सन्ति। भारतस्य विकासक्रमः (विकासदर) सामान्यादपि अधिकः वर्तते। परं भ्रष्टाचारेण अत्रत्या स्थितिः विध्वंसकरी कृता। एवमेव भ्रष्टाचारो भविष्यति चेत् अर्थव्यवस्थाऽपि निम्नस्तरे आयास्यति, भ्रष्टाचारेणैव भारते राजनीतिक्यस्थिरता दृश्यते। स्वतन्त्रतायाः स्वर्णजयन्ती मानवीकरणरूपेण उत्कोच-भ्रष्टाचारादिकुकृत्यानि देशात् पृथक्कर्तुं कामयते।

दूरे भवतात् देशात् दुष्टो भ्रष्टाचारः
दूरे भवतात् देशान्निन्द्योत्कोचाचारः।
निर्दिशतीदं स्वतन्त्रतायाः स्वर्णजयन्ती
सम्प्राप्तेयं स्वतंत्रतायाः स्वर्णजयन्ती॥[६२]

भारतस्य अखण्डतां द्रढयितुं सङ्कल्पस्यावश्यकता वर्तते। दुष्टानां

कुत्सिकर्मणां कृते दण्ड आवश्यकः। स्वतन्त्रताप्राप्तेरनन्तरमपि अस्माकं मातृभूमिः खण्डिता जायते। स्वतंत्रतायाः स्वर्णजयन्ती अस्मत्सीम्नि कवचरूपेण पूर्णनिष्ठया च अस्माकं राष्ट्ररक्षायै आह्वानं करोति।

रक्षत देशं मनसा वचसा किञ्च कर्मणा
सीमान्तेषु भवत सज्जा आवृता वर्मणा।
आह्वयतीदं स्वतंत्रतायाः स्वर्णजयन्ती
सम्प्राप्तेयं स्वतंत्रतायाः स्वर्णजयन्ती॥[६३]

रोलाच्छन्दसि रचितेयं कविता कवेः राष्ट्रियचेतननया संवलिता विद्यते। कविः राष्ट्रस्य समस्यानां वर्णनं कृत्वा स्वकीयां संवदेनां प्रकटयति। कविना शुक्लेन रचितायामस्यां कवितायां अष्टौ श्लोकाः सन्ति, लहरीकाव्येनाऽपि इयं ज्ञायते। कवितामाध्यमेन राष्ट्रस्य पञ्चाशत् वर्षाणाम् उन्नतिमवनतिञ्च कविः उत्तोल्य प्रदर्शयति।

भारतस्य विजयोऽयम्

भारतस्य विजयोऽयम् कविता कवेः राष्ट्रियभावनापरकरचनासु प्रमुखाऽस्ति, कवितायामस्यां कविना अहिंसया भारतस्य स्वतंत्रताप्राप्तिः, भारत-पाकयुद्ध घटना (१९६५,१९७१, १९९९), परमाणुपरीक्षणानि च भारतस्य विजयरूपेण चित्रितानि, किञ्च कवेः समस्यासमाधानार्थं तटस्थभावनायाः वर्णनमपि विद्यते। कवितायां कवेः राष्ट्रम्प्रति अप्रतिमा प्रेमभावना, देशोन्नतये उदात्तकामनाऽपि दृग्गोचरीक्रियते पाठकैः। भारतेन अहिंसाबलेन आङ्ग्लशासनम् उच्चाटितम्।

क्रुद्धं हिंसाबलं जितं किल सत्याहिंसाबलतः।
आङ्ग्लशासनं खलूच्चाटितं भारतस्य विजयोऽयम्॥[६४]

न केवलं एतावदेव-१९६५तमे खैष्टाब्दे लाहौरविजयम्, दिसम्बरे १९७५ तमे खैष्टाब्दे च नवतिसहस्रसङ्ख्याकानां सैनिकानां बन्धनमपि भारतस्य विजयशृङ्खलाचक्रमेव। तद्यथा-

पञ्चषष्टितमवर्षेऽस्माकं पश्चिमोत्तरे वीराः
पदचर्यया गता लाहौरं, भारतस्य विजयोऽयम्॥
एकसप्ततौ दिसम्बरे किल नवतिसहस्रं पाकाः।
बद्धा निरागसां हन्तारो, भारतस्य विजयोऽयम्॥[६५]

देशस्यात्मसम्मानाय, गौरवाय वैभवयुतायाः संस्कृतेः रक्षायै देशवासिषु सुरक्षाभावं जागरयितुम् अथ च देशस्य प्रगतौ योगदानाय परमाणुपरीक्षणं सञ्जातम्। अद्य 'भारतम्' विश्वस्य षष्ठं शक्तिसम्पन्नं राष्ट्रं जातम्। इन्दिरायाः प्रधानमंत्रित्त्वे १९७४तमे खैष्टाब्दे अटलबिहारीवाजपेयी महोदयस्य प्रधानमंत्रित्वे च ११.५.१९९८ तमखैष्टाब्दे परमाणुपरीक्षणं भारतस्य विजयः।

वारद्वयं पोखरणगर्भे ह्यणुविस्फोट[६६] परीक्षा।
स्वीयसाधनैः सफला जाता, भारतस्य विजयोऽयम्॥

भारतस्य अग्नि-नाग-त्रिशूलसदृशाः मिसाइलशक्तयः शत्रून् अहर्निशं तर्जयन्ति। सागरे युद्धपोतानामवतरणं जल-स्थल-आकाशेषु निरलसवीराणां देशरक्षा अस्माकं विजयं प्रदर्शयति। कारगिलविजयं तु वीरान् प्रेरयति। कवेः कविता आत्मानेव निश्चिन्तयति देशरक्षातत्परभटानां भारतं द्रष्टुं च कथयति।

मा चिन्तां कुरु रमाकान्त! सागरे वियति भूपृष्ठे।
निस्तन्द्रा जाग्रति वीरास्ते भारतस्य विजयोऽयम्॥[६७]

कविः भारतस्य विजयेन आश्वस्तः दृश्यते परं सः भ्रष्टाचार-मूल्यवृद्धि-आतङ्कवाद-उत्कोच-निर्धनता-वृत्तिहीनता-वञ्चना-मिथ्याचारादि प्रवृत्तीनां शमनं कृत्वा विजयमिच्छति। तन्मते प्रदूषणसमस्यायां निवारितायां सत्यां भारतस्य विजयः।

बाह्यमान्तरं प्रदूषणं नो नागरिकान् बाधेत।
अभयं यदि तेषां हृदि विलसेद्भारतस्य विजयोऽयम्॥[६८]

देशस्य नेतारः धर्म-जाति-भावना-भाषादि भेदैः जनान् लुण्ठयन्ति। भारतजनतायाः लुण्ठनं न भवति चेत् भारतस्य विजयः।

यदि च विदूषकनिभा नायका जनतां नो लुण्ठेयुः।
धर्मजातिभाषाविभेदतो भारतस्य विजयोऽयम्॥[७०]

अद्यतन-समाजे एकतायाः महती आवश्यकता वर्तते। 'भारतम्' वैविध्यपूर्णं राष्ट्रं वर्तते। अस्माकं संस्कारेष्वपि वैविध्यं विद्यते। एकात्मकस्वरूपस्य आवश्यकतामनुभूय कविसंवेदनाऽपि कामयते-

वेशभूषयोपासनपद्धत्याशनेन संस्कारैः
भिन्ना अप्येकतां भजेयुर्भारतस्य विजयोऽयम्॥[७१]

कवेः मनीषा भारतं शिक्षयितुं जनान् सत्कार्याय प्रेरयितुं च वर्तते। कृषिक्षेत्रेषु सस्य-बहुलता अपि भारतस्य विजये अमूल्यं योगदानं प्रददाति, अधुना वृत्तिहीनता युवकान् दुःखयति तन्निवारणं भवति चेत् भारतस्य विजयः। अविचला, देशभक्तिः भारतं 'भा' रतं करिष्यति। औद्योगिकविकासेन अर्थव्यवस्था विकसिता जायते अर्थव्यवस्था च कमपि राष्ट्रं उन्नतिपथं नयति। विज्ञानं, साहित्यं अध्यात्मसम्पन्नता च भारते जृम्भन्ताम्। ''निजभाषा उन्नति अहै सब उन्नति को मूल बिन निज भाषा ज्ञान के मिटत न हिय को सूल'' इति भारतेन्दुहरिश्चन्द्रस्य वचनं स्मारयन् कविः राष्ट्रभाषायाः उपेक्षां न कर्तुं प्रेरयति। अटलबिहारीवाजपेयी महोदयेन हिन्दीभाषायामेव स्वीयोद्बोधनं प्रदत्तं संयुक्तराष्ट्रसङ्घे।[७२] वाजपेयीमहोदयेन विनूतनं कार्यमेतत् सम्पादितम्। कविशुक्लस्य मतेऽपि राष्ट्रभाषास्नेहः अत्यावश्यकः।

पठतु जनो यां कामपि भाषां किन्तु राष्ट्रभाषाम्प्रति
नैवोपेक्षां हृदा धारयेत् भारतस्य विजयोऽयम्।।[७३]

स्वतन्त्रतायाः किमपि मूल्यं नाऽस्ति, कश्चिदपि पारतन्त्र्यं नेच्छति। गोस्वामितुलसीदासस्य पङ्क्तिः ''**पराधीन सपनेहु सुखनाहीं**'' सर्वेषु स्वतन्त्रताभावं पोषयति। प्रत्येकमपि मुनष्यः, नागरिकः स्वतंत्रतां कामयते।

स्वतंत्रतां यः कामयते सम्पूर्णजगद्देशानाम्।
सदा वर्धतां सदा राजतां भारतस्य विजयोऽयम्।।[७४]

राष्ट्रभावसमन्विता इयं कविता सार(१६,१२)च्छन्दसि रचिताऽस्ति। कविः स्वयमेव रचनायाः अन्ते लिखति यत् - ''इयं रचना दिल्ली-संस्कृत-हिन्दी-सिन्धी-पञ्जाब्युर्दूकादमीभिः दिल्लीस्थे 'शाह आडिटोरियमे' त्यभिधे सभाभवने १६.१२.१९९८ तारिकायां समायोजिते 'विजयदिवसे' पठिताऽसीत्''[७५] अस्यां रचनायाम् एकविंशतिपद्यानि सन्ति यानि च १६.१२.१९९८ तमे खैष्टाब्दे, ८-१०पद्यानि ४.७.१९९९ तमे खैष्टाब्दे च रचितानि।

कवेः मङ्गलकरी भावना सरलया भाषया निबद्धाऽस्ति, भारतविजयार्थं कविना नाना विषयाः स्वीकृताः, न कोऽपि विषयः त्यक्तः, महता मनोयोगेन सावधानतया च कवेः लेखनी भारतविजयं प्रदर्शयति।

प्रणम्याः कारगिलवीराः

'प्रणम्याः कारगिलवीराः' शीर्षकान्विता रचना कारगिलरणक्षेत्रे भारतरक्षकाणां वीराणां कृते कार्तज्ञं समर्पयति। या काऽपि घटना समकालीनं घटनाचक्रं प्रभावयति सा कवेः वर्ण्यविषयिणी जाता अस्यां कवितायां अस्माकं वीरसैनिकानां शौर्यगाथा वर्तते, यैश्च गूढप्रवेशिनां संहारः कृतः। कविना वीराणां आत्मोत्सर्गस्य वर्णनं कवितायां 'वीरः वीरेण पूज्यते इति रूपेण कृतमस्ति। एवम्प्रतीयते यत् कविः कारगिलक्षेत्रे गत्वा प्रत्यक्षं वर्णयति।

कारगिलक्षेत्रे प्रविष्टशत्रूणां निष्कासनाय कारगिलवीराणां समर्चनायै कवेरुद्घोषः-

अकस्मात्प्राविशन्नस्मद्गृहे गूढप्रवेशा ये।
स्वदेशात्तान् बहिष्कर्तुं प्रचेलुः कारगिलवीराः[७६]॥

बटालिक-द्रास-मश्को-कक्सरक्षेत्रेषु अस्माकं वीराणामुत्साहः अभूतपूर्वः वर्तते।

बटालिक-द्रास-मश्को-कक्सरक्षेत्रेषु लीनानाम्।
रिपूणां दुर्दशां चक्रुः समिद्धाः कारगिलवीराः[७७]॥

पाकसैनिकेषु कृतान्ता इव वर्तन्ते अस्माकं वीराणां प्रहाराः-

दिशन्तो दुर्विपाकं पाककितवानां प्रयाणैस्स्वैः।
जगर्जुर्दुर्गमक्षेत्रे कृतान्ताः कारगिलवीराः[७८]॥

वीराणामनेनोत्साहेन समर्पणेन च भारतीयजनमानसे शौर्यजागरणं कारितं कविना।

अरीन् विद्रावयामासुः शठान् शिक्षापयामासुः
खलान् प्रध्वंसमायासुः प्रणम्याः कारगिलवीराः
अहो मे मातृभूमे रक्षणार्थं स्वीयसर्वस्वम्।
बलिं चक्रुः कथं ते विस्मृता स्युः कारगिलवीराः[७९]॥

कवेः श्रद्धाञ्जलिः वीराणां स्मरणं प्रतिपदं कारयति अस्माकं वीराः पाक-नागानां कृते नकुलाः, मयूराः, वैनतेयाः इव वर्तन्ते। अस्माकं वीराः सिंहाः सन्ति। 'शठे शाठ्यं समाचमरेत्' इत्यस्य पाठोऽपि कारगिलवीरैः पाठितः।

"शठे शाठ्यं विधेयं" "दुर्जनः शाम्येन्न चोपकृतैः।
"वधार्हश्चाततायी"-वेदयन्ते कारगिलवीराः[८०]॥

वीररससमन्वितायां कवितायां कारगिलवीराणां गौरवं गायन् कविः नतमस्तको वर्तते, सः पाकिस्तानं पाकसैन्यप्रमुखं च सावधानं करोति।

शृणुध्वं पाकनेतारः शृणुध्वं पाकबलपतयः।
यदीच्छथ शं तदा नो कोपनीयाः कारगिलवीराः॥
श्रृणुध्वं निस्त्रपा आतंकवादप्रेरिताः मूढाः।
इमे जाग्रति दिवानक्तं सशस्त्राः कारगिलवीराः[८१]॥

कविना निरलसानां भटानां कर्त्तव्यनिर्वहणताया राष्ट्रभक्तेश्च वर्णनमकारि। कवेः सन्देशः **'दुर्जनः उपकारेण न शाम्येत'** इति वीराणां कृते वर्तते। मातृभूमेः रक्षार्थं वीरैः स्वीयं सर्वस्वमर्पितं किञ्च भारतं एकतासूत्रे गुम्फनस्य महत्कर्म सम्पादितम्। सौरवकालिया-हनीफुद्दीनसदृशाः वीराः स्मर्तव्याः एव।

हनीफुद्दीनसौरवकालीयाहूजास्ताथा चान्ये।
महोत्साहा रवेर्मण्डमभिन्दन् कारगिलवीराः॥
रणे क्षतविक्षताङ्गा अप्यदम्योत्साहपरिपूर्णाः।
जिगीषापूरितात्मानः प्रचण्डाः कारगिलवीराः॥[८२]

कवितापठनेन अद्यापि तद्दृश्यं स्मृतिपथमायाति, अस्माकं सैनिकैः साकं यत् दुर्व्यवहारकर्म समाचरितं तत्तु सर्वथाऽपि कुत्सितं न्यक्कृतं च। भटानां शरीराणि धूम्रदण्डिकया ज्वालितानि, तत्कर्णेषु रक्तलौहदण्डं स्थापितम्, तेषामक्षीण्यपि ज्वालितानि, दन्ताः अस्थीनि च त्रोटितानि, तेषां गुप्ताङ्गमपि तैः कर्त्तितम्। दानवतायाः नग्नताण्डवं सम्पादितं पाकिस्तानेन मानवाधिकाराणामुल्लङ्घनं कृतं, जिनेवासन्धिरपि उल्लङ्घितः।[८३] सौरवेण साकं अर्जुनराव-भँवरलालबगारिया-भीखाराम-भूलाराम-नरेशसिंहानां च क्षताङ्गानि शरीराणि मानवाधिकाराणामुल्लङ्घनसाक्षिभूतान्यासन्।

सौरभकालियामहोदयेन साकं पञ्चसैनिकाः सप्ताहत्रयं यावत् निर्ममानिर्वचनीय-यातनाभिः मारिताः ९.६.१९९९ तमे वर्षे तेषां क्षताङ्गानि भारताय समर्पितानि। सौरवस्य जनकः एन. के. कालियामहोदयः तद्दृश्यं स्मृत्वा अद्यापि अश्रूणि प्रवाहयति। महद्दुःखानुभूतिः तस्य जायते। तत

आरभ्य सः अन्ताराष्ट्रियन्यायालये पाकसैनिकान् दण्डार्थं प्रयतते। कांग्रेस-सपा-भाजपासदृशाणि दलान्यपि तत्साहाय्यं नाचरितवन्तः। कालियामहोदयेन अन्तर्जालमाध्यमेनाऽपि एतदर्थं कार्यं प्रारब्धम्। तेन **(पेटिशन आन लाइन. काम/एल.टी.कालिया/पेटिशन एच. टी. एम. एल.)** इत्याख्ये अन्तर्जाले अन्ताराष्ट्रियाभियानं सञ्चालितम्।

केन्द्रियसर्वकारेण (जुलाई) षड्विंशतिः तारिका कारगिल-विजयोपलक्ष्ये विजय-दिवसत्वेन उद्घोषिता, कारगिलयुद्धे अनेके सैनिकाः वीरगतिं प्राप्ताः। कविशुक्लस्य राष्ट्रप्रेमपरकप्रत्यग्ररचनया यत्र कविकर्मणः दर्शनं भवति तत्रैव भारतीयहृदयेषु राष्ट्रीयतायाः भावोऽपि अभिव्यज्यते।

रमाकान्त त्वया चान्यैः कवीन्द्रैरीडिता काव्यैः
सदा स्थास्यन्ति पूजार्हा अमर्त्या कारगिलवीराः॥[८४]

प्रशासनोपेक्षाशरव्यीभूता अद्य सैनिकपरिवाराः कारगिलवीराणां परिवारस्य उत्साहवर्धनेनैव तान्प्रति श्रद्धाञ्जलिः सत्यपूरितो भविष्यति। अनेनैव वीराणामपि उत्साहवर्धनं भविष्यति। विजातीच्छन्दसि रचितायां कवितायां ३० पद्यानि सन्ति। अस्याः रचनापूर्तितिथिः २६.७.१९९९ वर्तते। इयं कविता राष्ट्रप्रेमपरिपूरितानां राष्ट्रसमुपासकानाञ्च कृते आनन्ददायिनी वर्तते। सहजशैल्याः प्रयोगः कवितां जनसामान्यवेद्यां करोति, कवेः भावाः प्रत्यक्षमिव प्रतिभान्ति।

भारतस्य जनता समीक्ष्यते

कविवरशुक्लेन स्वीये 61 तमजन्मदिवसोपलक्ष्ये रचिता इयं कविता भारतीय जनमानसस्य जागरूकतां प्रदर्शयति। जनतायाः समीक्षकत्वं कविना प्रतिपादितम्, भारतमुन्नतिपथतोऽवनतिम्प्रति नीतवतां कुकृत्यानि जनता परीक्षते, निरीक्षते समीक्षते च। **''कस्याऽपि राष्ट्रस्याखण्डता प्रगतिश्च तज्जनमानसस्य एकतायां परिलक्षिता भवति''**[८५]। तथ्यमिदं वैदिकऋषयोऽपि सम्यक्तया जानन्ति स्म। कवेः शुक्लस्य कविताऽपि तादृशमेव चिन्तनं प्रस्तौति-

को नु देशगरिमाणमीहते को नु भारतसुखानि काङ्क्षति।
को रिरक्षिषति राष्ट्रियैकताम् भारतस्य जनता समीक्षते[८६]**॥**

स्वदेशस्य खण्डनं नास्ति धर्मसम्मतम्। न्यायपालिकायाः न्यायाधीशाः अपि न्यायकरणे असमर्था भवन्ति, अफजलगुरुसदृशाणाम् आतङ्कवादिनां

मृत्युदण्डस्य विरोधं कुर्वन्ति तत्रत्याः मुख्यमंत्रिमहोदयाः। ते केवलं राजनीतिपरकस्वार्थं पश्यन्ति, छन्ददात्री प्रजा (विशिष्य मुस्लिमाः) कथं प्रभाविताः स्युरित्येव चिन्तयन्ति। ते राष्ट्रीयास्मितायाः हननं कुर्वन्ति, अफजलगुरुसदृशाणां राक्षसानां कृते तु मृत्युरेव दण्डः।

डॉ. शुक्लेन बहुवर्षपूर्वमेव भरतीयजनतायाः समीक्षकत्वं समीक्षितम्-

कैः कृतं च किल देशखण्डनं कैः क्रियेत पुनरस्य मण्डनम्।
कः करोति खलु दण्ड्यदण्डनं भारतस्य जनता समीक्षते॥[८७]

भारतीयभूमेः परतन्त्रताकारावासतः उन्मुक्तये भारतीयवीरैः स्वीयजीवनस्य सर्वा अपि सुखसुविधाः त्यक्ताः किञ्चात्मानमपि ते मातृभूमिचरणयोरर्पितवन्तः, नैकानि कष्टानि सोढ्वाऽपि तैः देशस्य स्वातन्त्र्यमवाप्तम्। तामेव स्वतन्त्रताम् अक्षुण्णां स्थापयितुम् अस्माकं जनतायाः परीक्षणं विडम्बनमेव।

आत्मतंत्र्यमिदमाप्तमस्ति यत् त्यक्तसर्वविधसौख्यसाधनैः।
तस्य रक्षणकृते नु के क्षमाः भारतस्य जनताः परीक्षते॥[८८]

अर्थप्रधानयुगेऽस्मिन् जनाः प्रवञ्चनेन, देशलुण्ठनेन, भ्रष्टाचारेण च पारतंत्र्योन्मुखाः दृश्यन्ते। राष्ट्रहितस्य सङ्कल्पना स्वार्थसाधने परिवर्तिता।

कोऽस्ति राष्ट्रहितसाधने रतः कश्च राष्ट्रपरिवञ्चने रतः।
केन कस्य किल कर्म किं कृतम् भारतस्य जनता समीक्षते॥
कश्च केन किमिति प्रसाद्यते कश्च केन किमिति प्रतार्यते।
कोऽस्ति कस्य प्रणिधिः क्व कीदृशो भारतस्य जनता समीक्षते॥[८९]

जनानामेकमेवोद्देश्यं जायतेऽद्य तत्केवलं धनार्जनमेव कुकर्मभिः जनतालुण्ठनेन च, शासनासन्दिकां प्राप्य जनाः जन्मजन्मान्तरेभ्यः धनमर्जयन्ति।

कृष्णवित्तविपुलार्जने रताः के च सन्ति मलिनाशया जनाः।
के हरन्ति जनता-धनं खलाः भारतस्य जनता समीक्षते[९०]**॥**

धर्माधिकारिणोऽपि राक्षसीं प्रवृत्तिं स्वीकृत्य राष्ट्रलुण्ठनकर्मणि रतास्सन्ति, कविशुक्लस्य काव्येऽपि एतच्चित्रणं दृश्यते-

देशलुण्ठनमहाव्रतस्थितान् लक्षकोटिधनवञ्चनाचणान्।
धर्मकञ्चुकधरांश्च राक्षसान् भारतस्य जनता निरीक्षते॥[९१]

डॉ. शिवनारायणद्विवेदीमहोदयः छद्मयुक्तवेशभूषां वैभवम्मनुते।[१२] अद्य शठमान्यता वर्तते, जनाः स्वार्थाय तान् पूजयन्ति। भारते एव उषित्वा तत्रत्यं भोजनं कुर्वन्ति परं शत्रोः शठपादचुम्बनरता अपि जनाः दृष्टिपथमायान्ति। ते तु शत्रुराष्ट्राय स्निह्यन्ति भारतं च गर्ते पातयन्ति-

कः करोति शठपादचुम्बनं सूचनां ददति के च शत्रवे
मन्वते च किल के भुवं प्रसूं भारतस्य जनता निरीक्षते[१३]॥

भारते गूढशत्रूणां प्रवेशः भारतस्य जनसंख्यां प्रभावयति, बंग्लादेशतः सम्प्राप्ताः नैके गूढशत्रवः भारतस्य शान्तये विघ्नमुत्पादयन्ति, विगतेषु दिवसेषु यत् गृहयुद्धं जातं तत्र त एव कारणीभूताः जाताः। पाकदेशतः काश्मीरमायान्ति नैके गूढशत्रवः ये च देशद्रोहं जनयन्ति। भारतीयजनतायाः जागरूकतायाः आवश्यकता वर्तते।

आततायिपवनाशनाशनो वैनतेय इह कोऽस्ति नायकः।
राष्ट्रशत्रुपरिपातनोत्सुको भारतस्य जनता प्रतीक्षते[१४]॥

राष्ट्रधनं पित्र्यधनमिव मन्वाना नेतारोऽपि भारतीयजनताजनार्दनेन समीक्ष्यन्ते विविधप्रवञ्चनाकृत्यैरपि तेषामुदरपूर्तिर्न जायते। जातिजन्य-रिपुताप्रसारणे ये सिद्धाः सन्ति तान् भारतीयजनता समीक्षते। सर्वमपि निर्वाचनसमये इयं जनता विवेकिनी भूत्वा परीक्षते। चतुर्षु वर्णेषु विभाजिता इयं जनता अद्य सहस्रजातिषु विभक्ता जाता। समाजविघटनमेका समस्या विद्यते। राष्ट्ररक्षा सर्वोपरि वर्तते, अस्याः भावनायाः रक्षा अस्माभिः प्राणपणेन करणीया, भारतीयजनता तु गुणान् पूजयति-

स्युः कदात्र किल पूजिता गुणाः नैव लिंगमथ नो वयो नृणाम्।
राष्ट्ररक्षणपरैकमानसा भारतस्य जनता प्रतीक्षते।।[१५]

कवितायाः अन्तिमसप्तश्लोकेषु कविना जनतायाः कामनाः व्यक्ताः, इमाः कामनाः पूरिताश्चेत् भारतं स्वस्थतमं भूत्वा समृद्धिं लप्स्यते। नक्सलसमस्यापूरिते भारते नक्सलिभिः प्रतिदिनमपि हत्यानां नूतनानि प्रतिमानानि प्रतिष्ठाप्यन्ते, कविः शुक्लः भारतं शान्तं पीडाविहीनं कर्तुं इच्छति।

नार्तपीडनमिहास्तु कुत्रचित् नाप्युपद्रवपरम्परा स्फुरेत्।
नैव वञ्चकजयः प्रतिष्ठतां भारतस्य जनता समीहते[१६]॥

समेऽपि स्वस्थाः, शिक्षिताः सन्त उद्यमशीलाः स्युः। वृत्तिहीनता-पीडा न कंचित् पीडयेत्।

नास्तु कश्चिदिह रोगपीडितः नास्तु कश्चिदिह चाप्यशिक्षितः।
नात्र वृत्तिरतहितोऽस्तु कश्चन भारतस्य जनता समीहते[९७]॥

भारतीयपरम्परा कर्मणि विश्वसिति, योगेश्वरः कृष्णः कर्मणः शिक्षां प्रयच्छति, कर्मठता प्रसन्नतायाः हेतुः वर्तते। आधुनिककाले सज्जनानां दुर्दशा, आततायिनां तस्कराणाञ्च प्रतिष्ठा भवति। तस्कराणां संरक्षणं क्रियते, समाजस्य विघटकतत्त्वानि कदाऽपि प्रतिष्ठितानि न भवेयुः, इत्येव कामयते कविः। भारते सत्यस्य जयघोषः स्यात् न तु अनृतस्य, दुष्टता सर्वदाऽपि पीडिता भवतु, वीरता राष्ट्ररक्षिणी स्यात्, राष्ट्ररक्षणं अस्माकं परमो धर्मः, राष्ट्रस्यास्तित्वे सति अस्माकमस्तित्वम्, सर्वैरपि राष्ट्रचिन्तनं पूर्वं करणीयं स्वार्थचिन्तनं तु सर्वस्यान्ते स्यात्। "**राष्ट्रस्य रक्षायै तत्स्वाभिमानाय यादृशेऽपि सहयोग करणीय एव।**"[९८] राष्ट्रमभिलक्ष्य कवेः कामना-

सत्यमेव जयतान्न चानृतम् आर्जवं जयतु नैव दुष्टता।
वीरता जयतु राष्ट्ररक्षिणी भारतस्य जनता समीहते[९९]॥

विंशशताब्द्याः अन्तिमकालः, एकविंशति शताब्याश्च प्रारम्भिककालः दुष्टानां असज्जनानाञ्च कुकृत्यताण्डवमयम् आसीत्। येन केनाऽपि प्रकारेण अर्थोपाजनं जनानां लक्ष्यमासीत्, दुष्टाः दुष्कर्मसु एव वीरतां प्रदर्शयन्ति। कविः राष्ट्रपरककामनाः कुरुते-

राष्ट्रमस्तु सुखशान्तिपूरितं राष्ट्रमस्तु सुदृढं सुरक्षितम्।
राष्ट्रमस्तु सुयशः समृद्धिमत् भारतस्य जनता समीहते[१००]॥

अस्यां कवितायां कविना भारतीयजनमानसस्य वेदना व्यक्ता भारतीयानां समस्याश्च सम्पादिताः, कथमस्माकं राष्ट्रं सुरक्षितम्, शान्तं भवितुं शक्नोति तदर्थं काव्यकौशलेन उपायाः प्रस्ताविताः, डॉ. शुक्लस्य राष्ट्रियं व्यक्तित्वं कवितायां मुखरीभूतम्। समीक्षात्मकशैल्या रचिता इयं रचना स्वर्णिमभारतस्य नवनिर्माणाय नवीनां संङ्कल्पनां प्रस्तौति। 'रथोद्धता' छन्दसः प्रयोगो वर्तते। अस्याम् त्रिंशद् राष्ट्रियभावनापरकश्लोकाः सन्ति, तत्र प्रत्येकमपि श्लोकः कवेः शुक्लस्य विविधभावपूर्णा समीक्षां प्रस्तौति।

स्वतंत्रदेशः सुतरां विभाति

श्रीशुक्लस्य 'स्वतन्त्रदेशो सुतरां विभाति' शीर्षकाविन्ता रचना देशस्य शोभाभिवृद्धये उपायान् प्रयच्छति। कवेरनुसारं कस्यापि देशस्य समृद्धये नेतारः, श्रमिकाः, कृषकाः, निरलससैनिकाः, विद्वांसः उद्योगाः च बहुमूल्यं योगदानं दद्युः परं ते वास्तविकरूपेणापि कर्त्तव्यपरायणाः स्यु।

सुनेतृभिः कर्मकरैः कृषाणैः सुसैनिकैर्नित्यमतन्द्रितैश्च।
सुशिक्षयोद्योगगृहैर्बुधैश्च स्वतंत्रदेशः सुतरां विभाति[१०१]॥

अस्माकं देशे (भारते) न्यूनसंख्याकाः सुनेतारः सन्ति, येषां तपोबलेन अयं देशो विभाति, भारतधरायाः वन्दनार्थं कविः उपर्युक्तान् हेतून् महत्त्वपूर्णान् मनुते।

भारतीयन्यायपालिका निष्पक्षतया स्वकीयं कार्यं करोति, भारतस्य लोकतान्त्रिकसंस्थाः भारतस्य प्रसिद्धिं वर्धयन्ति। कवेः रचना तदेव लक्षयति-

स्वतंत्रनिर्वाचनसाधनेन यथापराधं ध्रुवदण्डनेन।
सुनिश्चितेनाथ च पोषणेन स्वतंत्रदेशः सुतरां विभाति[१०२]॥

प्रतिभा नवमुन्मेषं प्रददाति, प्रतिभापूरितोऽयं देशः। कस्यापि देशस्य विकासे तत्रत्या प्रतिभा महद्योगदानं करोति, अस्माकं देशस्य प्रतिभा न केवलं भारते अपितु समग्रेऽपि विश्वे भारतीयध्वजां दीर्घमुत्तोलयति, कलाविकासेन सहैव स्वतन्त्रदेशे विभाति, यत्र देशभक्तजनता सततं देशोन्नतये चिन्तयति तद्राष्ट्रं विशिष्टतया विकसितो जायते। कस्यचित् देशस्य अवनतिः भवति चेत् तत्र अधोलिखितानि कारणानि भवन्ति।

न वृत्तिकष्टैर्न च जातिवादैः न धर्मविद्वेशकरैश्च कार्यैः।
न देशनिन्दाकरनिन्द्यकृत्यैः स्वतंत्रदेशः सुतरां विभाति॥[१०३]

वृत्तिहीनता, जातिवादः धर्मविद्वेषकर्म, देशनिन्दाकार्यम् इत्येतानि कारणानि देशस्य अवनतिं कारयन्ति। कवेः मनीषा वर्तते यत् एतानि कार्याणि त्याज्यानि। अन्ते तावत् संरक्षणेन पोषणेन च स्वतन्त्रदेशः सुतरां विभाति-

अतः प्रयत्नेन सुरक्षणीयः सदा स्वकार्यैः परिपोषणीयः।
स्वतन्त्रता रक्षणदक्षनृणां स्वतन्त्रदेशः सुतरां विभाति[१०४]॥

अस्यां कवितायां देशभक्तकविः राष्ट्रभक्तये कानि कार्याणि साधिष्ठानि, कथं राष्ट्रं विभाति इत्येव वर्णयति, कवेः मनीषा लोककल्याणचिन्तने वर्तते,

समाजस्य रक्षणार्थं सः विविधोपायान् उपायनीकरोति, कथं राष्ट्रोन्नतिः स्यात् सर्वदा तदेव चिन्तनं काव्ये करोति, सर्वान् सन्मार्गम्प्रति च प्रेरयति।

अस्यां कवितायां ५ श्लोकाः विद्यन्ते ये च उपेन्द्रवज्राच्छन्दसि रचितास्सन्ति, अस्याः रचनाकालः-२५.१.२००७ तमखैष्टाब्दः वर्तते।

३.३ महापुरुषसम्बन्धिनीनां रचनानां समीक्षणम्

नमः शास्त्रिणे वीरधुर्याय तस्मै

कविशुक्लमहोदयस्य परिचयं तस्य कविताः कारयन्ति। यद्यपि प्रौढावस्थायां कविः विशिष्टां प्रसिद्धिमलभत तथापि नववयसि रचिता कविता अपि सन्ति विशिष्टभावभरिताः। प्रायः पञ्चाशत् वर्षाणि पूर्वं रचिता रचना अपि कवित्वशक्तिसम्पन्नाः सन्ति। कवितासु यो भावो यच्च सारल्यं तदद्यापि प्रत्येकमपि पाठकस्य मानसतोषायालं भवति। २/१०/१९६५ तमे दिनाङ्के भुजङ्गप्रयातवृत्ते रचिता कविता राष्ट्रोन्नायकान् प्रति श्रद्धाञ्जलिरिवास्ति। द्वितीयस्य प्रधानमन्त्रिणः श्रीलालबहादुरशास्त्रिमहोदयस्य गौरवमेवं गायति कविशुक्लः-

यमालोक्य लोकस्य सेवासु सक्तं,
सदा मातृभूमिः प्रसन्ना बभूव।
व्यधाद् यः समस्तं जनौघं स्वभक्तं
नमः शास्त्रिणे वीरधुर्याय तस्मै॥[१०५]

श्रीलालबहादुरशास्त्रिमहोदयः एकस्तादृशो जनः यस्य जीवनाधारः "**सरलजीवनम् उच्चविचारः**" इति वर्तते। समाजाय सततं चिन्ताशीलो जनः श्रीलालः देशस्य प्रधानमन्त्रिपदे विराजमानोऽपि एकेन सामान्यपुरुषेणेव जीवनमनयत्। कविशुक्लो विशिष्टजनस्यास्य स्मृतौ नैजकवितापुष्पाञ्जलिमेव समर्पयति।

सदा सञ्चितं येन वृत्तं न वित्तं
सदा स्वीकृतं चार्जवं नैव दैन्यम्।
प्रियं यस्य कार्यं न चैव प्रभुत्वं
नमः शास्त्रिणे वीरधुर्याय तस्मै॥[१०६]

सुखे दुःखे चापि महतामेकरूपता भवति। नैककष्टानि सोढ्वापि ते सुखिन इव दृश्यन्ते। यथोक्तम्-

उदये सविता रक्तो रक्तश्चास्तमये तथा।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥[१०७]

इत्थमेव सरलजीवितेन श्रीलालेन निजमद्भुतं जीवनं लोकसेवार्थकमेव चिन्तितम्। श्रीशुक्लो निजविचारान् तान् प्रतीत्थं प्रकटयति-

न मम्लौ यदीयं मुखं निःस्वतायां
प्रसन्नं न चित्तं च मन्त्रित्वलाभे।
सदा कर्मठो यः स्थितप्रज्ञ आसीत्
नमः शास्त्रिणे वीरधुर्याय तस्मै॥[१०८]

१९६५तमवर्षे भारतपाकिस्तानयुद्धे पाकिस्तानसेनाद्वारा आक्रमणं कृतम्। एषा घटना कश्मीरप्रान्तस्थस्य छम्बस्थानस्यासीत्। तदानीं पाकसेना भारतं प्रति निरन्तरं वर्धमाना आसीत्। एतादृशविषमपरिस्थितौ श्रीशास्त्रिवर्यः भारतसेनामादिशत्- **"अस्मत्सेना यथा कर्तव्यतामिदानीमपेक्षितां जानाति तथाऽचरेत् पाकिस्थानं च शठे शाठ्यं समाचरेदिति नीतिज्ञा वयमपीति बोधयेत्।"**

एतादृशादेशानन्तरं भारतीयसेनायां यो विश्वासोऽवर्धत स नूनमेव विजेतृगीतगानपूर्वकं शत्रुपराजयायालमासीत्। तेनोत्साहेनैव त्रिरंगध्वजोड्यनेन भारतीयसेना पुनरपि युद्धे नैजां पताकां प्रादर्शयत्। भारतीयानामेतत्साहसमालोक्य सद्य एव पाकसेना पलायिता। श्रीमतां शास्त्रिमहोदयानामेतत्कर्तव्यमतीव शुभं करणीयं च विज्ञाय कविः श्रीशुक्लो निजविचारानेवं प्रकटयति-

सदा यस्य वक्तृत्वपीयूषधारां
निपीयाऽभवन् देशभक्ता अमर्त्याः।
अभूवंश्च शत्रोः कृते ते कृतान्ताः
नमः शास्त्रिणे वीरधुर्याय तस्मै॥[१०९]

यदा श्रीशास्त्रिमहोदयो भारतस्य प्रधानमन्त्रिपदे व्यलसत् तदा देशे खाद्यान्नसमस्या आसीत्। स हि **"जय जवान जवान जय किसान"** इति घोषेण कृषिकर्मप्रोत्साहनाय विषेशबलं प्राददत्। आत्मविश्वासो भवतु भारतीयेषु इति विचारेण स नैकयोजनानां सञ्चालनं कृतवान्-

सदा कर्षकैर्मन्त्रदो यः प्रतीतो
गृहीतो भटैर्यः समुत्साहपुञ्जः।
मतः शान्तिकामैश्च यः शान्तिदूतो
नमः शास्त्रिणे वीरधुर्याय तस्मै॥११०

आजीवनं प्रतिकूलपरिस्थितिभिस्सह क्रीडनरतस्य शास्त्रिवर्यस्य जीवनं मानवतायाः कृते समर्पितमासीत्। कविः तत्समर्पितजीवनाय निजभावानेवं समर्पयति-

दृढं यन्मनो वज्रराशिं बभार
कृशं यच्छरीरं हिमाद्रिं दधार।
बलिं चाकरोज्जीवनं यो जनन्यै
नमः शास्त्रिणे वीरधुर्याय तस्मै॥१११

कविशुक्लस्य कवितेयं राष्ट्रप्रेमपूता वर्तते। स सर्वदैव सरलजीवन आसीत्। तदीयं जीवनमद्यापि अनुकरणीयमस्ति राष्ट्रोन्नतये विश्वशान्त्यर्थं चेति कविस्स्मारयति।

नेहरुं तं स्मरामो वयं सादरम्

भारतस्य प्रथमप्रधानमन्त्रिणः श्रीजवाहरलालनेहरूमहोदयस्यापि स्मरणं कविः करोति। स नेहरूमहोदयस्य कर्तृत्वं व्यक्तित्वं च यथार्थरूपेण प्रकटयति। वस्तुतः पुराकालिक इतिहासो नयनगोचराभावकारणाद् वर्णने अस्पष्टो भवति किं च सम्मुखस्थितानां घटनानां वर्णने वास्तविकता तु भवत्येव । तथैवात्र कविशुक्लोऽपि विशेषपुरुषं तं स्मरति। आचार्य ब्रह्मानन्दशुक्लमहोदयो नेहरूमहाभागस्य जीवनसम्बद्धं ''नेहरूचरित''काव्यं लिलेख। अत्र श्री रमाकान्तशुक्लोऽपि नेहरूमहोदयस्य कार्येण प्रभावितो वर्तते। स स्वविचारान् प्रकटयति-

जङ्गले मङ्गलं येन सम्पादितं
येन संकीर्णवृत्तिस्सदा न्यक्कृता।
शत्रवो येन मित्रीकृताः स्वस्मितै-
र्नेहरुं तं स्मरामो वयं सादरम्॥११२

नेहरूमहोदयो समानता-स्वतन्त्रता-सम्प्रभुतादिप्रमुखतत्त्वानां पूरक

इवासीत्। स राष्ट्राणां मैत्रीभावस्य समर्थक आसीत्। स विश्वबन्धुत्वकामनाधर आसीत्। नेहरूमहोदयस्य विचार आसीद् यत्कदापि हिंसाबलेन समस्यायाः समाधानं नैव भविष्यति। स मानवतावादी आसीत् अत एव स शान्तिसमर्थक आसीत्।

शान्तिस्थापनाय स उक्तवान्- अद्य अस्माकं समक्षं द्वयमुपस्थितमस्ति- शान्तिः युद्धं च। अस्माभिरेकं चेयम्। यदि युद्धं चिनुमस्तर्हि परमाणुयुगे मानवजातेर्विनाशो निश्चितः। तर्हि शान्तिरेव वरेण्या। कविशुक्लो भावानिमानेवं व्याहरति-

येन विश्वस्य मञ्चे समुद्घोषितो
विश्वबन्धुत्वमन्त्रो जगत्पावनः।
शान्तिदूतश्च लोके सदा यो मतो
नेहरुं तं स्मरामो वयं सादरम्॥[११३]

नेहरूमहोदयो न केवलं भारतीयलोकतन्त्राधारभूत एवापि तु तत्संवर्धकः पोषकश्चाभूत्। सर्वश्रेष्ठस्य भारतीयलोकतन्त्रस्य अद्वितीयस्वरूपनिर्धारणे नेहरूमहोदयस्य परिश्रमश्चिन्तनं च भवतो प्रमुखकारणम्। **''चाचा नेहरु''** राजनीतेः विद्यायाश्च प्रियभक्त आसीत्। कविः शुक्लमहोदयस्तस्य वाणीपटुतामेवं कथयति-

यः पितृव्यः प्रियो बालकानां मतो
यः प्रजातन्त्ररक्षाभटः सम्मतः।
राजलक्ष्मीप्रियो यश्च वाणीप्रियो
नेहरुं तं स्मरामो वयं सादरम्॥[११४]

मानवतावादी श्रीनेहरूमहोदयः सर्वदैव शान्तिसंस्थापको व्यलसत्। स परमाणु-अस्त्राणां विरोधमकरोत्। स पञ्चशीलसिद्धान्तान्वयनेन भयकारकाणामस्त्राणां तिरस्कारपूर्वकं शान्तिं स्थापितवान्।

यस्य ताटस्थ्यनीतिः प्रसिद्धिं गता
पंचशीलेन यः सर्वपूज्यो बभौ।
पाटलश्रीः प्रिया यस्य चात्यन्तिकी
नेहरुं तं स्मरामो वयं सादरम्॥[११५]

सर्वधर्मभावः, सद्गुणान्वेषणं, शान्तिः, औदार्यम्, आध्यात्मिकताचिन्तनं

नव्यविज्ञानं च यत्र समवेतरूपेण लसन्ति, यो नैकग्रन्थानां प्रणेता, भारतोन्नतये विविधयोजनानां निर्माता, संस्कृतसमुपासको, गङ्गारक्षकः, पुरातत्त्व-साहित्यान्वेषकः, समस्यानां समाधाता, देशसेवायै सदा जागरूकः, देशसेवाव्रती खलु नेहरूमहोदयः अतः तम्प्रति श्रीशुक्लकवेः आदरभावः प्रकटीभवति।

शान्तिदूतो नेहरूमहोदयो विश्वपटले शान्तिमिच्छति स्म। कविशुक्लोऽपि तथैव आतङ्कमुक्तधारायाः कल्पनां करोति।

सन्तु सर्वत्र सर्वे सदा नन्दिताः युद्धदावानलो नैव लोकं दहेत्।[११६]

अद्यतनराजनीतिः दूषिता वर्तते, परं श्रेष्ठा नेतारोऽपि आसन् इति कविः कथयति-

एतदाप्तं मया, लभ्यमेतन्मया
नाशयिष्यामि तं, स्फोटयिष्यामि तम्।
ईदृशी नेतृवृत्तिर्न यस्य प्रिया
नेहरुं तं स्मरामो वयं सादरम्॥[११७]

एवं हि यथा खलु नेहरूमहोदयस्य सम्पूर्णजीवनं देशसेवायां यापितं तथैव कविशुक्लस्यापि तादृशचरितानां चित्रणेन कालः सुकालो भवति। प्रसादगुणोपेतया कवितयानया कविशुक्लः एकस्य महामानवस्य जीवनकथामिव व्याजहार।

तं सुभाषं स्मरामो वयं सादरम्

भारतमातुः सेवकभक्तेषु श्रीसुभाषस्य गणना सर्वप्रथमं भवति। तस्य जीवनं सर्वेषामपि देशवासिनां कृते भवति सर्वदैव प्रेरणास्पदम्। निरलसः श्रीसुभाषः सर्वदैव देशसेवायै एव नैजं जीवनं मनुते स्म। सुभाषघोषितो **'जय हिन्द जय भारत'** घोषोऽयं भारतं विश्वगुरुं प्रकर्तुं प्रेरयति। डॉ. के.एल. जौहरमहोदयानुसारं - **न खलु विश्वस्मिन् विश्वे कश्चन तादृशो बभूव यः श्रीसुभाषचन्द्रसदृशकार्याणि कर्तुं क्षमो जातः, यतस्स तु त्रिलक्षपरिमितयूनां संघटनद्वारा विशिष्टसेनानिर्माणं कर्तुं सफलोऽजायत।**[११८] येन च आङ्ग्लशासकानामत्याचारान्मुक्ताः कृताः सरला भारतीयाः। राष्ट्रसेवाभावपूर्णस्य श्रीसुभाषस्य जीवनं सदा संघर्षमयमासीत्, तदाधारेणैव स कुशलनेतृत्वगुणालङ्कृतो जातः।

कविः श्रीशुक्लमहोदयः देशवीराणां बलिदानं नैव विस्मरति। यथा

हि देशभक्ता देशसेवारताः समभवन् तथैव तेषां सादरं चरित्रं कविना वर्णितं विविधकविताभिः।

जानकीनाथपुत्रस्तथाधीतिमान्
तेजसः पुञ्ज आशैशवाद्यो बभौ।
मातृभूस्वास्थ्यसंवर्धनायागदं
तं सुभाषं स्मरामो वयं सादरम्।।[११९]

श्रीसुभाषचन्द्रबोसमहोदयस्य पिता आङ्ग्लशासकैः **'राय बहादुर'** उपाधिना विभूषित आसीत्, किञ्च पुत्रः सुभाषस्तमुपाधिं समीचीनं नामन्यत। राजनीतितः पुत्रो दूरं भवतु इति मत्वा पिता तं भारतीयप्रशासनिकसेवापरीक्षार्थम् इंग्लैण्डदेशं प्रेषितवान्। १९२० तमवर्षे श्रीसुभाषः परीक्षामिमां समुत्तीर्य सर्वानपि चकितानकरोत्। स तदानीम् तादृशः केवल एको विद्यार्थी आसीत् यः परीक्षामुत्तीर्णवान्। तस्मिन्नेव समये गांधीद्वारा प्रचालितस्य असहयोगान्दोलनस्यापि स सदस्यो जातः। एवं हि स मातृभूमिरक्षायै १९२१ तमवर्षे भारतमागतः।

आइसीएस. साफल्यमाप्त्वाप्यहो
शासनासन्दिकानादरं योऽकरोत्।
मातृभूम्यर्चनं यस्य पुण्यव्रतं
तं सुभाषं स्मरामो वयं सादरम्।।[१२०]

'नवजवान भारत सभा' इत्यस्याः सभाया अध्यक्षेण सुभाषचन्द्रेण करांचीस्थाने कांग्रेसदलस्याधिवेशने 'अखिलभारतीय नवजवान कान्फ्रेंस' आयोजितम्, अत्र च गांधिमहोदयस्य उदारनीतिर्निन्दिता। १९३१ तमवर्षे मार्चमासस्य २७ दिनाङ्के स्वकीयोद्बोधने श्रीसुभाषोऽभाषत- **"अस्माकं परमं कर्तव्यं भवेद् यद्वयम् आर्थिकसामाजिकराजनीतिकादिसर्वविधबन्धनेभ्यो मुक्ता भवेम, अर्थात् सर्वतन्त्रस्वतन्त्रा। अहं भारते समाजवादि- गणतन्त्रमिच्छामि।**[१२१]**"** सुभाषचन्द्र उच्चनिम्नवर्गयोः समानतामभिलक्ष्य समायोजनाकाङ्क्षी आसीत्। कविः तस्येदं कर्तव्यमेवं दर्शयति-

नैव दैन्यं न वा याचनाप्यार्जवं
नीतिरास्ते खलानां पुरः सन्नृणाम्।
शक्तिराराधनीयेति यस्यास्ति
धीस्तं सुभाषं स्मरामो वयं सादरम्।।[१२२]

सुभाषचन्द्रः जापानदेशे सुप्रसिद्धस्य रासबिहारीबोसस्य सहयोगेन **'आजाद हिन्द फौज'** संघटनमघटयत्। स स्वयमेव तस्याः सेनायाः सेनापतिरासीत्। कविः श्रीसुभाषस्य वीराणामुत्साहाय कृतं कार्यं तथैव जानाति यथा हि मयूराणां मोदायोत्साहाय च मेघा आचरन्ति। अतः कविशुक्लमहोदयो रूपकालङ्कारेण निजभावान् सुभाषं प्रत्येवं प्राकटयत्-

येन चाजाद हिन्देति नाम्ना बलं योजयित्वाद्भुतं कर्म सम्पादितम्।
वीरचेतोमयूराम्बुदं हर्षदं तं सुभाषं स्मरामो वयं सादरम्॥१२३

''तुम मुझे खून दो मैं तुम्हें आजादी दूँगा'' इति उद्घोषकः सुभाषः देशस्वतन्त्रतायै जनानामाह्वानमकरोत्।

दीयतां मे स्वरक्तं भवद्भिस्मै-
रात्मतन्त्र्यं भवद्भ्यो मया दास्यते।
आजुहावेति यो भारतीयान् जनान्
तं सुभाषं स्मरामो वयं सादरम्॥१२४

परतन्त्रा अपि भारतीया घोषेणानेन स्वतन्त्रा इव अजायन्त। स हि साक्षाद् देवसहायतामेव कृत्वा उत्साहवर्धको जातः।

यस्य चात्यन्तमोजःप्रदैर्भाषणैः
पारतन्त्र्यार्दिता भारतीया जनाः।
कर्तुमैच्छन् स्वदेशं स्वतन्त्रं द्रुतं
तं सुभाषं स्मरामो वयं सादरम्॥१२५

१९४३ तमवर्षे श्रीसुभाषो **''दिल्ली चलो''** इति घोषेण भारतीयेषूत्साहं दधाति। स १९४३ तमवर्षे एव अक्टूबरमासस्य २१ दिनाङ्के सिंगापुरे **''स्वतन्त्रभारतस्य''**संस्थापनामकरोत्। एतद्द्वारैव भारतीयस्त्रिरंगध्वजो ''राष्ट्रियो ध्वजो'' घोषितः, श्रीरवीन्द्रनाथटैगोरकविता च ''राष्ट्रगानं घोषितम्।'' नेता सुभाषः अण्डमानं गत्वा त्रिरंगध्वजं राष्ट्रं समर्पयति। स तत्र द्वीपानां नवीनं नाम संस्थापितवान् तद्यथा- अण्डमानद्वीपं शहीदद्वीपं भवतु, निकोबर्सद्वीपं च स्वराज्यद्वीपं भवत्विति घोषणामकरोत्। श्रीशुक्लः देशवीरस्य सुभाषस्य एतत्कार्यं स्मरणीयमनुकरणीयं च कथयति-

'एत दिल्ली'मिति प्रोद्गता यस्य वाग्
भारतीयान् समुत्साहिनोऽकारयत्।
यं ग्रहीतुं न शक्तास्तथा चाङ्गलाः
तं सुभाषं स्मरामो वयं सादरम्॥[१२६]

श्रीसुभाषचन्द्रबोसमहोदयः १९४५ तमवर्षे अगस्तमासस्य १८ दिनाङ्के रात्रौ अष्टवादने तेइपेई सैन्यचिकित्सालये चिरनिद्रायां सुप्तः इति जनाः कथयन्ति। भारतमातुः सुपुत्रस्यास्य विमानदुर्घटनायां मृत्युरभवदित्यत्र विवादोऽस्ति। सोऽन्तिमक्षणेष्वपि देशस्मरणपूर्वकं देशरक्षणस्वतन्त्रताप्राप्तिप्रभृतिसन्देशान् प्रददात्। अतः निरन्तरं स्मर्योऽयं देशवीरः। कविधिया च-

यस्य भक्तैरिदानीमपि स्मर्यते
जृम्भितं वीरभावस्य यस्याद्भुतम्।
योऽमरो राजते मातृभूमेः सुतः
तं सुभाषं स्मरामो वयं सादरम्॥[१२७]

तस्य स्मृतिर्विजयते पुरुषोत्तमस्य

कविना श्रीरमाकान्तशुक्लमहोदयेन दिल्लीस्थिते हिन्दीभवने समायोजिते पुरुषोत्तमजयन्ती-अवसरे रचनाया अस्याः पाठः कृतः। अस्यां रचनायां पुरुषोत्तमदासटण्डनमहोदयस्य जीवनसम्बद्धाः प्रेरकप्रसङ्गाः लिखिताः सन्ति। राष्ट्रसंरक्षणपरः श्रीपुरुषोत्तमदासटण्डनमहोदयः राष्ट्रस्योन्नतये नैककष्टानि असहत। तस्य स्मरणमपि कविना भावपूर्णरीत्या कृतम्-

यो राष्ट्रभक्तिपरिपूरितमानसः सन्
कारागृहस्य बहुकष्टततिं विषेहे।
दुःखे सुखे च किल यः स्थितप्रज्ञ आसीत्
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य॥[१२८]

स खलु राष्ट्रभाषाप्रेमी, अतः कविशुक्लस्तस्य राष्ट्रभाषाप्रेम संदर्शयन् देवभाषया तत्स्मृतिमजराममरां च विदधाति।

राजर्षिमान्यपदवी यमवाप्य जाता
धन्या मनोज्ञभरतावनिरत्नभूतम्।
हिन्दी-प्रचारमकरन्द-मधुव्रतस्य
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य॥[१२९]

स्मरामि ब्रह्मचारिणम्

कविवरशुक्लस्य 'स्मरामि ब्रह्मचारिणम्' शीर्षकान्विता कविता 'ब्रह्मचारि-पञ्चदशी' नाम्नाऽपि ज्ञायते। कवितायामस्यां देवेन्द्रस्वरूपनाम्ना ख्यातस्य ब्रह्मचारिनाम्नः महापुरुषस्य स्मरणं क्रियते। इदं भारतं महापुरुषाणां स्थलं वर्तते, स्वामिविवेकानन्द-महात्मागान्धि-भीमराव-भगतसिंहसदृशाः नैके महात्मानः भूमिमिमां विभूषितवन्तः। एतैः सर्वैरपि महात्मभिः आत्मकर्मणा सम्पूर्णे विश्वे स्वकीया ख्यातिः प्रसारिता। तादृशः एव कश्चन महात्मा- देवेन्द्रस्वरूपः (ब्रह्मचारी) वर्तते। हरियाणाप्रान्तस्य 'जींद' नामके स्थाने 'इंगराहा' ग्रामे ब्रह्मचारिणः जन्म अभूत्, तस्य मातुः नाम 'भागवन्ती' आसीत् जनकश्च कौशिकगोत्रीयः मोहनलालः कृषकः आसीत्। बाल्यावस्थायां 'दुनीचन्द्र' नाम्ना ख्यातस्य बालकस्य दीक्षानन्तरं नामपरिवर्तनं जातम्। ब्राह्मणवंशस्य अलङ्कारभूतं ब्रह्मचारिणं भूयो-भूयः कविः स्मरति।

योऽसावाजीवनं तप्त्वा तपो ब्रह्मण्यलीयत।
तं देवेन्द्रस्वरूपाख्यं स्मरामि ब्रह्मचारिणम्।।[१३०]

परमसंस्कृतस्य ब्रह्मचारिणः निर्मलं व्यक्तित्वम्, जनान् आकर्षति। अन्नक्षेत्र-संस्थासञ्चालकः, दानशीलः, परमवेदपाठी, परहितनिरतः, पण्डितानां सत्कर्त्ता, ब्राह्मणानां भोजकः क्रतूनाम् आहर्ता ब्रह्मचारी स्मर्यते। सर्वशुक्लोत्तरायां कविना महापुरुषाणां स्मरणं अनेकधा कृतम्। ब्रह्मचारिसदृशाणां महापुरुषाणां अस्मत्सु महानुपकारो वर्तते तस्यैव कृतज्ञतां ज्ञापयति कविः। ब्रह्मचारिणः व्यक्तित्वं वर्णयन् कविः वर्णयति-

कण्ठे यः कालकूटं शिरसि सुरधुनीं शीतभानुं च भाले
व्यालं वक्षःकपाटे गिरिवरतनयां वामभागे दधानः।
सोऽयं यस्येष्टदेवस्त्रिपुरविजयकृद्विश्वरूपः शिवोऽभूत्
तं देवेन्द्रस्वरूपं परहितनिरतं ब्रह्मलीनं स्मरामि।।[१३१]

देवेन्द्रस्वरूपब्रह्मचारी शिवस्य शभोरंशावतारस्य हनुमतो भक्तश्च विद्यते। । तीर्थदर्शनार्थं कवेः प्रेरणा पाठकान् प्रेरयति, वस्तुतः इयं कविता अस्मभ्यं धर्माचरणाय मार्गं ददाति, देवेन्द्रस्वरूपः साक्षात् धर्मावतारः आसीत्, तीर्थानां तीर्थमासीत्, सच्चारित्रिकः आसीत्। तद्यथा-

यद्यप्यासीत्स्वयं यो नियतमखपरो जङ्गमं तीर्थमेव
श्रद्धास्थासम्परीतः परमतिमहितस्तीर्थयात्रां स चक्रे।
गायत्रीजञ्जपूको जगदतिविमलैः स्वैश्चरित्रैः पुनानः
श्रीदेवेन्द्रस्वरूपः परहितनिरतः स्मर्यते ब्रह्मचारी[१३२]॥

अनुष्टुप्-वैश्वदेवी-शार्दूलविक्रीडित-स्रग्धराच्छन्दस्सु विरचितेयं कविता ७.९.२००६ तमईसवीयवर्षे कविना लिखिता हरियाणासंस्कृतकादम्या कुरुक्षेत्रे समायोजिते संस्कृतकविसम्मेलने च तस्मिन्नेव दिने श्राविता।

राजतां कालिदासः

इयं कविता संस्कृतसाहित्यस्य कविकुलगुरुं कालिदासं स्मरति, तेषां जयघोषं करोति। महाकविकालिदासः पाठकानाम् आदरं सदैव प्राप्नोति, रघुवंशे कविः कालिदासः रघुकुलवर्णनप्रसङ्गेऽतिसुखदां केकां वर्णयति, सीता-रामयोः पुष्पकयात्रा गगनपथतो भारत सुषमां चित्रयति मेघदूते च वसुधायाः विशिष्टं वर्णनं सम्पादयति, मेघदूतमेकं समग्रं भौगोलिकं काव्यं वर्तते। ग्रन्थद्वयमपि कालिदासकीर्तिं समग्रे विश्वे प्रसारयति, एतादृशं कालिदासं कविः स्मरति।

कालिदासेन सर्वदा स्वीयकाव्येषु लोककल्याणमेव वर्णितम् - **"काले-काले भवतु सुखदा वृष्टिरस्मद्धरायाम्"** इत्यस्य केवलमेकम् उदाहरणं विद्यते- **"सर्वो दुर्गं तरतु सकलो भद्रमाप्नोतु लोकः"** एतादृशानि भद्रकारकाणि वचनानि सर्वदैव कालिदासकाव्येषु दृश्यन्ते, येन तेषां मनीषा स्पष्टीभवति। सकलजनतामङ्गलकामनेव कालिदासस्य अभिलाषा, स चित्ते-चित्ते राजते, कालिदासस्य भावना-विश्वबन्धुत्वभावना वर्तते। तत्काव्येषु एकत्र स्वभर्त्रा विप्रलब्धा सीता विभाति, अन्यत्र भरतजननी शकुन्तला, क्वचित् पादपान् सिञ्चन्ती शैलकन्या पार्वती, एतादृशैः रम्यवर्णनैः काव्यैः कविकुलगुरुकालिदासः विभाति।

कविना रमाकान्तशुक्लेन कवेः गौरवगाथा लघुकवितायां मुखरीकृता। कवेः सङ्कल्पना दीर्घतरा वर्तते, चतुर्षु श्लोकेषु कविवाणी, मेघदूत-अभिज्ञानशाकुन्तल- रघुवंशसदृशाणां ग्रन्थानां संक्षेपेण वर्णनं विदधाति।

तद्यथा–

एकत्रास्ते भरतजननी विप्रलब्धा स्वभर्त्रा
तेजोमूर्त्तिर्लवकुशसुताऽन्यत्र सीता विभाति।
सिञ्चन्त्यास्तेऽपरत इह सा पादपान् शैलकन्या
रम्यैः काव्यैःकविकुलगुरू राजतां कालिदासः॥[१३३]

लौकिक-संस्कृतकाव्यपरम्परायां कालिदासः विश्वविश्रुतः अनादिष्वन्यतमो वर्तते। अभिज्ञानशाकुन्तलस्य मङ्गलपद्ये ईश्वरस्य अष्टमूर्तीनां प्रणतसुखदं दृश्यं वैज्ञानिकतया प्रदर्शयति–

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥[१३४]

अष्टानां मूर्त्तीनां कीर्तिम्, रामसेतोः कीर्तिं च प्रसारयितुः कवेः कालिदासस्य कीर्तिरतुलनीया विद्यते। अस्माकं समेषां पूज्यः कालिदासः राजताम्। समेषां हृत्सु अमरतां प्राप्नुयात् इत्येव कवेः आशयः।

साक्षाद् दृश्यं प्रणतसुखदं वन्दमानोऽष्टमूर्तिम्
ग्रथ्नन् काव्ये शुभहिमनगं कीर्तयन् रामसेतुम्।
गृह्णन् पक्षं सकलजनताशाठ्यहीनप्रवृत्तेः
अस्मत्पूज्यः कविकुलगुरू राजतां कालिदासः॥[१३५]

मन्दाक्रान्ताच्छन्दसि रचितायामस्यां कवितायां चत्वारो श्लोकाः सन्ति, ये च कवेः कालिदासस्य मेघदूतं स्मारयन्ति। कवेः संवेदना महापुरुषाणां चरणकमलेषु कृतज्ञतारूपं पुष्पगुच्छं समर्पयति। इयं कविता १७.१.२००८ तमईसवीये वर्षे कविना विरचिता तस्मिन्नेव दिने च राजस्थानसंस्कृताकादम्या मनोहरपुरे आयोजिते संस्कृतकविसम्मेलने श्राविता।

३.४ विविधदेशप्रदेशनगरवर्णनपरकरचनानां समीक्षणम्

कविना आचार्यरमाकान्तशुक्लेन स्वकीये जीवने विविधानि देश-प्रदेश-नगराणि साक्षीकृतानि। कवेः यात्रा विविधेषु नगरेषु चर्चिता। तासु यात्रासु कविना तत्तद्देशानां वर्णनं बहुसुन्दरतया कृतम्।

विविधदेशप्रदेशनगरवर्णनपरकरचनासु उज्जयिनीयं जयति, राजस्थानम्, फिलाडेल्फिया, जाबालिपुरं चल, धर्मक्षेत्रे कुरुक्षेत्रे, तुरीनोस्मृतिसपादशतकम्, पोलकहालस्थटर्नरहाउसवातायनात्, एडिनबरानगरोत्तमे इत्येताः कविताः सन्निहितास्सन्ति। एतासु कवितासु कविना तत्तद्देशस्य संस्कृतिः, प्रकृतिः, समाजः, दृश्यस्थलानि, परम्पराश्च वर्णिताः। इमाः कविताः कवेः भ्रमणशीलतां वर्णयन्ति, सहैव कवेः सामाजिकसहभागितामपि प्रदर्शयन्ति। विविधेषु अलङ्कारेषु कवेः कथ्यं स्पष्टं भवति। विम्ब-प्रयोगा अपि दर्शनीयाः इति मन्ये।

उज्जयिनीयं जयति

भारतवर्षस्य सप्तमोक्षदायिनीषु नगरीषु उज्जयिनी अपि एका नगरी अस्ति, यस्याः गौरवगानम् आप्राचीनकालात् विविधेषु साहित्यिकग्रन्थेषु वर्णितम्। कविशुक्लः तस्यां पावनधरायां १९८१ तमवर्षात् प्रतिवर्षम् प्रायः कालिदाससमारोहे भागं गृह्णाति। तत्रत्याः ऐतिहासिकसंस्कृतेः, प्राकृतिकदायस्य च गौरवगानं कविना त्रयोदश गीतिषु सम्पादितम्। छन्दोबद्ध-रचनायाः पठनेन श्रवणेन भारतस्य पावनधराम्प्रति प्रेमानुरागः सहजतया जायते। कवितानां पठनेन न केवलं पावनधराम्प्रति स्नेहोऽपितु पशुपक्षिणां प्रत्यपि स्नेहानुरागः स्वाभाविकतया जायते। अश्मभ्योऽपि प्रेमकलायाः उपदेशकस्य कपोतपक्षिणः विषये कवेः लेखनी एवं लिखति -

पक्षप्रहारैश्चञ्चुश्लेषैर्गुटरगुटरगूँकारैः
मानैरनुधावनैरथो मदनाज्ञापालनचारैः।
द्वाभ्यां तथा तृतीयस्योत्सारणैर्यत्र सव्यूहः
अश्मभ्योऽपि हि प्रेमकलामुपदिशतिकपोतसमूहः[१३६]॥

डॉ. शुक्लस्य प्राकृतिकचेतनाऽपि कवितायां मुखरिताऽस्ति। कार्तिकमासे कोकिलध्वनिः[१३७], सारसपक्षीणां क्रेङ्कारः, मालविकानां सुमधुरहास्यम्[१३८], दिनकरमणि- चुम्बितकमलिनीनां विकासः, चमरपुच्छिकया खण्डित- कुसुमवर्षादि दृश्यानि बारम्बारं प्रेरयन्ति पाठकान्।

कविना अलौकिक्या ईश्वरप्रदत्तायाः भौगोलिकसुषमायाः चित्रणं कृतम्। माचनृत्यदर्शनोत्सुकानां देशप्रेमभावनाऽपि प्रकटिता कविना। कवेः शुक्लस्य

पद्यमिदं पठित्वा हिन्दीकवेः स्मरणमायाति।[१३९] प्राकृतिकसौन्दर्यम्। तद्यथा -

प्रतिवर्षं खलु यस्याः शिप्रातीरे विचलितधीरे।
'माच' दर्शनोत्सुकैर्मालवैः मेलाशीतसमीरे।
अविदिगतयामा रजनी नीयतेतरां निश्चिन्तम्
झंझावाते घनघनवर्षे वापि शीतले नीरे॥
अहो मधुरिमा, अहो प्रमोदो यस्या अतुलो नित्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥[१४०]

पुरुषार्थचतुष्टयप्रदात्र्या उज्जयिन्याः वर्णनम्, कालिदाससमारोहे उपस्थितरसिकजनानां चित्रणेऽपि कविः शुक्लः सिद्धहस्तोऽस्ति। उज्जयिनी धर्मार्थकाममोक्षप्रदात्री विद्यते। तद्दृश्यं यथा -

शिप्रास्नानं यत्र धर्मिणः कलिमलदारणनिपुणम्
अर्थकामिनो विपणिविभागं नानापण्यसुपूर्णम्।
कामकामिनोऽभिमतं स्थानं नवलविलासोल्लसितम्
मोक्षार्थिनो महाकालेशं ज्योतिर्लिङ्गं प्रथितम्॥
क्षीरसागरं यान्ति च रसिका नद्यो यथा समुद्रम्।
उज्जियिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥[१४१]

धर्मार्थिनः शिप्रास्नानाय उज्जयिनीं गच्छन्ति, अर्थेच्छुकाः विपणिविभागं परिपूरितां वीथिं च गच्छन्ति। कामकामिनः विलासोल्लासितयुतानि नूतनानि स्थलानि अन्वेष्य गच्छन्ति। अत्र प्रयुक्तस्य क्षीरसागरशब्दस्य अर्थद्वयं विद्यते - (१) क्षीरसागरं-समुद्रम्, (२) क्षीरसागरम्-कालिदाससमारोहस्य सांस्कृतिककार्यक्रमस्थलम्। बुधजनवन्द्या इयं विशाला उज्जयिनी जयति, अर्थात् सर्वोत्कृष्टा वर्तते।

जनानां मनसि विस्मय-श्रद्धापूर्णानां मन्दिराणां वर्णनं, सहैव आश्रमाणां वर्णनमपि कविलेखन्या जातम्।[१४२] उज्जयिनीधरायाः लोकोत्तरायाः कृष्णमृत्तिकायाः वर्णनं कविना नतमस्तकेन सम्पादितम्। वर्णनेऽस्मिन् - **'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'** जन्मभूमेः सर्वोत्कृष्टत्वं लक्ष्यते।[१४३]

कवेः शुक्लस्य शृंगारपूरितं वर्णनं दृष्ट्वा कवेः कालिदासस्य स्मरणं

सहृदयाः कुर्वन्ति। शृंगारस्य सूक्ष्मचित्रणं कवेः रसिकतां प्रस्तौति। यथा -

उदयन-वासवदत्ता-सेना-चारुदत्त-कलगाथाः
केकित्रासककबरीभाराः सुरभिलधूपसनाथाः।
लोलापाङ्गैर्लसितास्तन्व्यः श्यामा मध्येक्षामाः
श्रोणीभाराद्विलसितगमनाः तन्त्रीवादनकामाः॥
पदे-पदे साक्षात्क्रियन्ते यत्र सहृदयैर्नित्यम्॥[१४४]

अस्यां कवितायां कविना उज्जयिन्याः वर्णनसन्दर्भे कालिदासकृत मेघदूतस्य केचनांशाः स्मारिताः - श्रोणीभारात् अलसगमनाः, शिप्रावातः प्रार्थनाचाटुकार इत्यादीनि वाक्यानि कालिदासविरचितमेघदूतस्मारणे नाल्पानि। कवेः इयं रचना सारच्छन्दसि विरचिताऽस्ति, इदं छन्दो हिन्दीभाषायां प्रयुज्यते प्रायशः। अस्मिन् काव्ये बहूनाम् अलङ्काराणां प्रयोगः जातः यथा - श्लेषाऽलङ्कारः, उदात्तालङ्कारः उपमालङ्कारः, भाविकालङ्कारः। एते सर्वेऽपि अलङ्काराः चतुर्थेऽध्याये प्रस्तोस्यन्ते।

राजस्थानम्

'राजस्थानम्' शीर्षकान्वितायां कवितायां कविना राजस्थानप्रान्तस्य गौरवं वर्णितम्। ऐतिहासिक-सांस्कृतिक-साहित्यिकस्थापत्यकलाया अनुपमं स्थलं वर्तते राजस्थानम्। सप्तदश-पद्येषु विरचिता इयं कविता राष्ट्रस्य गौरवगानं करोति, राष्ट्रप्रेम्णश्चाद्भुतं संचारं प्रसारयति, राजस्थानं कर्मभूमिरूपेण ज्ञायते, राजस्थानस्य जनाः स्वकर्मनिरताः दृश्यन्ते। प्राकृतिकप्रकोपेन पीडिताऽपि अत्रत्या जनता, अत्रत्यश्रमिकाः सर्वदा देशस्योत्थाने संलग्नाः भवन्ति, राजस्थानीयपुरुषाणां वेशोऽपि अत्रत्यां विशिष्टतां जनयति-कविमुखादेव तद्वर्णनम् -

मुरकी-कमरी-पगड़ी-धोती-धौड़ीपादत्राणैः।
लसिता यस्य जना शोभन्ते नित्यं श्मश्रूत्थानैः॥
अश्मखण्डने मूर्तिविरचने शोभनगृहनिर्माणे।
यस्य श्रमिका नित्यं निरता मार्गाणां च विधाने॥
प्रकृतिकोपदलिता अपि नित्यम् विदधति देशोत्थानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥[१४५]

राजस्थानं वीराणां धरित्री विद्यते। बप्पारावल-राणासांगा-गोरा-बादलसदृशाः वीराः कवेः लेखन्या अस्यां कवितायां ललामीभूताः, येन च कवेः राजस्थानम्प्रति गौरवात्मकादरभावः प्रकटितः।

भक्तिसम्राज्ञी मीराबाई अस्यैव भूम्याम् अवतरिता, यया च भक्त्याः नूतना अवधारणा विकसिता।

''अस्मि प्रेमप्रमत्ताहं मम पीडां वेद न कश्चित्''[१४६]॥ मीरायाः प्रेमप्रात्रं कृष्णः वर्तते। राजस्थानस्य महिलानां वेशभूषामपि वर्णयति कविः -

घघरा-कञ्चुक, विन्दुशाटिका, गोटावृतवसनानाम्।
कटक-बोरला-नूपुर-नथनी-वलयाङ्गद-रशनानाम्॥
टड्डे-वाटे-बँगड़ी-कङ्कन-चूड़ा-हथफूलानाम्।
टीका-झुमका-हँसली-टिकली-कटिका रमझोलानाम्॥[१४७]

यदि मानवे चिकीर्षा भवति तदा किमपि कार्यं असाधनीयं न भवति, राजस्थाने समये-समये नैकाः समस्याः आयान्ति, याश्च तत्रत्यैः मानवैः कटिबद्धरूपेण समाधीयन्ते। तत्रत्या जनता दुरूहतरमपि कार्यं श्रमबलेन सहजतया कर्तुमुद्यता भवति। तद्यथा -

असमयवृष्टिं दुर्भिक्षं वा भूमेरूषरतां वा
वह्निवातभूकम्पावर्षणजनितानुपद्रवान् वा॥
पेयजलाभावं पशुचाराभावं वस्त्राभावम्।
समुचितशिक्षावसराभावं वृत्तिनिश्चयाभावम्॥
जेतुं यतते श्रमबलतो यन्नित्योत्साहनिधानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥[१४८]

राजस्थाने दिलवाड़ा-गोविन्द-बिहारिजी सदृशाणि दिव्यानि मन्दिराणि, आमेर-बीकानेर-जैसलमेरसदृशाणि दुर्गाणि, जोधपुरस्य जलमहलम्, उदयपुरस्य सरोवरम्, आमेरे च शीशमहलं भारते प्रभूतख्यातिप्राप्तानि वर्तन्ते। श्वेतरक्तपाषाणानथ धत्ते, यत्ताम्रनिधानम् तत्तु मनोज्ञमेव अतः राजस्थानं जयति, जयति अनेन सर्वोत्कृष्टत्वं ज्ञायते।

कविना राजस्थानस्य समग्रमपि चिन्तनं सप्तदशपद्येष्वेव सम्पादितम्। कवेः संवेदना तत्रत्यकृषकैः सह, श्रमिकैस्सह च विद्यते। राज्येषु ललामभूतमिदं राज्यम्। इयं कविता सारच्छन्दसि १३-४-१९८३ तमे वर्षे रचिताऽस्ति।

कविनेयं रचना तस्मिन्नेव दिने राजस्थानसंस्कृताकादम्या जयपुरे आयोजिते संस्कृतकविसमवाये श्राविता।

फिलाडेल्फिया

षष्ठं विश्वसंस्कृतसम्मेलनं फिलाडेल्फियायाः पेनसिल्वानिया-विश्वविद्यालये सम्पन्नमभूत् यत्र भारतसहितस्य समग्रविश्वस्य संस्कृतविद्वांसः सम्मिलिताः अभूवन्। अस्यां रचनायां कविना कविसम्मेलनस्य यत् सञ्चालनकार्यमकारि तस्यापि सङ्केतः कृतः। कवितायां फिलाड़ेल्फियानगरस्य प्राकृतिकशोभायाः, आतिथ्यसत्कारस्य, नगरसौन्दर्यस्य, ऐतिहासिकतायाश्च मार्मिकं चित्रणं चित्रितमस्ति। इयं रचना १९८६ तम ईसवीये वर्षे रचिताऽस्ति, अत्र रचिताः द्वाविंशतिश्लोकाः प्रतिपदं स्वकीयामुपयोगितां प्रदर्शयन्ति।

कविवरशुक्लस्य इयं विशेषता वर्तते यत् अयं यत्र कुत्राऽपि गतवान् देशे विदेशे वा, तत्रत्या जनाः तेन प्रभाविताः जाताः। तत्तद्देशस्य रम्यताचित्रणे, वैशिष्ट्यचित्रणे च तेन न काऽपि अल्पता कृता। विविधदेशप्रदेशनगर-वर्णनपरकरचनाः कवेः उक्तभावं पुष्यन्ति। प्राकृतिकचित्रणं कविकर्मणः अभिन्नम् अङ्गं विद्यते। कविः प्रकृतिं यथा पश्यति तथैव वर्णयति। फिलाडेल्फियानगरस्य प्राकृतिकी सुषमा कविं मोहयति। -

यत्र रिङ्गत्तरङ्गा 'डलेवर्' नदी
यत्र शोमेनि-सञ्ज्ञं च यूनां गृहम्।
मेपलैश्चैष्टनड्वृक्षकैः शोभिता
राजते शोभना सा फिलाडेल्फिया॥[१४९]

मेपल-चेष्टनटवृक्षाः तत्रत्यां शोभां वर्धयन्ति, प्रकृतिविलासेन फिलाडेल्फिया-नगरशोभा वर्धते -

''नित्यमेव प्रकृत्या विलासैर्युता, राजते सा सुरम्या फिलाडेल्फिया'' फिलाडेल्फियानगरस्य वास्तुकलाः तत्रत्याः गगनचुम्बिन्यः अट्टालिकाश्च कविमावर्जयन्ति।

या नभश्चुम्बिभिः काचशृंगारिभि-
नैंकखण्डैर्वणिक्कर्मगेहैर्युता ।
या डलेवर् नदीवीचिभिर्लालिता,
राजते सा सुरम्या फिलाडेल्फिया॥[१५०]

प्रजातंत्ररक्षाव्रतीति नाम्ना ख्यातस्य 'बैंजामिन फ्रेंकलिनमहोदयस्य' निवासात् फिलाडेल्फियानगरस्य प्रतिष्ठावर्धनं भवति।

यां प्रजातंत्ररक्षाव्रती श्रीयुतो,
बेन्जमिन्फ्रेंकलिन्-सञ्ज्ञकश्चिन्तकः।
स्वीयवासेन लब्धप्रतिष्ठां व्यधात्
राजते शोभना सा फिलाडेल्फिया॥"[१५१]

फिलाडेल्फियायां प्रजातंत्रस्योदघोषिका घण्टा स्थापिता वर्तते। **"यत्र घण्टा प्रजातंत्रसद्घोषिणी"**[१५२]।

भारतीयपरम्परायाम् 'अतिथिदेवो भव' इत्युद्घोषेण अतिथीनां सत्कारः क्रियते। अतिथिसत्कारः भारतीयसाहित्ये यत्र-तत्र वर्णितः। राज्ञा रघुणा विदुषः कौत्सस्य आतिथ्यसत्कारः इत्यस्योदाहरणं वर्तते। फिलाडेल्फियायामपि इस्कानसंस्थया, भारतीय क्लब इत्यनेन च वैष्णवपरम्परायां कवीनां सत्कारः कृतः। सत्कारेण अभिभूतः कविः फिलाडेल्फियानगरं 'बन्धुप्रिया'संज्ञया सत्करोति।

श्रीहरेरामकृष्णाश्रमेऽमेरिकादेशजै-
र्भक्तवर्यैश्च यस्यां बुधाः
स्वागतेनार्चिता वैष्णवेनाध्वना
राजते शोभना सा फिलाडेल्फिया॥
भारतीयक्लबेनातिथीनां भृशं
स्वागतं यत्र कृत्वा मनो निर्जितम्।
या हि बन्धुप्रिया संस्कृते साङ्ग्ले
राजते रम्यरूपा फिलाडेल्फिया॥[१५३]

तस्मिन् नगरे आगन्तुकानां कृते संगीतस्यापि व्यवस्था आसीत्। भारतीयसंस्कृतेः गौरवगाथा देश-विदेशेषु प्रसिद्धा विद्यते। तत्रत्याः नैके जनाः, भारतीयवाङ्मय -कला-संस्कृतिविषयकाः शोधकार्यं कुर्वाणाः सन्ति।[१५४]

तत्रत्यानां युवक-युवतीनां सौन्दर्ययुक्तं शरीरं, कान्तियुता चाऽभा निश्चिन्ततायाः भावं प्रकटयति। तत्रत्याः युवत्यः चिरयौवनाय प्रातः धावनमपि कुर्वन्ति -

यत्र यूनां मुखे शोभते यौवनं,
यत्र निश्चिन्तता मानसे क्रीडति।
यत्र घण्टा प्रजातन्त्रसद्घोषिणी
राजते शोभना सा फिलाडेल्फिया॥
ऊरुवक्षोनितम्बश्रियां विभ्रमैः
राजमार्गे प्रधावन्ति रम्भोरवः।
रक्षितुं स्वं शरीरं कृशं यत्र सा
राजते रम्यरूपा फिलाडेल्फिया॥[१५५]

फिलाडेल्फियानगरम् अतीव सुन्दरं स्वच्छञ्चास्ति। कवेः वर्णनं प्रत्यक्षमिव प्रतिभाति –

अङ्कितैतिह्यगाथाभिरालोकिनी,
शोभिताभ्रंल्लिहैरालयैः सर्वतः॥[१५६]

तत्रत्याः जनाः समयस्य सदुपयोगं कुर्वन्ति। षष्ठस्य संस्कृतसम्मेलनस्य अध्यक्षीयं भाषणं प्रो. रामचन्द्र दाण्डेकरमहोदयेन कृतम्। तेन 'अर्वाचीन-पत्रिकाऽपि' तदा लोकाय अर्पिता इत्यतः अर्वाचनीसंस्कृतपत्रिकायाः प्रसिद्धिः विदेशमपि गता। अस्मिन् सम्मेलने शुक्लमहोदयेन हिन्दीकवेः घनानन्दस्य रचना नैन्सीमुखात् श्रुता, इयं रचना वैदेशिकानां हिन्दी-प्रेमविषयं व्यनक्ति।

कवेः प्रयत्नैः समायोजितस्य संस्कृतकविसम्मेलनस्यास्य उद्घाटनं डॉ. रामकरणशर्मणा कृतम् अध्यक्षीयं च भाषणं डॉ. मण्डनमिश्रेण प्रदत्तम्।सञ्चालनं पुनः कविनैव कृतम्, तेन तत्र 'भाति मे भारतम्' गीतम्।

डॉ. शुक्लस्य इयं रचना संस्कृतम्प्रति तस्य अप्रतिमं कर्मठताम् अनुरागं च व्यनक्ति। कविना फिलाडेल्फियानगरस्य प्राकृतिकं चित्रणम् सम्मेलनस्य वर्णनञ्च चित्रात्मकशैल्या सम्पादितम्। सहैव फिलाडेल्फियानगरं साहित्यसंगीतकलानां त्रिवेणीं प्रस्तौति। स्रग्विणीच्छन्दसि रचिता इयं कविता भारताद् बहिः संस्कृतस्य स्थितिं प्रदर्शयति।

जाबालिपुरं चल

'जाबालिपुरं चल' शीर्षकान्विता रचना २२.१२.१९८८ तमईसवीये खैष्टाब्दे लिखिताऽस्ति। इयं कविता जबलपुरस्य साहित्यकाराणाम्, कवीनाम्,

साहित्यभाण्डागाराणां तेषां गाथानाञ्च सजीवं चित्रणं प्रस्तौति। अत्र कवेः राष्ट्रियभावनाऽपि दृष्टिपथमायाति। जाबालिपुरनगरं (मानवीकरणेन) डॉ. शुक्लम् आह्वयति, कवितायामस्यां षट् गीतयस्सन्ति। साहित्यिकानां तत्तद् कर्त्तृत्ववैशिष्ट्यञ्च अभिव्यनक्ति कवेः रचना, तद्यथा -

'कृष्णायन' कृद्द्वारिकाप्रसादमिश्रलसितम्
श्रीहीरालालजैनकृत-शोधमयूखसितम्।
हरिशंकरपरसाई व्यङ्ग्योक्तिविलासयुतम्
चौहान-सुभद्रा-राष्ट्रगीति-गरिमप्रथितम्॥
श्रीप्रभुदयाल-गोविन्ददास-साधनाङ्कितम्
श्रीकृष्णकान्त-राजेन्द्र प्रभृतिविद्वल्लसितम्
रामेश्वरशुक्लाञ्चल-नवरचनाप्रभाधरं
पुष्पा-लीना-चित्राकर्त्तृत्वविकासकरम्॥[१५७]

मध्यप्रदेशसंस्कृताकदम्या रानीदुर्गावतीविश्वविद्यालयस्य संस्कृत-पालि-प्राकृतविभागेन २२-२३.१२.१९८८ खैष्टाब्दे - 'राजेशखर शोध सङ्गोष्ठी' आयोजिताऽऽसीत्।[१५८] राजशेखरस्य योगदानविषयकं तथ्यं स्वीयया शोधपरकदृष्ट्या कवेः वर्णनाकौशलम् प्रस्तौति। तद्यथा -

योऽवन्तिसुन्दरीं परिणिनाय मुदितेन हृदा
अनुसन्दधते यं विश्वविपश्चिद्गणा मुदा।
येन ग्रथिता कर्पूरमञ्जरी नाट्यकृतिः
श्रद्धासुमानि यस्मै ददाति विद्वज्जगती।
अथ विद्धशालभञ्जिकोदयं यस्मात्प्राप्ता
यस्यास्ति काव्यमीमांसा नाम्नी कृतिराप्ता॥
रामायणमथ भारतं बालपूर्वं हि यस्य
मान्यं प्रबन्धषट्कं च विबुधसंसारस्य।
यस्मिन् वाणी व्यलसन्मुदिता वारम्वारम्
तं राजशेखरं यत्स्मरति प्रियकाव्यकरम्॥[१५९]

जाबालिपुरं प्रसिद्धं पवित्रं च साधनास्थलं विद्यते, एतत् अर्जुनपलाशसहकार प्रभृतिपादपलसितं वर्तते। देशस्य कृते सर्वस्वहोतृभिः युद्धवीरैः संवलितेयं भूमिः। अत्रत्यम् आयुधनिर्माणं भारतसैनिकबलप्रदं वर्तते,

दुर्गावती-विक्रमगाथाभिः उल्लसितेयं भूमिः। पापहारी नरसिंहोऽपि मन्दिरे अत्र वसति। शङ्करगाथाभिः रोमाञ्चं जनयति एतत् नगरम्। कविः जाबालिपुरगमनाह्वानं करोति। कवेः कविता कविसमवाये आमंत्रितकविभ्यः सूचनां प्रददाति यत् केचन कवयोऽपरिहार्यकारणेन नाऽत्र सम्प्राप्ताः।

कवेः शुक्लस्योदात्तकामनाभावः सर्वस्यान्ते उद्भूतः, तदानीं जबलपुरे 'तेजाबकाण्डम्' वार्तापत्रेषु प्रमुखत्वेन प्रकाशितम्। कवेः मनीषा एतादृशीणां दुर्घटनानां निषेधरूपात्मिकाऽस्ति।

मा भूस्तेजापःक्षेपघृणितघटनाऽत्र पुरे
स्यादत्र सदा शुभसौख्यसमृद्धिरतीव पुरे।
संस्काराणां धानीयं विलसतुतरां सदा
जागर्तु मनीषा जगदुद्धारायात्र सदा॥
धत्तामिदं पुरं कलासाहितीगरिमाणं
योगिनीमन्दिरं वितरतु जगते कल्पणम्
प्रार्थय शुद्धेन हृदा जगदीशं सृष्टिकाम्
मोदतां वर्धतां राजतां च जाबालिपुरम्॥[१६०]

कवेः शुक्लस्य इयं रचना देशस्य सुविकासाग्रणीगौरवयुतस्य नगरस्य गौरवं प्रस्तौति। अस्य ऐतिहासिकसंस्कृतिः देशप्रेमभावं वर्धयति।

धर्मक्षेत्रे कुरुक्षेत्रे

धर्मक्षेत्रे कुरुक्षेत्रे शीर्षकान्विता रचना आर्याच्छन्दसि विरचिताऽस्ति, अस्यां रचनायां अष्टौ श्लोकास्सन्ति। कुरुक्षेत्रे आयोजितस्य अखिलभारतीयप्राच्यविद्यासम्मेलनस्य चतुश्चत्वारिंशत्तमे अधिवेशने भागग्रहणाय कविः कुरुक्षेत्रनगरं गतः। प्राच्यविद्यासमुपासकानां समवायः कविम्प्रेरयति काव्यलेखनाय, विदुषां समवायः समग्रमपि भारतं एकत्वसूत्रे बध्नाति। तद्यथा-

एकनीडमिव जातं धर्मक्षेत्रं कुरुक्षेत्रम्।
नानास्थानसमागतविद्वत्कविभिर्द्विजैर्लसितम्॥[१६१]

कवितायां कवेः संवेदना वृत्तिहीनसमस्याग्रसितयुवकैस्साकं विद्यते ये प्राच्यविद्यां पठित्वा अधुना मार्जनीकर्म सम्पाद्य जीविकानिर्वाहं चिकीर्षन्ति। एतादृशी वार्ता वार्तापत्रेषु द्रष्टुं शक्यते।[१६२] कवेः संवेदना श्लोकाकारमायाति-

शास्त्री-विद्यावारिधि-सदृशोपाधिभिरलङ्कृता विबुधाः।
जठराग्नेः पूर्त्यर्थं बहुकर-कर्माप्तये सोत्काः।।[१६३]

अस्माकं भारतं विविधसमस्याप्लावितो वर्तते अशिक्षा-बुभुक्षा-अवृत्ति-(बेरोजगारी) समस्याः युवकान् आतङ्कवादप्रभृति-कुवृत्तिं स्वीकर्तुं प्रेरयन्ति। सर्वकारोऽपि स्वार्थमेव चिन्तयति न तु परार्थम् -

विनयाधान-सुरक्षा-भरणात्मककर्म नो कुरुते।
केन्द्रीयं प्रान्तीयं शासनमद्यात्मरक्षणायोत्कम्।।[१६४]

प्राच्यविद्यासमुपासकानां समुचितवृत्त्यात्मनिर्वाहार्थं यदि शासनं, सर्वकारश्च चिन्तनं न करिष्यति तर्हि कथं प्राच्य-विद्या जीविता स्यात् इत्येतदर्थं कवेः कविता चिन्तयति। तद्यथा -

प्राच्यसुविद्याधारी समुचितवृत्त्यात्मनिर्वाहम्।
कर्तुं लभतामवसरमित्यर्थमुपाय आराध्यः।।[१६५]

प्राच्यविद्यासम्मेलने कविः स्वकवितामाध्यमेन प्राच्यविद्यायाः संरक्षणार्थमेव चिन्तयति। कवेः संवेदना प्राच्यविद्याविदुषां वृत्त्यर्थं विद्यते, तेषां दीनहीनदशामवलोक्य कविः सम्मेलनमाध्यमेन स्वीयां संवेदनां व्यनक्ति।

'तुरीनो' स्मृतिसपादशतकम्

डा.शुक्लेन १२५ पद्यानां गुम्फनेन काव्यमिदं विरचितम्। इटलीदेशस्य तुरीनो (**ट्युरिन्**) नामकस्थले समायोजितस्य एकादशविश्वसंस्कृतसम्मेलनस्य सत्रीयकार्यक्रमाणां गतिविधिमाधृत्य रचितं काव्यमिदं वृत्तात्मकं वर्तते। अस्मिन् काव्ये सम्पूर्णमपि कार्यक्रमं कविः कवितामाध्यमेन प्रस्तौति। सम्मेलने सम्प्राप्तानां समेषामपि प्रतिभागिनां दिनचर्या काव्येऽस्मिन् लिखिता। तद्यथा- समागता विद्वांसः, साहित्यिकचर्चा, शोधपत्रप्रस्तुतिः, काव्यपाठः, अतिथिसत्कारः, प्रकृतिदर्शनम्, वास्तुकलाशिक्षणम् इत्यादीनां सन्निधानेन कविः काव्यं जीवितमिव करोति। काव्येऽस्मिन् यद्यपि नास्ति तथाविधालङ्काररसादीनां सन्निवेश इति स्वयं कविरपि स्वीकरोति तथापि सम्पूर्णस्यापि कार्यक्रमस्य चित्रणं कविना लोकविबोधनाय कृत्वा य उपकारः कृतः स न क्वचिदपि केनापि कृतः। कविः भारतस्य नेतृत्वेन सर्वत्रापि काव्यकीर्तनेन भारतमहिमानं प्रकटीकरोति। काव्यमिदं तेषां तेषां सर्वेषामपि पाठकानां मनस्तोषाय भवति ये खलु काव्यरसपानं

सुधारसपानमिव मन्वते। काव्ये भावसौन्दर्यं वर्तते, पृथक्तयाऽलंकार-मण्डनावश्यकता न वर्तते।

अनलंकृताऽपि कविवाक् रमणीया व्यङ्ग्यसङ्गता भवति।
निर्भूषणाऽपि रमणी राजते लावण्ययोगेन॥[१६६]

इटलीस्थितायाः पर्वतश्रेण्या अपि मनोरंजकं वर्णनं कविः करोति। उत्प्रेक्षाऽलंकारद्वारा आल्पसपर्वतश्रेण्या वर्णनमित्थम्-

तदाल्पसपर्वतश्रेणी हिमाच्छन्ना बभौ नूनम्।
सरस्वत्याः शुभं हासं सृजन्ती विद्वदालोके॥[१६७]

एकादशे विश्वसंस्कृतसम्मेलने हिमाच्छादिता पर्वतश्रेणी तथैव शोभां दधाति स्म यथा खलु तत्रागतान् विदुषोऽवलोक्य माता सरस्वती समुज्ज्वलहासेन विभाति।

एकादशविश्वसंस्कृतसम्मेलनस्यायोजनम् इण्टरनेशनल एसोशियेसशन आफ संस्कृत स्टडीज **पेरिस** (आई.ए.एस.एस.) संस्थाद्वारा तथा च चैस्मियो इण्टरनेशनल इन्स्टीट्यूट फार एडवान्स एशियन स्टडीज, तुरीनो संस्थाद्वारा सम्मिल्य अक्रियत। द्विसहस्रतमवर्षे अप्रैलमासस्य तृतीयदिनाङ्काद् अष्टमदिनाङ्कं यावद् तुरीनोनगर्याम् 'इन्क्रौण्टा' संस्थायाः सभागारे भव्यसभायाः समायोजनमभवत्। सभाया उद्घाटने प्रो. आस्कर बोत्तो महोदयोऽकथयद्यत्-" संस्कृतस्य ज्ञानराशिर्निश्चयेन सार्वभौमप्रतिष्ठां दधााति। चित्तवृत्तिशान्तये सर्वैरपि देववाण्या आराधानं क्रियेत।" आई.ए.एस.एस.संस्थाया अध्यक्षपादैः डॉ. रामकरणशर्ममहोदयैः स्वकीये अध्यक्षीयभाषणे कथितं यत्- "अद्यापि सर्वेषां कृते संस्कृतभाषायाः प्रासाङ्गिकता वर्तते। एषा अविनयमपाकरोति, पर्यावरणरक्षायै शिक्षते, सर्वेषां प्राणिनां परस्परसौहार्दं चाकाङ्क्षति।"[१६८]

कार्यक्रमस्यास्य येषु सत्रेषु श्रीशुक्लमहोदयस्योपस्थितिरभवत् तत्तत्सत्रस्य काव्यनिचयैः सचित्रं वर्णनं कविना विहितम्।[१६९] वैश्विकसम्मेलने समागतैर्विद्वद्भिः विविधकार्यक्रमाणां प्रस्तुतिद्वारा सम्मेलनमिदं सफलतां नीतम्।

इटलीस्थितायाः 'पो' नद्याः सचित्रवर्णनं कविना तथा कृतं यथा खलु सा सद्भावरसप्रसारिका भूत्वा साक्षाद् जीवितेव भूत्वा दर्शकानपि जीवितानिव करोति। तद्यथा-

'पो' संज्ञाया यत्र नद्याः प्रवाहे केचिल्लग्ना नौविहारे युवानः।
नद्यास्तोयं पक्षिणः संपिबन्तः सम्मोदं स्वं कूजितैर्व्यंजयन्ति।।
रम्याः स्वच्छा वृक्षपंक्तिप्रसन्नाः मार्गा दृष्टाश्चत्वरैर्भ्राजमानाः।
आरामाश्चालोकिता यत्र यूनोः प्रेमक्रीडा नैव बाधां लभन्ते।।[१७०]

वेनीसियानगर्या दर्शनीयानि स्थलानि कविना सामोदं दृष्टानि। कपोतानां मनोरमक्रीडामालोक्य कविना लिखितम्- **''अहं कपोतेभ्योऽन्नकणान् दत्तवान्, ते प्रसन्ना भूत्वा कतिचिन्मम स्कन्धयोरुपरि उपविष्टा अन्ये चापि मम हस्तयोः शिरसि चोपविष्टाः''**।।[१७१]

सम्मेलनेऽस्मिन् विविधानां पत्रिकाणां प्रदर्शनी अपि आसीत्। देववाणी-परिषद् दिल्ली द्वारा प्रकाशिताया ''अर्वाचीनसंस्कृतम्'' पत्रिकायाः प्रदर्शनमपि प्रदर्शन्यां जातम्।[१७२] कविशुक्लस्य शैल्यां पत्रिकायामस्यां सम्पूर्णमपि सम्मेलनं चित्रितम्। सम्मेलने समागता विद्वांस एव न अपि तु सर्वे सहायका -कार्यक्रमसफलताकाङ्क्षिणोऽपि कवेः काव्यबिन्दवो जाताः।

विदेशे भूत्वाऽपि कवि 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इतीमां सूक्तिं संस्मरन् भारतवन्दनं विदधाति[१७३], भारतीयसंस्कृति-प्रदर्शकनीतिविशेषांश्च समाचरति। कार्यक्रमस्यानन्तरं दशमे दिनाङ्के भारतं समागत्य भारतमातुर्वन्दनं कविना कृतम्। कविस्सर्वेषां सौख्यं कामयते-

सर्वे भवन्तु सुखिनः सर्वे स्वस्थास्तथा सन्तु।
सर्वे संस्कृतरुचयः सर्वे किल पूर्णकामाः स्युः।।

पोलकहालस्थ-टर्नरहाउसवातायनात्

इयं कविता एडिनबरा-नगरस्य पोलकपरिसरे स्थितस्य 'टर्नरहाउस' नाम्नः भवनस्य ५१८ संख्याके कक्षे १०.७.२००६ तमे खैष्टाब्दे लिखिताऽस्ति। कविर्वातायनात् विविधानि दृश्याणि पश्यति छन्दोमुक्तरचनया च तानि वर्णयति-

कक्षे स्वच्छकाचमयं एकं प्रशस्तवातयनमस्ति।
यन्मह्यम् विविधानि दृश्यानि स्पष्टं दर्शयति।।[१७४]

सम्मेलने नवागंतुकानतिथीन् प्रकोष्ठम्प्रति नीतवत्यः युवत्यः कक्षकुञ्जिकां स्वीकृत्य स्वसम्भारेण सह कक्षं गच्छन्ति। स्वदेहयष्ट्यास्तनू-करणार्थं धावनं कुर्वतीनां युवतीनां दृश्यम्, युवकानां युवतीभिस्साकं वार्तारतानां

दृश्यम्, तरूणां दृश्यम् ये वायुना स्पृष्टाः सानन्दमान्दोल्यन्ते, काष्ठासन्दिकासु उपविश्य मनोविनोदकुर्वतां दृश्यम्। - एवङ्क्रमेण अस्यां कवितायां एकादशदृश्यानि कविना निबद्धानि, एकं दृश्यं तद्यथा -

दृश्यानि-बेयर्ड-ली-प्रभृतिभवनानां
यत्र संस्कृतकवयः श्रीनिवासरथ-राजेन्द्रमिश्र-
इच्छाराम द्विवेदी-'प्रणव' प्रभृतयः तिष्ठन्ति।।[१७५]

कविवर्णितं पक्षिणां दृश्यं (ये पक्षिणः आकाशे उड्डीय पुनः विश्रामार्थं भवनपृष्ठेषु वृक्षशाखासु च तिष्ठन्ति) मनोमोहकं वर्तते। -

दृश्यानि पक्षिणां ये आकाशे उत्पत्य
विश्रामार्थं भवनपृष्ठेषु वृक्षशाखाषु च तिष्ठन्ति।[१७६]

सम्मेलने उपस्थिताः विद्वांसः विश्वमेकनीडमिव मन्वते, सङ्गच्छन्ते संवदन्ते च। तद्यथा-

विश्वस्य संस्कृतविदुषां
ये विश्वमेकनीडं मन्वानाः सङ्गच्छन्ते संवदन्ते च।।[१७७]

मेघानां दृश्यं महच्चित्रमुपस्थापयति -

"घनानां
ये आकाशमाच्छाद्य
अधोवर्तिषु प्राणिषु छत्रमिव तानयन्ति[१७८]

एवं क्रमेण वातायनात् दृश्यमानाणि विविधानि दृश्यानि सर्वशुक्लोत्तरामाध्यमेन समग्रेऽपि विश्वे प्रसारितानि। यानि दृश्याणि कविमानन्दयन्ति तान्येव अन्येभ्यः प्रदर्श्य कविः स्वकीयं सुखं अन्यैः सह संविभज्य सुखं कामयते।

एडिनबरा-नगरोत्तमे

कविः स्वीयया प्रतिभया समग्रमपि विश्वं एकनीडमिव कुरुते। कवेः शुक्लस्य याः विविध देश-नगर-वर्णनपरकाः रचनास्सन्ति, तासु इयं रचना अस्मिन् सङ्ग्रहे अन्तिमा विद्यते। कविः न केवलं विविधानि देश-प्रदेशनगराणि गच्छति अपितु सर्वान् पाठकान् अपि तत्तद्देशस्य दर्शनं

कारयति। तत्रत्यानि विविधानि दृश्यानि, तत्रत्यं सौन्दर्यम्, तत्रत्यां परम्पराम्, तत्रत्यां संस्कृतिं च कवितामाध्यमेन प्रदर्श्य सहृदयानां मनोरञ्जनं कारयति। इयम् 'इडिनबरा-नगरोत्तमे' शीर्षकान्विता रचना स्काटलैण्ड-(यू.के.) देशस्य एडिनबरानगरस्य चित्रणं प्रस्तौति। एडिनबरानगरे पञ्चदिवसीयं त्रयोदश-विश्वसंस्कृतसम्मेलनं २००७ तमे खैष्टाब्दे जातम्। अयं कविरपि तस्मिन् भागमगृह्णात्।

अद्य एडिनबरा नगरोत्तमे संस्कृतस्य
पञ्चदिवसीयं विश्वसम्मेलनं पूर्णतां याति[१७९]

अस्मिन् सम्मेलने 'वसुधैव कुटुम्बकस्य' गूढार्थः कविना स्पष्टीकृतः। कवेः संवेदना विश्वकल्याणम् इच्छति। तद्यथा -

भवतु एकनीडं विश्वं
परस्परमेलने बाधाः
विलोपं गच्छतु
सर्वे विश्वकल्याणाय प्रयतन्ताम्।।[१८०]

एडिनबरानगरशोभां वर्णयन् कविः लिखति -

तैस्तैर्विशेषैर्भूषितम्
एडिनबरा नगरोत्तमम्
मानवीयपुरुषार्थस्य गाथां गायत्
प्रकृतिदेव्याः प्रसादेन लसितं सत्
अद्य राजतेतराम्
कयाचिदनवद्यया प्रत्यग्रया शोभया[१८१]

अस्मिन् काव्ये कविना संस्कृताऽऽयोजनजन्यगरिम्णा विश्वकल्याणस्य भावना सम्पादिता।

एवम्प्रकारेण कविना सर्वशुक्लोत्तरायां देश-प्रदेश-नगरवर्णन-परकरचनाभिः विविधानां देश-प्रदेशानां भ्रमणं कारितम्, विविधाः संस्कृतयः परम्पराश्च उट्टङ्किताः विविधेषु देशेषु संस्कृतायोजनेन भाषाप्रसारकथाऽपि वर्णिता एव। एतासु रचनासु कवेः संवेदना विविधसमस्यादूषितानां मानवानां युवकानाञ्च समादरं प्राप्स्यति। कविना तास्ताः समस्याः ससमाधानं वर्णिताः।

३.५ मेघसम्बन्धिनीनां रचनानां समीक्षणम्

अस्माकं भारतराष्ट्रं कृषिराष्ट्रं वर्तते, अस्माकं राष्ट्रे कृषकाणां दीर्घतमः समूहः मेघाश्रितो वर्तते, सामाजिकः कविः कृषकाणां दीर्घस्य समूहस्य कथं न चिन्तनं कुर्यात्? कवेः कुशलसन्देशाः मेघसम्बन्धिनीनां रचानानां माध्यमेनाऽपि प्रसारिताः भवन्ति। कविः स्वकवितासु सर्वस्य जनसामान्यस्य चिन्तायां रचनाकौशलं प्रदर्शयति। अस्माकं भारतं विविधभौगौलिकभूभागयुतं राष्ट्रं वर्तते। क्वचित् मेघानामातङ्कः जनानां हृत्सु भीतिमुत्पादयति, क्वचित् धरा पिपासासागरे निमज्जिता भवति, एतादृशी विषमता भारतस्य भौगोलिकवैविध्यं प्रदर्शयति।

कवेः मानसपटले मेघानां प्रबोधनार्थं चिन्ता तु स्पष्टमवलोक्यते पाठकैः। मेघसम्बन्धिन्यः रचनाः कविना समसामयिके काले रचिताः। समयेन समागते सति तस्य स्वागतं, अनागते सति तस्य प्रबोधनम्, असमये आगतस्य अकालजलदस्य निन्दा कविना क्रियते। श्रावणमासस्य प्राकृतिकमानन्दं कथं कविरानुभूतवान्? तस्य रचनासु मेघसम्बन्धितं वर्णनं कीदृशं सहृदयत्वं स्थापयति? इत्येतदग्रे प्रस्तोष्यते।

मेघप्रबोधनम्

'मेघप्रबोधनम्' इति शीर्षकान्वितायां रचनायां कविना अकालपीडितस्य भारतस्य वर्णनम् अकारि। मेघानां अनागमने सति भारतधरा मृतप्राया वर्तते, सर्वसहवसुन्धराऽपि पीडामनुभवति। मेघस्य अकर्त्तव्यपराघणतां दृष्ट्वा कविहृदयेऽपि पीडा जायते। सः सहसैव तर्जयति मेघं, प्रबोधयति च -

गलपयसि धरणीं नु हहा! शङ्कसे न भोः!
कर्त्तव्यमकृत्वा त्वं लज्जसे न भोः!
सर्वसंहवसुन्धरा तुद्यते त्वया।।[१८२]

सर्वसहायाः धरित्र्याः पीडां कविः वर्णयति। यदा सर्वसहा एव तुद्यते तदा अस्मद्दृशानां का गतिः? सामान्यजनता तु निरीहा, हे मेघ! कर्त्तव्याचरणं न कृत्वा किमर्थं न त्वं लज्जसे? मेघ तव दर्शनं तु आषाढस्य प्रथमे दिवसेऽपि न जातम् (कालिदासेन वर्णितं यत् - "आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं"। अतः आषाढस्य प्रथमदिवसात् वर्षर्तोः आगमनं इति भारतीयपरम्परायां स्वीक्रियते) भवतु नाम आषाढे न त्वं दृष्टः, तव तु

दर्शनम् श्रावणे, भाद्रपदमासेऽपि न जातम्, हे मेघ त्वं कुत्रचित् क्रीडां करोषि वा? कर्त्तव्यसम्पादनसमये न तथाऽऽचरणीयम्। कविना कवितामाध्यमेन यः सन्देशः प्रदत्तः, सः तु कर्त्तव्यसम्पादने जनान् प्रेरयिष्यति। कर्त्तव्य-(पथे)समये न केनाऽपि कर्त्तव्यच्युतेन भाव्यम्। अग्रिमायां कवितायां कवेः संवेदना प्राणिनां आर्त्तस्वरं पश्यति। चातकपक्षी पुनः पुनः रटति, धरा आतपनिःश्वासान् त्यजति, पिकः रोदिति। प्राणिनां कारुणिकवर्णनं विधाय कविहृदयमपि क्रन्दनाय विवशीभवति -

वसुधाहृदयं भिन्नं पश्य कीदृशम्
खगमृगगणवैवश्यं पश्य कीदृशम्।
अपि कर्षकदीनदशा लक्ष्यते त्वया।। - क्रूरहृदयमेघ.......
आतपनिःश्वासान् हा! धरा मोमुचीति
रारटीति चातकः पिकश्च रोरुदीति
क्रन्दनं निशम्य मौनमास्यते त्वया
क्रूरहृदय मेघ! कथं सुप्यते त्वया।।[१८३]

पशुपक्षिणां कारुणिकीं दशामवलोक्य कविः मेघं क्रूरतरं मन्यते। मेघस्य अनागमनेन पशवः उद्विग्नाः सञ्जाताः ते इतस्ततः भ्रमन्ति, तडागे मीनाः सन्त्रस्ताः सन्ति, हे मेघ अकालस्य इमां स्थितिं किमर्थं न त्वं क्षालयसि? अर्थात् किमर्थं न वर्षसि? त्वं तु संतप्तानां शरणं कथ्यसे (संतप्तानां त्वमसि शरणं.......[३]) गीतादिशास्त्रेषु व्यर्थमेव 'पर्जन्यादन्नसम्भवः'[४] इति विशेषणं त्वया प्राप्तम्, इदमपि मे (कवेः) मनसि दुःखं ददाति। पुनरपि यदि त्वया एतत् तप्तं जगत् ताप्यते चेत्, कवेः कालिदासस्यापि कीर्तिं त्वं दूषयसि (कालिदासेन मेघदूते वर्णितं यत् - त्वय्यायत्तं कृषिफलमिति पुनरपि कविः मेघं प्रबोध्य वदति यत् -

दोला नो मल्हारं नापि कज्जली
नो कर्गलनौकैवर्तकसुमण्डली।
नो वर्षास्नानमभूत्, कि कृतं त्वया?
क्रूरहृदय मेघ! कथं सुप्यते त्वया।।[१८४]

वर्षर्तुः प्राणिनां कृते विविधगतिविधीनामपि कालः भवति

समाजवैविध्येऽस्मिन् भारते नैकाः परम्पराः विद्यन्ते वर्षर्तौ, विशिष्य श्रावणमासे युवत्यः दोलनेषु दोलयन्ति, मल्हारराग: गीयते, कजरीगानं क्वचिज्जायते, बालाः कर्गलनौकाः निर्माय नौकाविहारं कुर्वन्ति, जनाः वर्षास्नानं कुर्वन्ति (वर्षर्तौ स्नानेन चर्मरोगाः दूरीभवन्ति), विशिष्य प्रेमिणाम् आनन्दाय भवति श्रावणमासः। परं अस्मिन् पर्याये हे मेघ! किं कृतं? त्वया वृष्टिरेव न कृता।

पुनः कविः कल्पनां करोति- किं तव प्रेमिकया (तडिता)सेवाकर्मणः त्वं निवारितः? आहोस्वित् इन्द्रेण त्वं निलम्बितः? मेघ त्वं तप्तवनं सिञ्च। अयं विनाशः किमर्थं न त्वया अवरुध्यते -

प्लावनं क्वचित्तथा क्वचित्त्ववर्षणम्
उभयथाऽपि हन्यते त्वया तु कर्षणम्।
नो कथं विनाशतो विरम्यते त्वया
क्रूरहृदय मेघ! कथं सुप्यते त्वया।।[१८५]

कविः पुनः समेषां प्राणिनामुन्नयनार्थं मेघं प्रबोधयति यत्- 'स्वनियोगमशून्यं कुरु' इत्यनेन। इयं या अवृष्टिसमस्या विद्यते यया - गोचरेषु ग्रासो नाऽस्ति, चातकः रोदिति, शुष्काः ग्रामनगरवीथिकाः, पादपाः वल्लर्यः शुष्काः सञ्जाताः अतः जलद! जीवखेदिनीं दारुणविपदम् अल्पय, तप्तां मेदिनीं स्वीयया वर्षणधारया तर्पय।

अन्ते कविरपि प्रबोधनेन श्रान्तिमनुभवति। वक्ति च-

अधिकं त्वां प्रेरयितुं नाहमुत्सहे
निह्रीकं ह्रेपयितुं नाहमुत्सहे
स्तोकं बहु नैव किमिति गृह्यते त्वया' - क्रूरहृदय.........[१८६]

ये तावत् विज्ञाः भवन्ति, सज्जनाः भवन्ति स्तोकेनैव बहु गृह्णन्ति। अयं कवेः सन्देशः वर्तते यत् स्तोकेनैव बहु जानीयुः जनाः - नैषधकारेणाऽपि नैषधे उक्तमस्ति यत् - ''झटिति पराशयवेदिनो हि विज्ञाः''[१] ये बुद्धियुक्ताः भवन्ति ते झटित्येव पराशयं गृह्णन्ति। तादृशी (नैषधसदृशी) एव उक्ति कविः अत्राऽपि प्रददाति। वस्तुतः पङ्क्त्या एकयैव कविना बहु किमपि उक्तम्। मेघप्रबोधनेन सहैव पाठकाः अपि कविना प्रबोधिताः एव। अन्ते कवितायामस्यां कवेः संवदेना आर्त्तस्वरेण मुखरीभूताऽस्ति। बिम्बप्रयोगाः अपि कौशलं प्रदर्शयन्ति। यथा- क्रूरहृदय, कुलिशहृदय सर्वसहा पृथिवी,

निह्नीकम्, क्रन्दनम्, खगमृगगणवैवश्यम् इत्यादि शब्दाः तत्तत्सौन्दर्यं विवर्धयन्ति कवितायाम्। कविताया: रचनाकाल: ५.१०.१९८७ तमईस्वीवर्षे विद्यते।

अकालजलद!

आचार्यरमाकान्तशुक्लेन अकालजलदकवितायां मेघस्य आलोचना कृताऽस्ति। पृथ्वीच्छन्दसि रचितायां कवितायामस्यां कविः सस्यविनाशकं मेघम् उपालभते। १३.३.१९८८ तमे वर्षे उत्तरभारतस्य केषुचन स्थलेषु भीषणकरकापातो जातः। गाजियाबादजनपदस्य षडशीतिग्रामेषु कृषकाणां महती हानिरभूत्। गोधूम-चणक-सर्षप-सदृशानि शस्यानि विनष्टानि। समाचारपत्रेषु इयं वार्ता प्रमुखतया प्रकाशिता। कवेः रचनाहृदयं सञ्चारितम्, रात्रौ एव अकालजलदम् (अकाले = असमये, जलदं) अभिलक्ष्य प्रथमं छन्दः प्रादुर्भूतम्। डॉ. शुक्लस्य भावुकहृदयः अनावृष्ट्यां सत्यां दुःखमनुभवति किञ्च असमये वृष्टिरपि तद्हृदयं ग्लपयति। तस्य उदात्तदृष्टिः मेघायापि चेतनां प्रयच्छति। वक्ति च -

अकालजलद! त्वया किमिति निन्द्यमाचर्यते?
कृषीवलपरिश्रमः कथमहो त्वया नाश्यते?
निपात्य कारकाचयं परिणतेषु सस्येषु हा
त्वया किमिति तुद्यते वद पयोद पृथ्वीमनः॥[१८७]

वर्षणसमये मेघेन वृष्टिः न सम्पादिता। कृषकैः (धरित्रीपुत्रैः) येन केन प्रकारेण कृषिः रक्षिता। परम् असमये वृष्टिः कृषिक्षेत्रेषु विषं पातयति।

निदाघतपनज्ज्वलद्वसुधया यदाकारित-
स्तदा त्वमगमः क्वचिद्वसुमती त्वया शोषिता।
यदा च वसुधासुतैः श्रमभरैः प्रयासैर्निजै-
ररक्षि कृषिसन्ततिर्विषमहो त्वया पातितम्॥[१८८]

महारजतशोभायुक्ताः गोधूमकाः, यवानां कणिशाः चापहताः त्वया। कविः मेघं धिक्कुर्वन् कथयति यत् "**धिगस्तु तव जीवनम्, चरति यद्भवे वैशसम्।**[१८९]

रक्षको मेघ एव अद्य भक्षकः सञ्जातः। भारतीयसंस्कृतौ मेघः देवस्वरूपत्वेन पूज्यते। महाकविकालिदासः आदिकविः वाल्मीकिसदृशाः

प्राचीनकवयः मेघवन्दनं सम्पादितवन्तः। अकारणवञ्चना दुष्टता भवति। कविना मानवीकरणरूपेण देवस्वरूपमेघस्य भक्षकवृत्तिरपि निन्दिता। तद्यथा-

कृषीवलगणास्त्वया विषद! वञ्चिता लुण्ठिता-
स्तथाऽपि कृषिदेवता भवसि कैर्गुणैर्ब्रूहि रे।
अकारणमिदं त्वया किमिति वैरमाविष्कृतम्
कलङ्क्तिमहो कथं प्रकुरुषे स्वकीयं यशः॥[११०]

कविः वर्णयति यत् मेघस्य गर्जनं, वर्षणं च समयेन स्यात्। संस्कृतेरनुरूपः परोपकारः त्वया करणीयः, कवेरियम् उपदेशात्मिका वाणी मेघं तर्जयति-

जगज्जनसुरञ्जनो भव न वै जगत्त्रासकः
परोपकरणव्रतं वृणु पयोद! कल्याणदम्॥[१११]

अत्रापि कवेः उदात्तदृष्टिः शिक्षाप्रदातृरूपेण समुपस्थिता जायते। परोपकारव्रतस्य सुसङ्कल्पना अन्यत्राऽपि प्राप्यते संस्कृतसाहित्ये। तद्यथा

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः॥[११२]

एवमस्यां कवितायां मेघस्यानवसरवृष्ट्या कृषकाणाम् आशा धूलिधूसरिता जाता। मेघवृष्टिः विषमिव संहारिकारूपेण वर्णिता कविना।

स्वागतं पयोद ते

कवेः मेघसम्बन्धिनीषु कवितासु इयं कविता तृतीया वर्तते। मेघप्रबोधन-अकालजलदकवितयोः मेघस्य आसुरीवृत्तेः वर्णनं कृत्वा पुनः कविः मेघस्य देवत्वं सम्पादयति। स्वागतं पयोद ते इत्यत्र कविपरम्परां निर्वहति कविः।

संयोगवशात् १९८८तमे वर्षे आषाढस्य प्रथमे दिवसे एव मेघोदयः सञ्जातः, सुकाले समागते मेघस्य दर्शनं कविनां मध्यप्रदेशप्रान्ते कृतम्। तस्मिन् वर्षे सुखदा वृष्टिः सञ्जाता, मेघेन पुनः देवत्वं प्राप्तम्, अनेके कविहृदयाः जनाः, पशवः, पक्षिणः कृषकाश्च आनन्दिताः जाता, काव्येऽस्मिन् सुवृष्ट्या प्रसन्नानां पशुपक्षिणाम् आनन्दं तथा च विविधानां लता-वृक्ष-औषधीत्यादीनां नवजीवनस्य यथार्थचित्रणं कवेः सूक्ष्मदृष्ट्या सञ्जातम्। अस्याः

रचनायाः प्रणयनं कविना १.७.१९८८ तः १५.७.१९८८ यावत् कृतम्। छन्दोबद्धरचनायामस्यां चतुर्दश श्लोकास्सन्ति, प्रारम्भिकेषु एकादशपद्येषु वृष्ट्या अभिभूतायाः प्रकृत्याः सजीव-निर्जीव चित्रणं प्रस्तौति कवः सपशुपक्षिणां विविधभावभंगिमानां चित्रणमपि प्रस्तौति। अन्तिमेषु त्रिषु पद्येषु कवेः मानवतावादिनी दृष्टिः मुखरिताऽस्ति। **द्वन्द्व एव जीवनम् अथवा संघर्ष एव जीवनम्** अस्याः एव मान्यतायाः समर्थनं करोतीयं कविता। वर्षाजलेन कमलानि नष्टानि भवन्ति हंससमूहोऽपि मानसरोवरं पलायितः। तद्यथा -

दर्दुरा प्रमोदिताः सुहंसका पलायिताः
पद्मनाशगर्विताः शिलीन्ध्रकाः समुद्गताः।
द्वन्द्व एव जीवनं नु! चिन्तयाऽलमत्र ते
स्वागतं पयोद ते स्वागतं पयोद ते॥[१९३]

चतुर्दिनात्मकस्य शिलीन्ध्रकस्य गर्वितः स्वभावः कविनाऽत्र वर्णितः। कवेः प्रेरणा तादृशस्य स्वभावत्यागाय वर्तते। कान्तिप्रदायिन्याः, मोक्षप्रदायिन्याः, सुहासप्रदात्र्याः वर्षायाः वर्णनं चित्तमाकर्षति। तद्यथा -

पक्षिणश्चतुष्पदाः सरीसृपाः पयश्चराः
मोदमाप्नुवन्ति कान्तिमाप्नुवन्ति भूधराः।
फुल्लितैः कदम्बकैः सुहास एष कीर्यते
स्वागतं पयोद ते स्वागतं पयोद ते॥[१९४]

पशु-पक्षि-पर्वत-वृक्षादि-जडचेतनेभ्यो क्रमशः हासप्रदानेन मेघे समदृष्टिभावः परिलक्ष्यते। प्रकृतिप्रदत्तां शिक्षामिमां स्वीयजीवने अस्माभिः मेघसदृशमेव स्वीकरणीयम्, येन धरायाः कलुषता दूरं गच्छेत् किञ्च सर्वेऽपि मानवाः मोदमानं, सुहासितञ्च जीवनयापनं कुर्युः। इत्येव कवेः मनीषा।

(वृष्टिसमये) वृष्टौ बालकानां विनोदचित्रणम्, कृषिक्षेत्रे कृषकाणां बीजवपनस्य चित्रणं कवेः रचनाशैल्याः प्रच्छन्दमुदाहरणमस्ति।

मेघस्य वृष्ट्या एव समृद्धम् अन्नं जायते "समये वर्षाजलम् अन्नरूपेण वर्षति" एतादृशी मान्यता वर्तते कृषकाणाम्। प्रकृतिरूपात्मिका मेघस्य इयं दयादृष्टिः समृद्धेः सूत्रपातं करोति। मानवा अपि अनया शिक्षिताः सन्तः प्राणिषु दयाभावेन तेषां समृद्धौ सहायकाः भवितुं शक्नुवन्ति। अनया दृष्ट्या एव कविः प्रकृतिचित्रणं करोति। वृष्टिसमये युवकानां पथिकानाञ्च

मनोविनोदपूर्वकं गृहगमनस्य चित्रणं। तद्यथा –

दोलया मनोविनोदमाचरन्ति बालिकाः
तीव्रगामिनो गृहं प्रयान्ति पश्य पान्थकाः।
उत्कया बलाकया मनोरथः स्वपूर्यते
स्वागतं पयोद ते स्वागतं पयोद ते॥[१९५]

अनेन कवेः ग्राम्यपरिवेशेन सह स्नेहाधिक्यमनुमातुं शक्यते। वृष्ट्या आनन्दिताः पक्षिणः स्वीयनीडनिर्माणादिकार्यं मनोयोगेन कुर्वन्ति। पक्षिणां गृहनिर्माणादिकानि कार्याणि मानवेभ्यः स्वकर्मनिरत्यै प्रेरयन्ति। आकांक्षापूर्तिः कियती आनन्ददायिनी भवति एतस्य सहजानुभूतिः कवेः एतासु पङ्क्तिषु भवति। –

तोयदेन पूरिताः मनोरथाः समे हि नो
वारिदेन दारितं सुदीर्घसङ्कटं हि नो।
ग्रामवासिभिश्च नागरैर्मुदाद्य कथ्यते
स्वागतं पयोद ते स्वागतं पयोद ते॥[१९६]

पयोदाः वस्तुतः अतिथयः, अतिथीनाम् आगमनेन आनन्दानुभूतिः जायते। भारतीयसंस्कृतेः इमामेव स्वागतपरम्परां कविः व्यनक्ति। अस्माकम् अनुभूतिः विविधरूपेषु भवति। अस्माकं वेदेष्वपि सुवृष्टेः कामना कृता वर्तते। धरित्री हरितशाटिकां धृत्वा सर्वान् आनन्दयति किञ्च क्लिन्न-वस्त्रविभूषिताः स्त्रियः महर्षिमानभञ्जिकाः चित्रिताः। तद्यथा-

क्लिन्नवस्त्रयोषितो महर्षिमानभञ्जिका
धार्यते भुवा मुदा हरीतिमा सुशाटिका।
रामणीयकं नवं च किं न वाऽद्य दृश्यते?
स्वागतं पयोद ते स्वागतं पयोद ते॥[१९७]

अत्र कविना वृष्टिकारणभूता अकथनीया रमणीयता सङ्केतितास्ति। क्लिन्नवस्त्रयोषितां वर्णनं सम्पाद्य प्रकृतेः उद्दीपकं स्वरूपं वर्णयति कविः। वर्षासमये चातकाः हर्षविभूषिताः जाताः, मयूराः नृत्यन्ति, पशवः आनन्दिताः विद्यन्ते। धरित्र्याः मनस्तापं तु वृष्टिरेव शमयितुं शक्नोति **''भूमनःस्थ-पराशिरत्ययं द्रुतं गतः''**[१९८]

कविः अनावृष्ट्या, असमयवृष्ट्या च आहतो भवति, तज्जात-विभीषिकामपि सः जानाति, अन्ते च 'अति सर्वत्र वर्जयेत्' इति मनसि निधाय, आवश्यकतानुरूपमेव वृष्टिमाकाङ्क्षति।

तावता जलेन सिञ्च वारिवाह मेदिनीम्
यावता न याति सा दशां स्वजीवखेदिनीम्॥[१९९]

कवेः चिन्तनं विश्वबन्धुत्वस्थापनाय अहिंसास्थापनाय च सर्वत्र द्रष्टुं शक्यते। अत्रापि कविः मानवतावादिदृष्टिकोणं स्थापयति, सुखशान्तिं च इच्छति-

शस्त्रवह्नितापशामको भवेः पयोद हे!
द्वेषवाह्नितापशामको भवेः पयोद हे!
शान्तिरस्तु सौख्यमस्तु सीकरैः पयोद ते
स्वागतं पयोद...............................[२००]

इयं रचना समकालीनं युगबोधं प्रदर्शयति यत्र विभीषिका, आतङ्कवादः वञ्चना इत्यादि कुकृत्यैः जनता पीडिता दृश्यते। कविः सर्वदा मानवस्य प्रसन्नतायै चिन्तयति, धरायाः प्रसन्नतायै च कवयति -

मोदमेतु मेदिनी प्रमोदमेतु मानवः।
नो कदापि बाधतां भुवं कुशोषदानवः॥[२०१]

एवं प्रकारेण कवेः मेघसम्बन्धिनी रचना मानवानां सज्जीवनाय चिन्तनं प्रस्तौति। इयमेव कामना वेदेऽपि द्रष्टुं शक्यते -

निकामे निकामे नः पर्जन्यो वर्षतु।
फलवत्यो न ओषधयः पच्यन्ताम्॥[२०२]

डॉ. शुक्लः उत्तरमङ्गलेऽपि एतादृशमेव चिन्तनं सम्पादयति -

वारिवाहः सुकाले समागच्छतात्
सन्तु गावश्च पुष्टाः सवत्साः समाः॥[२०३]

श्रावणमासे

रमाकान्तशुक्लविरचितायामस्यां कवितायां २००३ तमस्य ईस्वीयवर्षस्य वृष्टेः (श्रावणमासस्य) वर्णनं विद्यते। २००३ तमे वर्षे भारते सुवृष्टिः सञ्जाता। मेघेन स्वकर्त्तव्यं सम्यक् निरूढम्। कविना ११.५.२००३ तारिकायां,

दिल्लीसंस्कृताकादम्याः त्रिवेणीसभागारे आयोजिते संस्कृतकविसमवाये बालानां कृते एका रचना **'श्रावणमासे'** श्राविता।[२०४] अत्र प्रत्येकस्मिन् चरणे समाप्तौ 'श्रावणमासे' वर्तते। अत्र ९४ वाक्यानि सन्ति यानि सर्वाणि श्रावणमासस्य वैशिष्ट्यं वदन्ति। गीतमेतत् समूहेऽपि गातुं शक्नुवन्ति बालाः। रोलाच्छन्दसि विरचितेऽस्मिन् काव्ये कविना प्राकृतिकसौन्दर्यम्, सुष्ठु वर्णितम्। पर्वसु जनानाम् आमोदप्रमोदोऽपि कविना वर्णितः। सुखसमृद्धिकारणभूतायाः वृष्टेः वर्णनं सहैव शासक-प्रशासकानां गूढनिश्चयानपि उद्घाटयति इयं कविता। राजस्थानगुर्जरादिप्रदेशेषु वृष्टेः वर्णनम्। यथा-

राजस्थाने वृष्टिर्जाता श्रावणमासे
गुर्जरराज्ये वृष्टिर्जाता श्रावणमासे।
अखिलभारते वृष्टिर्जाता श्रावणमासे
काले वर्षति पर्जन्योऽयं श्रावणमासे॥[२०५]

कवितायामस्यां प्रसङ्गगर्भकताऽपि वर्तते। यथा- (१) हिमाचलप्रान्ते मेघविदारणवृत्तम्, तेन नैके जनाः कालकवलिताः (२) भोपालनगरस्य अधिकारिणा उत्कोचेन अर्जिता राशिः सर्वकाराय प्रत्यावर्तितः, तस्य आत्मदाहस्य वृत्तम्। (३) शत्रुघ्नसिन्हानाम्नः कृतक-सांसदस्य संसदि प्रवेशवृत्तम्। (४) हिमाचलप्रदेशे संस्कृताकादम्या ११,१२.७.२००३तारिकयोः कविसमवायः (५) १२.८.२००३ तारिकायां संस्कृतदिवसस्य आयोजनम् (६) देहलीमैट्रोमार्गस्य निर्माणवृत्तम्। इत्यादयः अनेके प्रसङ्गाः गर्भाङ्किताः -

मेघविदारणवृत्तं भयदं श्रावणमासे
श्रीवास्तवमतिरिता विशुद्धिं श्रावणमासे
प्रविशति संसदि कृतकसांसदः श्रावणमासे
सोलन-दिल्ल्योः कवयो मिलिताः श्रावणमासे
संस्कृतदिवसो मुदा मन्यते श्रावणमासे
मैट्रोमार्गो ह्यग्रे सरति श्रावणमासे[२०६]

श्रावणमासस्य वृष्ट्या धरित्र्याःश्रृंगारो जातः, हरिताः लताः, ओषधयः शस्यश्यामला पृथिवी च मनोरमाः दृश्यन्ते। कवितायां प्राकृतिकचेतनायाः समुल्लासो जायते।

हरिता हरिता हृष्यति भूमिः श्रावणमासे
शाद्वलशाटी धृता पृथिव्या श्रावणमासे
वासकसज्जा वसुधा जाता श्रावणमासे
गर्जति मेघो हृष्यति धरणी श्रावणमासे
हरिततृणैरावृता मेदिनी श्रावणमासे।
रसा रसवती राष्ट्रे जाता श्रावणमासे
सुजला सुफला शस्यवृता भूः श्रावणमासे
अवलोक्यते चतुर्दिक् सुषमा श्रावणमासे॥[२०७]

श्रावणमासे प्राणिनः प्रमुदितास्सन्तः निवसन्ति -

दात्यूहाः अतितरां नन्दिताः श्रावणमासे
छायागुप्ता जना नन्दिताः श्रावणमासे
नीडे स्थित्वा लवो मोदते श्रावणमासे
गावो मुदिता विहगा मुदिताः श्रावणमासे॥[२०८]

श्रावणमासे विरहिणां दशाऽपि कविना वर्णिता -

वर्षाक्लिन्नः कपिः कुप्यति श्रावणमासे
हन्त विरहिणी रोदिति रहसि श्रावणमासे॥[२०९]

मार्गनिर्माणे कृतस्य वञ्चनस्यापि ज्ञानं जायते। नाल्योऽपि प्रशासनं पिशुनयन्ति श्रावणमासे -

पयसा भरिता वीथ्यो रथ्याः श्रावणमासे
प्रशासनं पिशुनयन्ति नाल्यः श्रावणमासे
जलप्लाविता मार्गा जाताः श्रावणमासे॥[२१०]

वेदा अपि वृष्टिमाकाङ्क्षन्ते-

काङ्क्षति वेदो भवतु सुवृष्टिः श्रावणमासे[२११]

अस्मिन् श्रावणमासे जनाः विविधानि व्यञ्जनानि भुञ्जते, दोलनं कुर्वन्ति, शिवभक्ताः अमरनाथस्य दर्शनं कुर्वन्ति, कॉवड़ेन (अभिषेकघटेन)जलाभिषेकं कुर्वन्ति। अस्मिन्नेव श्रावणमासे कविना कलहशान्तये सुराज्यस्य कामना कृताऽस्ति -

सन्तु विवादाः कलहाः शान्ता श्रावणमासे
सौराज्यं स्याद्देशे भगवन्! श्रावणमासे।।[२१२]

एवमस्यां रचनायां कविना प्रकृतेः हरितं स्वरूपं प्रदर्शितं सहैव काव्ये भारतीयसंस्कृतेः सांस्कृतिकचेतनायाः, आध्यात्मिकचेतनायाश्च दर्शनां कारितां किञ्च काव्ये राष्ट्रियभावनाऽपि मुखरिता सञ्जाता, इयं बालसुलभा कविता एकस्मिन् पक्षे बालेषु संस्कृतं प्रति अनुरागभावनावर्धनं करोति अपरस्मिन् च पक्षे हरितरूपायाः धरित्र्याः सुन्दरतमं चित्रं प्रकाशयति।

३.६ जीवनदशर्नचिन्तनपरकरचनानां समीक्षणम्

कविवर रमाकान्तशुक्लस्य सर्वशुक्लोत्तरा काव्यसंग्रहः विविध विषयसमन्वितानां कवितानां समूहोऽस्ति, जीवन-दर्शन-चिन्तनपरकरचनासु किं जीवनं ते, आशा, मदीयकविते कुरुष्व गानम्, विलसितं नियतं नियतेरिदम्। एतासु कवितासु कवेः विविधविषयकं चिन्तनं प्राप्यते कवेः जीवनदर्शनं साक्षात् क्रियते अस्माभिः। कविः सत्कार्यसम्पादने जनान् प्रेरयति, कश्चित् मानवः सत्कार्यवञ्चितः न स्यात्। जीवनं कियत् सौन्दर्ययुक्तं वर्तते। जीवनं कियद् नीरसं वर्तते, जीवनं कियत् सङ्घर्षपूर्णं वर्तते, कियत् सहजं वर्तते धरित्रौ जीवनम् इत्येतत् सर्वमपि कवेः जीवनदर्शनचिन्तनपरक-रचनानामवलोकनेन ज्ञायते। जीवने यानि कार्याणि कर्त्तव्यानि भवन्ति तानि कार्याणि त्वया न सम्पादितानि चेत् किं जीवनम् ते? मदीयकविते कुरुष्व गानम् इति कवितायाम् पूज्यानां पूजा अपूज्यानां प्रबोधनं च कविना गंभीरतया वर्णितम्। 'आशा' कविता कवेः आशावादित्वं प्रकटयति, जीवने आशा मानवान् सञ्जीवनीरूपेण प्रतीक्षां कारयति, छात्रस्य आशा उत्तीर्णताप्राप्त्यर्थम्, मरणान्नस्य आशा जिजीविषायै च भवति, आशा परमं मित्रमिव वर्णिता कविना। 'विलसितं नियतं नियतेरिदम्' इति कवितामाध्यमेन कविः 'दैवम्' वर्णयति। समग्रमपि विश्वं नियतेः चक्रमिदम्, वयं सर्वे प्रेक्षकाः दर्शका वा, इत्येव कविः कर्मणा साकं नियतिचक्रस्यापि सत्तां स्वीकरोति। एवं क्रमेण जीवनदर्शन-चिन्तनपरकरचनासु कवेः व्यक्तित्वं वयं पश्यामः। यथा सः चिन्तयति तथैव लिखति, तथैव आचरणमपि करोति।

किं जीवनं ते

'किं जीवनं ते' शीर्षकान्विता रचना उर्दूगजलशैल्याः अनुकरणं करोति। अयं मुक्तकानां समूहः वर्तते सर्वाण्यपि मुक्तकानि स्वतन्त्राणि सन्ति। गलज्जलिकाशैल्यां लिखितेषु मुक्तकेषु जीवनस्य सफलतायाः साधकतत्त्वानि उल्लिखितानि, क्वचिद् हास्यव्यङ्ग्योऽपि प्रदर्शितः। कविना अस्याः रचनायाः वाचनं सर्वप्रथमं 'रायबरेलीस्थफिरोजगान्धि-महाविद्यालये' उत्तरप्रदेशे कृतम्। बरेलीनगरे 'अल्पना' नामसंस्थायामपि अस्याः वाचनं जातम्। १४.११.१९९१तमे खैष्टाब्देः आकाशवाण्या प्रसारितकार्यक्रमे 'रक्षको यत्र भक्षकः' इत्याख्येऽपि अस्याः चर्चा जाता। कवेः प्रारम्भिकी एव पङ्क्तिः मानवं चिन्तनमननार्थं विवशीकरोति यत् किं जीवनं ते? एतेषु मुक्तकेषु प्रदत्ता शिक्षा चिन्तनमात्रैणैव मानवस्य जीवनं सफलयितुं शक्नोति।

मनसि चिन्तय सखे! किं जीवनं ते
रहसि शीलय सखे! किं जीवनं ते।।[२१३]

एतेषु मुक्तकेषु सुभाषितानि मानवजीवने ,अनुभूतिपरा सत्यता, साहित्यस्य अभूतपूर्वाः शिक्षाः, शाश्वतमूल्यानि, सांस्कृतिकनिष्कर्षाः, वेददर्शनस्य च तत्त्वानि सम्मिलितानि सन्ति।

देशे, प्राप्ते निर्वाचने नेतॄणां भिक्षुकत्वं किञ्च प्राप्ते शासने तस्या एव जनतायाः आकाङ्क्षायां कटाक्षः क्रियते, तादृशेषु नेतृषु कवेः कटाक्षः तेषां (नेतॄणां) प्रबोधनाय भवतु। -

अहो दैनन्दिनी मतयाचना ते
वनीपक नेतृवर! किं जीवनं ते।
त्वया यदि शासनासन्दीमवाप्य
न लोको रञ्जितः किं जीवनं ते।।[२१४]

कविः तानमात्यानपि सावधानं करोति, ये च लोककल्याणाय न किमपि कुर्वन्ति। अमात्यपदं तु नितान्तम् अस्थायि भवति। पदेन न कोऽपि महान् भवति कार्येण महत्ता आयाति। नेतॄणां भाषणं जनाः अनर्गलं मन्वते -

सुरक्षितमस्ति नो पदमपि पलार्थम्
अहो मंत्रिप्रवर! किं जीवनं ते॥
अयं श्रोता न बोधति भाषणं ते
अनर्गलजल्पिनः किं जीवनं ते॥[२१५]

अस्माकं परम्परायां तु दीनानां सेवा महत्पुण्यदा आसीत् परमद्य स्वार्थवशात् कुनेतॄणामेव सेवायां रताः दृश्यन्ते चाटुकाराः, तान् धिक्करोति कविः-

न दीनाः सेविता शुद्धेन मनसा।
कुनेतॄन् सेवसे, किं जीवनं ते॥[२१६]

कवेः दुःखितेषु दीनेषु आस्था दृग्गोचरीक्रियते कवितायाम्, गुरुषु, मातृपितृष्वपि कवेः अविचला श्रद्धा वर्तते। कविहृदये वेदानुकूलायाः संस्कृतेः दर्शनं भवति। भारतस्य प्रतिष्ठायाः कारणानि अपि कविः 'भाति मे भारताख्ये' काव्ये निगदति।[२१७]

गुरोः पित्रोर्न चरणाः वन्दिताश्चेत्।
अहंकारात्त्वया, किं जीवनं ते॥[२१८]

अहङ्कारानन्तरं प्रेमभावस्य जागरणं भवति। स्नेहवर्णने तु सर्वेषामपि साहित्यिकानां वर्णनगोचरता दृश्यते। कविरपि प्रेमरहितं जीवनं, जीवनमेव न मनुते।

न कश्चित् प्रेमबन्धे त्वामबध्नात्
वृथाजीविन् सखे! किं जीवनं ते॥[२१९]

कविना प्रेमरहिता जना मृल्लोष्ठसंज्ञया लक्षिताः किञ्च प्रियां विना तु चन्द्रोऽपि व्यर्थः।

निपीतं नैव मधु प्रेम्णः कदाचित्
विरस मृल्लोष्ठ रे किं जीवनं ते॥
वृथा चन्द्रो वृथा मधुयामिनीयम्
न पार्श्वे ते प्रिया किं जीवनं ते॥[२२०]

कवेः स्नेहः भगवतो वन्दनां करोति सहैव जन्मभूमेः वन्दनार्थं प्रेरयति जनान्। कविः विश्वभ्रमणशीलान् जनान् भारतदर्शनार्थं प्रेरयति, यदि भारतं स्निग्धमनसा न दृष्टं चेत् किं जीवनम्।

न दृष्टं भारतं स्निग्धेन मनसा
अहो विश्वभ्रमिन्! किं जीवनं ते॥[२२१]

कवेः राष्ट्रप्रेम तस्य सर्वास्वपि कवितासु दृश्यते। स्वदेशसेवायै कविः कटिबद्धो वर्तते। स्वदेशस्य सेवा प्राणपणेनाऽपि करणीया। स्वदेशस्य स्वाभिमानो मानवस्य स्वाभिमानो वर्तते। देशसेवापराङ्मुखान् धिक्करोति कविः।

स्वदेशः सेवितो न प्राणपणतः।
विकत्थन धूर्त रे किं जीवनं ते!॥[२२२]

भौतिकजीवने स्वास्थ्यं सर्वोत्तमं धनं वर्तते। यदि स्वास्थ्यरक्षा न भवति तर्हि प्रधानतत्त्वम् अर्थोऽपि न सञ्चीयते। स्वर्णादि आभूषणानि केवलं वाह्यसुखं प्रददति। आन्तरिकं सुखं तु स्वास्थ्यमेव ददाति अतो स्वास्थ्यं नाऽस्ति चेत् किं जीवनम्।

न चेत् पार्श्वे सखे ते स्वास्थ्यवित्तम् धनैरेतैरलं किं जीवनं ते॥
न दुग्धं माहिषं व्यायामिनस्ते। सुलभमास्तेऽन्वहं! किं जीवनं ते॥[२२३]

हृष्टपुष्टेन शरीरेणाऽपि दुष्टहननं न कृतं चेत् को लाभः? कविः सर्वदा परोपकारस्य सदाचारस्य च पक्षं स्वीकरोति। परोपकारेणैव, सदाचारेणैव जीवने यशः प्रसार्यते। **'विषकुम्भं पयोमुखमिति'** लोकोक्तिं चरितार्थयतां जीवनमपि निन्द्यमेव।

मनोभावो न निर्द्वन्द्वं प्रकटितः।
कपटचारिंस्त्वया किं जीवनं ते!॥
कृतघ्नत्वं कदाचारः पिशुनता।
इमे त्वद्बान्धवाः, किं जीवनं ते!॥
मुखे मधु ते मनसि ते कालकूटः
तृणावृत कूप रे! किं जीवनं ते!॥[२२४]

मानवजीवनस्य महत्त्वपूर्णानि मूल्यानि सुसंस्कार-सदाचरण-कर्मनिष्ठा-सहृदयता-सौहार्द-दया-क्षमा-धैर्य-देशभक्ति-सुशिक्षा-धर्माचरणानि विद्यन्ते। एतैः मूल्यैरेव मानवता विकसिता जायते, किञ्च जीवने दुर्व्यसनालस्यादीनि तत्त्वानि जीवनं भस्मसात् कुर्वन्ति।

न दाक्षिण्यं न सौशील्यं, न कीर्तिः।
न सेवा नो दया, किं जीवनं ते!॥
विपदि धैर्य तथाभ्युदये क्षमा नो।
न वा युधि विक्रमः,किं जीवनं ते!॥
स्वयं नष्टः परान्नाशयसि नित्यम्।
व्यसनशतशालिनः किं जीवनं ते!॥
मुखे ते मक्षिका कुर्वन्ति भिन्भिन्।
न चोड्डाययसि रे! किं जीवनं ते!॥[२२५]

मानवजीवने साहित्य-कलायाः विशिष्टं महत्त्वं वर्तते, एतेन मनुष्यः स्वाभिलषितं प्राप्य जीवनं श्रेष्ठतरं करोति। अन्यान्यजनानां जीवनमपि सरसं करोति नवसर्जनं च प्रशस्यति। संस्कृतसाहित्ये तु कलासाहित्यादिविहीनस्य न काऽपि गतिः, सः तु पशुतुल्यः मन्यते। संस्कृतभाषायाः ज्ञानमपि मानवाय ऐतिह्यमानन्दं प्रयच्छति।

न साहित्यं न सङ्गीतं, कला वा।
न रासिक्यं च ते, किं जीवनं ते॥
त्वया स्वान्तःसुखार्थं देववाणी।
न पठिता, न श्रुता, किं जीवनं ते॥[२२६]

अन्ते च कविना संस्कृतपत्र-पत्रिकाणामपि जीवने महत्त्वं वर्णितम्। अर्वाचीनसंस्कृतस्य पठन-पाठनं श्रवणञ्च जीवने नूतनं दिशं प्रदर्शयति।

अस्य काव्यस्य सूक्ष्मतया समीक्षणेन कवेर्जीवनं दृष्टिपथम् आयाति, स्वीया अनुभूतिरेव कविना पुस्तके लिखिता, कवेः आन्तरिकं बाह्यं च व्यक्तित्वं कवितायां मुखरीभूतम्। कवितायाः पठनेन मानवस्य दिक् न परिवर्तिता चेत् किं जीवनम्? जीवनस्य एकैकमपि व्यावहारिकं पक्षम् उत्थाप्य कविः पाठकानां सम्मुखं स्थापितवान्। कवेः कार्तज्ञं तु अस्माभि प्रकटनीयम् एव। कवितायाः पाठनार्थं प्रतिजनं प्रेरणीयम्। इदमस्माकं कृते कवेः पाथेयं वर्तते। जीवनस्य प्रत्येकमपि पथि व्यवहारसरणिम् इयं कविता परिवर्तयिष्यतीति मन्ये। उर्दूच्छन्दसि, हिन्द्याः सुमेरुच्छन्दसि च लिखितायां कवितायाम् एकचत्वारिंशत् पद्यानि (द्विदलानि)सन्ति। कवितायाः भाषा सरला मधुरा च वर्तते। कवितारचनाकालः - २३.३.१९९१ खैष्टाब्दः वर्तते।

आशा

आशा शीर्षकान्वितेयं कविता कवेः सकारात्मकं चिन्तनं प्रस्तौति, समाजे आशावादिता लक्ष्यप्राप्तये नूतनान् मार्गान् प्रदर्शयति अतः आशा एव मानवान् लक्ष्यप्राप्तये प्रेरयति। आशा मरणासन्नमपि पुरुषं जिजीविषायुतं करोति, किंकर्त्तव्यविमूढं जनं कर्त्तव्यपथि अवतारयति। आशा कवेः एकं तादृशं यन्त्रं विद्यते येन सः जीवनसागरे निमज्जितोऽपि उच्चजीवनलक्ष्यं निर्धारयति। आशायाः वर्णनेन कवेः व्यक्तित्वं नितरां निर्मलं ज्ञायते एव। आशायाः वर्णनं कविः एवं करोति-

अन्धं तमो निराशा,दिनमणिराशा जगद्भर्त्री।
यत्रालोकं विकिरति तत्रोल्लासो नरीनृत्यति।।[२२७]

आशानिराशयोः मध्ये सम्बन्धं स्थापयित्वा कवेः सन्देशः स्फुटतया ज्ञायते यत् मानवेन जीवने कदापि निराशा न स्वीकर्त्तव्या, निराशायाः स्वीकरणे सति अन्धकारः वर्तते, परं आशायाः शरणं गम्यते चेदियं दिनमणिरिव मानवं उद्धरते। आशा धन्वनि मधुरं पिपासाहरं च जलं वर्तते, समुद्रे च पोतरूपा विद्यते।

आशा आबालवृद्धानां मानवानां प्राणिनाञ्च कृते जीवनं सरलं करोति। कवेः लेखनी तच्चिन्तनं भ्रमरस्य च आशां वर्णयति।

कुसुमलता निष्पत्रा कण्टकिनी नीरसा हन्त!
कदापि सरसा भवितेत्याशाश्वासयति रोलम्बम्।।[२२८]

कुसुमलता सरसा भविष्यति इति आश्वासनं भ्रमरं आनन्दयति। **''आशा बलवती राजन् शल्यो जेष्यति पाण्डवान्''** इति व्यासस्य वचनानि आशां बलवतीं साधयन्ति। तद्यथा-

आशा बलवत्यास्ते व्यासोक्तमिदं वचोऽवधार्यं वै।
नैराश्यं कूहास्ते तद्भञ्जकरविरिहास्त्याशा।।[२२९]

आशा मानवान् लक्ष्योन्मुखीकरोति, सुदृढतया कार्यं सम्पादयितुं अभिप्रेरयति, सर्वेषां आशा पृथक्-पृथक् भवति, प्रतियोगियुवकस्य आशा प्रतियोगितायां प्रथमस्थानस्य भवति, युवत्याः आशा तत्पाणिग्रहणविषयित्री भवति, मरणासन्नस्य पितुः आशा पुत्रः मुखाग्निं प्रदास्यतीतिविषयका भवति,

गर्भिण्याः आशा पुत्रस्य क्रोडे क्रीडनविषयिणी भवति। आशा सृष्टिस्थितिलयचक्रं नियमयति। तद्यथा–

सृष्टिस्थितिलयचक्रं सदातनं भ्रामयत्याशा।
सैवास्ते प्रभुमाया सैवास्ते जीवनालम्बः।।[२३०]

ये जना आशापाशे निबद्धाः न सन्ति ते तु लक्ष्यभ्रष्टाः इव, ते न किमपि कर्तुम् इच्छन्ति। भर्तृहरेरनुसारं 'आशा एका नदी' अस्ति। परं इयं नदी दुस्तरा (न कोऽपि पारं गन्तुं शक्नोति) एव वर्तते, अर्थात् आशायाः काऽपि सीमा नास्ति, सीम्नः परे वर्तते इयं आशा। कवेरनुसारं आशा जीवनालम्बः वर्तते। तद्यथा–

आशा बन्धो वा स्यादाशा पाशोऽथवा भवतात्।
आस्तामाशा वायुर्वाशास्ते जीवनालम्बः।।[२३१]

कवेः सन्देशः विफलीभूतानां कृते वर्तते। असफलानां कृते कविः आशावादितायाः सञ्चारं करोति। तद्यथा

विफलीभूतैश्छात्रैः कदापि हेयास्ति नैवाशा।
आगामिनी परीक्षा तेभ्यो दास्यति समधिकाङ्कान्।।[२३२]

कवेः सन्देशः सर्वदाऽपि मानवानां कल्याणार्थं भवति आशामाध्यमेनाऽपि सः मानवान् सन्मार्गं प्रति गमनाय प्रेरयति। कवेः कथनमस्ति यत् कदापि सदुद्देश्याय एव आशा करणीया क्षुद्रकामनानां पूर्तये आशा न कर्त्तव्या।

क्षुद्राणां कामानां पूर्तेराशा न कर्त्तव्या।
किन्तूदात्तोद्देश्यप्राप्तेराशा तु करणीया।।[२३३]

आशायाः स्पर्शमात्रेण मनुजः सुन्दरो भवति । आशया त्यक्ते सति तज्जीवनं व्यर्थं जायते, अन्ते च कविः आशां स्वीयां प्रेरणादात्रीं घोषयति।

अहमस्म्याशावादी सास्ते मे प्रेरणादात्री।
नैवापयातु सा मे हृदयात्सञ्जीवनी शक्तिः।।[२३४]

कवितायामस्यां कवेः संवेदना आशारूपिण्याः सञ्जीविन्याः स्वरूपं धृत्वा मनुष्यान् अभिप्रेरयति। सदुद्देश्यस्य प्राप्तये आशा कदापि न त्याज्या। कवेः जीवनं आशामयं वर्तते। आशा न केवलं कवेः प्रेरणादात्री अपितु समेषां मानवानां कृते सुगन्धितपुष्पमिव वर्तते। सर्वदैव कुसुमितं, हासयुक्तम्। आर्यागीति–

उपगीतिच्छन्दःसु रचिता इयं कविता मरणासन्नेऽपि पुरुषे आशायाः सञ्चारं करोति, इयं केवला आशा नाऽस्ति, कवेः जीवनदर्शनं वर्तते यस्य माध्यमेन स अन्यानपि प्रेरयति, कवेः सामाजिकं जीवनम् अपि आशापूरितं वर्तते, तस्य स्वरः सर्वत्राऽपि आशासञ्चारितो दृश्यते–

आशा न परमदुःखं सुखार्जनस्यास्ति मूलमियम्।
छिन्ने मूले न स्यात् पत्रं पुष्पं तथा च फलम्।।[२३५]

मदीयकविते कुरुष्व गानम्

काव्यं कवेः हृदयस्य गानं भवति यच्च गानं भावगर्भितां संवेदनां व्यनक्ति राष्ट्रीयतायाः भावबोधं च द्योतयति। कवेः शुक्लस्य कविता पृथक्भूता सत्येन चमत्कृता च भवति, कविः जनमानसं आवर्जयति स्वीयया कवितया स्वकीयं व्यक्तित्वमपि सहैव प्रकटयति। भवतः कविता राष्ट्रसमुपासकानां गीतं गायति। कवेः प्रथम एव श्लोकः विद्वज्जनसमर्पितः वर्तते–

सरस्वतीपादपद्मसेवा यदीयमास्ते परं हि लक्ष्यम्।
बुधाग्रगाणामतन्द्रितानां मदीयकविते कुरुष्व गानम्।।[२३६]

येषां काव्यं न कदापि उद्देश्यरहितं व्यर्थभूतं च भवति, येषां शब्दचयनं चमत्करोति ते पाठकहृदयेषु अतितरमानन्दं जनयन्ति।

कदापि वागर्थनाम येषां प्रयुक्तमस्त्रं वृथा न हि स्यात्।
अलोकसामान्यसत्कवीनां मदीयकविते कुरुष्व गानम्।।[२३७]

मातृभूमिः भवति सर्वेषामाश्रयस्थली, तस्या एव गौरवगानाय कविः प्रेरयति स्वीयां कविताम्। मातृभूमिः अस्मान् पोषयति, अस्मभ्यं खाद्यपदार्थं ददाति। जनन्याः महत्तां मर्यादापुरोषत्तमः श्रीरामचन्द्रोऽपि[२३८] स्वीकरोति। भारतभूम्यां सर्वेषु भारतीयेषु रागात्मकसुदृढतायाः उदयो जायते, यतो हि मातृभूमेः उदरोद्भूताः समेऽपि तस्याः विकासार्थं रक्षार्थं च सर्वात्मना संलग्नाः भवन्ति आत्मानं च गौरवान्वितं मन्वते।[२३९]

यदीच्छसि त्वं जनिं स्वकीयां सदर्थितां कर्तुमार्यशीले।
तदा महिम्नां स्वमातृभूमेः मदीयकविते कुरुष्व गानम्।।[२४०]

परोपकारेणैव मानवः '**स्वावधारणाया**' बहिर्गत्वा '**परस्य**' विषये चिन्तयति। राष्ट्ररक्षायै दधीचिना प्राणायामेन स्वास्थीनि समर्पितानि। शिविमहोदयेन

कपोतपक्षिणः रक्षायै शरीरस्य मांसं प्रदत्तम्, भारतस्य नैके महान्तः लोकहिताय स्वीयं सर्वस्वमर्पितवन्तः[२४१] एतादृशाणां परोपकारव्रतिणां गीतं गायति कवेः कविता-

परोपकारव्रतं पवित्रं सदैव ये पालयन्ति हृष्टाः।
सुपूजितानां नृणां हि तेषां मदीयकविते कुरुष्व गानम्।।[२४२]

कवेः कविता भ्रातृत्वभावपरिचायिका भूत्वा विश्वबन्धुत्वं स्थापयति, पुनः समग्रेऽपि विश्वे 'वसुधैव कुटुम्बकम्' इति भावनायाः प्रसारं करोति अथ च जगत् कुटुम्बं विधातुं प्रयत्नशीलान् अपि वन्दते।

कुटुम्बमेकं जगद्विधातुं जनाः सदा ये प्रयत्नशीलाः।
प्रहृष्य तेषां महात्मनां त्वं मदीयकविते कुरुष्व गानम्।।[२४३]

पृथिव्याः स्वर्गभूते भारते ७० प्रतिशतं जनसंख्या ग्रामेषु वसति, तेषां व्यवसायः कृषिकार्यं, कवीन्द्ररवीन्द्रस्य प्रसिद्धं कथनं कृषकं देवतुल्यं करोति। कृषकः अन्नदाता वर्तते, अन्नदातुः[२४४] कृते कवेः गीतम् आनन्दयति सहृदयान्-

विषह्य शीतोष्णवर्षकष्टप्रकोपमप्यन्नदायकानाम्।
तपस्विनां क्षेत्रकर्षकाणां मदीयकविते कुरुष्व गानम्।।[२४५]

भूमेः अन्नमुपभुज्य देशस्य भटाः स्वावलम्बनेन भारतराष्ट्रं स्वतन्त्रं कारितवन्तः, नैकाः अमानवीययातना अपि सोढ्वा ते अमराः जाताः। कारागारेषु तेषां जीवनं कठिनतरमासीत् तादृशानां गीतं गातुं कवेः कविता उत्सुकाऽस्ति।

स्वतंत्रतायज्ञदीक्षितानां चिराय कारासु पीडितानाम्।
मृतिंवराणां नरोत्तमानां मदीयकविते कुरुष्व गानम्।।[२४६]

राष्ट्रोन्नतये संलग्नान् शिल्पकर्मकरान्, मूर्त्तिकारान् प्रति कवेः अपारश्रद्धा वर्तते, ते तावत् मृदाश्मना, काष्ठखण्डैश्च नूतनजगतः निर्माणं कुर्वन्ति तेषां सर्जनात्मकं कृत्यजातं भारतीयाभिवृद्धिं करोति। कवेः कविता तेषां गानं करोति-

मृदाश्मना काष्ठकखण्डकैर्वा सृजन्ति ये नूतनां स्वजगतीम्।
यशस्विनां शिल्पिनां हि तेषां मदीयकविते कुरुष्व गानम्।।[२४७]

अस्यां कवितायां कविना देशनिर्माणे रतानां गौरवस्य गानं गीतम्। कविना गुरूणाम्, देशायार्पितसर्वस्वजीवनानां भटानाम्, अन्वेषणरतवैज्ञानिकानाम्, उद्योगानाम्, विविधक्रीडासु देशस्य मानवर्धनरतानां क्रीडकानाम्, सत्यां

निर्धनतायामपि प्रसन्नमनसां श्रमिकाणाम्, पित्रोः यशःप्रसारकाणाम्, जगतः भूषणभूतानां सत्पुत्राणाम्, राष्ट्ररक्षायै स्वकर्त्तव्यनिर्वाहोत्सुकानां राष्ट्रभक्तानाम्, प्रजातंत्ररक्षकाणाम्, उदारसङ्कल्पवताम् अयाचितव्रतानाम्, कुकृत्यापसारणमनसां समाजसुधारकानाम्, वैद्यादि उदारमनीषिणां वन्दनं कर्तुं स्वीया कविता प्रेरिता।

"बहरे मुतकारिब मुसम्मन् मकबूज असलम मुजाइफ" इति उर्दूच्छन्दसि (बहर) रचिता इयं कविता राष्ट्रप्रेमिणां सहयोगं तेषामौदार्यं च प्रकटय्य स्वीयं निर्मलव्यक्तित्वमपि वर्णयति कविः। कवेः मनसि यथा भवति तथैव वर्णने आयाति। अस्यां कवितायां २५ श्लोकाः सन्ति। रचनाकालः २६-१२-१९९३ खैष्टाब्दः वर्तते।

विलसितं नियतं नियतेरिदम्

जीवन-चिन्तनपरकरचनासु 'विलसितं नियत नियतेरिदम्' शीर्षकान्विता कविता कवेः दैवसम्बन्धितं चिन्तनं प्रकटयति, अस्माकं भारतीयपरम्परायां नियतेः महद् प्रभावो भवति। नियतिः राजानं रङ्कसदृशं रङ्कञ्च राजानं कर्तुं क्षमेति अस्माकं साहित्ये बहुभिः वर्णिताऽस्ति। भारतीयपरम्परायां कर्मसिद्धान्तेन साकं नियतिसिद्धान्तमपि महद् गौरवं स्थापयति। अस्माकं साहित्ये अपि नियतेः गुणगानं समये-समये क्रियते- यथा

भाग्यं फलति सर्वत्र न विद्या न च पौरुषम्।[२४८]
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः॥[२४९]

कविना शुक्लेन कवितामाध्यमेन भाग्यस्य यत्स्वरूपम् प्रत्यपादि तत्तु निश्चयमेव परम्परानुसरणं वर्तते। कवेरनुसारं वयं सर्वे नियतिनाटकं द्रष्टुम् आगताः। यथा

नियतिचक्रमथोऽनुसरत्यदः सकलविश्वमवश्यमनारतम्।
नियतिनाटकमीक्षितुमागताः वयमिमे सकलाःभुवने जनाः॥[२५०]

नियतिचक्रमनुसरन् सकलमपि विश्वं नियतिनाटकं द्रष्टुं प्रेक्षकत्वं निर्वहति। प्राणिमात्रं नियतेः चक्रानुसारी वर्तते। नियतिचक्रनियमिताः न केवलं मानवाः देवताः अपि नियतिचक्रेण निबद्धास्सन्ति। तद्यथा-

शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि बन्धनम्।
मतिमतां सततं च दरिद्रता विलसितं नियतं नियतेरिदम्॥[२५१]

'मतिमतां सततं च दरिद्रता' इति कथनं विरोधाभासं प्रदर्शयति, यतो हि–कवयोऽपि विद्वांस एव प्रतिभायुताः एव अतः मम्मटादिकाव्यविदां "**काव्यं यशसेऽर्थकृते व्यवहारविदे, शिवेतरक्षतये सद्यः परनिर्वृतये........**"[२५२] इति वाक्येन साकं कदाचित् विरोधं न स्थापयेयुः। वस्तुतस्तु 'मतिमतां दारिद्र्यम्' इति कथनं केवलं नियतिचक्रस्य पुष्ट्यर्थं मन्ये। प्रभूतम् उद्यमं सम्पाद्यापि यदि असफलता एव लभ्यते तदा जनाः वदन्ति यत् विलसितं नियतं नियतेरिदम्, जनाः विवशीभूताः नियतिम् एव तदानीं स्मरन्ति, नियतेः विलासेनैव सहजोऽपि शत्रुः सखा, सहजमपि मित्रं रिपुतां याति, सत्पुरुषा अपि बन्दिगृहं व्रजन्ति।

सहजशत्रुरपीह भवेत्सखा सहजमित्रमथो रिपुतां गतः।
व्रजति वन्दिगृहं जनपूजितो विलसितं नियतं नियतेरिदम्॥[२५३]

विश्वस्य पालकः भगवान् विष्णुः संहारकः शिवश्चाऽपि नियतिचक्रेण सन्निबद्धौ दृश्येते अतएव हिमालये शिवः, पन्नगतल्पे च हरिः निवसतः–

स्वपिति पन्नगतल्पगतो हरिर् हिमगिरिं श्रयते च दिगम्बरः।
अमृतमेव विषं भवति क्वचित् विलसितं नियतं नियतेरिदम्॥[२५४]

अस्मिन् जगति यत्किमपि अघटितं घटते, यत्किमपि विपर्यय-ताण्डवं भवति, सर्वमपि नियतेः चक्रमेव–

भुवि जले पवने गगनेऽनले भवति यद्धि विपर्यय-ताण्डवम्।
अघटितम् घटते सहसा च यत् विलसितं नियतं नियतेरिदम्॥[२५५]

द्रुतविलम्बतच्छन्दसि रचितायां कवितायां सप्तसु श्लोकेषु कविना नियतिचक्रस्य विलासः वर्णितः। कवेः मनीषा इयमेव वर्तते यत् जनाः कर्मणि रता अपि नियतिं न विस्मरेयुः। नियतिं न कोऽपि बाधितुं शक्यते, नियतिमुक्तः न कश्चिदपि मानवो, देवो वा दृश्यते। वैज्ञानिकयुगे कर्मणि विश्वासरताः जनाः नियतिं न जानन्ति। नियतेरियम् अवधारणाऽपि प्राचीना एव। आधुनिके प्रौद्योगिकीसम्पन्ने समाजे नियतेः स्थानं तिलमिव। कविः नियतिमाध्यमेन अस्माकं संस्कृतेः गौरवं स्मारयति, कञ्चन नूतनविमर्शं प्रस्थापयति पाठकानां समक्षम्।

३.७ व्यङ्ग्यपरकरचनानां समीक्षणम्

सर्वशुक्लोत्तराकाव्यसङ्ग्रहे कविना नैकाः व्यङ्ग्यपरकरचनाः सङ्गृहीताः। कवेः लेखनी राजनीति-शासनासन्दिका-लोकतंत्र- परमाण्वानुबन्ध- सदृशाः समस्याः उत्थाप्य तत्र कुठाराघातं करोति। कवेः व्यङ्ग्यम् अत्यन्त- तिरस्कृतवाच्येन अस्माकं पुरः समायाति। अस्मिन् शीर्षके कविना वन्दनीयास्ते, वन्द्यतां काऽपि सा शासनासन्दिका, लोकतंत्रेऽस्मिन्, योऽयंकृतः शपथस्त्वया, किं कुर्यात्, निर्वाचने प्राप्ते, अभिनवहितोपदेशः, परमाण्वनुबन्ध, मित्रतां कामये शात्रवं चाश्रये इत्येताः कविताः सङ्गृहीताः। वन्दनीयास्ते इत्यत्र राजनेतारः, मद्यपाः, वञ्चका, कलङ्कयुताः कि वन्दनीयास्ते? अर्थात् निन्दनीयान् अकर्त्तव्यपरायणान् धिक्करोति कविः। 'वंद्यतां काऽपि सा शासनासन्दिका' शीर्षकान्वितायां शासनासन्दिकाम् अत्यन्ततिरस्कृतवाच्यध्वनिना न्यक्करोति। एवं सर्वत्राऽपि निन्दनीयान् निन्दति अन्यान् च समुपासते। व्यङ्गपरकरचनासु एतासां कवितानां क्रमशः समीक्षा सम्पाद्यते।

वन्दनीयास्ते

डॉ. शुक्लप्रणीता इयं कविता १४-१-१९९३ तमखैष्टाब्दस्य मकरसंङ्क्रान्तौ पूर्णतां गता। इयं रचना सर्वप्रथमम् 'अर्वाचीनसंस्कृतम्' पत्रिकायां १५/१ अङ्के १९९३ तमे खैष्टाब्दे प्रकाशिता। १९९२ तमवर्षस्य पूर्वार्द्धमशान्तिग्रस्तम् आसीत्। ‍ि दिसम्बर, १९९२ तमे खैष्टाब्दे घटिता घटना प्रश्नचिह्नं स्थापयति समीक्षकाणां पुरतः। कैश्चित् उक्तं यत् 'मातृभूमेः कलङ्कः कारसेवकैः दूरीकृतः'। 'प्रजातंत्रं विफलितमद्य' इति अन्ये वदन्ति स्म। धर्मनिरपेक्षतायाः घोरताण्डवमभूत्, बहुषु स्थलेषु गृहयुद्धं जातम्। इत्येताः वार्ताः सर्वैरपि वार्तापत्रेषु पठिताः। देशस्य दुर्भाग्यमिदं! कीदृशाः नेतारः, कीदृशाः बुद्धिजीविनः?, कीदृशी सद्भावना-यात्रा? कीदृशम् आगामिनिर्वाचनम्? इयम् आसीत् पृष्ठभूमिः अस्याः रचनायाः। इयं कविता 'मन्दाकिनीकाव्यगोष्ठ्यां, हिमाचलप्रान्ते च अखिलभारतीयकविसमवाये पठिता कविना।

प्रश्नशैल्यां रचितायामस्यां कवितायां ५३ पद्यानि सन्ति। प्रश्नकाव्यदृष्ट्या यदि समीक्षा क्रियते चेत् एतादृशं काव्यं ऋग्वैदिककालात् प्रचलदस्ति नासदीयसूक्ते सृष्टिरचनासन्दर्भे प्रश्नकाव्यं प्राप्यते। रामायणेऽपि प्रश्नकाव्यस्य स्वरूपं प्राप्यते। महाभारतस्य यक्षप्रश्नास्तु प्रसिद्धाः एव।

आधुनिकसंस्कृत-जगति अपि अस्याः परम्परायाः निर्वाहः जातः। परमानन्द-शास्त्रिणा 'विप्रश्निका' नामकाव्ये १००पद्यानि रचितानि। कविवरशुक्लेन समकालिके समाजे परिवर्तनं दृष्टम्। सर्वत्र प्रवञ्चना, भ्रष्टाचारः, राजनीतौ विकृतिः, बलात्कारादयः दरीदृश्यन्ते। एतासां समस्यानां जागरणे जागरूकैः भाव्यम् नागरिकैः। एते प्रश्नाः यथार्थास्सन्ति। कविना नूतनया दृष्ट्या कवितायाः प्रस्तुतीकरणं कृतम्।

कविना मातृभूमेः दुर्दशा प्रश्नचिह्नाङ्किता क्रियते। वर्ण्यते च-

इयं स्वर्गाधिका मे मातृभूमिर्वन्दनीयास्ते।
परं यास्या दशाद्यत्वे, कथय किं वन्दनीयास्ते?[२५६]

कवितायाः पूर्वार्द्धे कविः देशं स्वर्गादपि श्रेष्ठं मनुते, परं मातृभूमेः या दशा अद्य वर्तते किं साऽपि वन्दनीया? इयं भूमिरद्य जाति-भाषा-क्षेत्रादिषु विभक्ता वर्तते। राष्ट्रस्य वन्दनायामेव राजनीतिः भवति। विविधानि कुचक्राणि निन्दनीयानि, अस्माकं देशस्य एकतानिबन्धने नैके गणमान्याः योगदानं प्रदतवन्तः। सरदारबल्लभभाईपटेलमहोदयेन द्विशताधिकाः रियासताः (प्रदेशाः) भारतेन सह मेलिताः। तादृशाः पुरुषाः खालिस्तान सदृशनवीनराष्ट्रसङ्कल्पनामेव न्यक्कृतवन्तः। तस्मिन् एव राष्ट्रे अद्य राजनीतिस्वार्थवशात् एकतायाः विखण्डनं क्रियते। तादृशानां चिन्तनं न कदापि वन्दनीयम् -

जना एकत्वसूत्रे यैर्निबद्धा वन्दनीयास्ते।
जनान् ये योधयन्ति प्रत्यहं किं वन्दनीयास्ते।।[२५७]

भारतराष्ट्रं वीराणां भूमिः वर्तते। मातृभूमेः गौरवाय नैके योद्धारः स्वकीयं सर्वस्वमर्पितवन्तः। वीराणां सततरक्षया रक्षितस्य देशस्य कतिपये राजनेतारः देशं जर्जरीकृत्य लुण्ठन्ति, सततं स्वीयमेव स्वार्थं चिन्तयन्ति, स्वीयां दरिद्रतामपि अपसारयन्ति। डॉ. शिवसागर-त्रिपाठिमहोदयः 'सर्वं स्वार्थं समीहते' शीर्षकान्वितायां कवितायां लिखति-

भ्रष्टाचारस्य नागस्य विषज्वाला भयंकरा।
तया ग्रस्तोऽस्ति देशोऽयं, विषवैद्यो न दृश्यते।।
सम्प्रति पूते देशेऽस्मिन् भ्रष्टाचारभुजंगमः।
अग्रतः पृष्ठतश्चाऽपि, वामतो वापि दक्षतः।।[२५८]

स्विसनामकेषु कोषागारेषु ये कोटि-अर्बुदपरिमितं धनम् संकलयन्ति ते न कदापि वन्दनीयाः।

तिडं ताडं, समुद्रं गोष्पदं, मेरुं कणं कर्तुम्।
समर्था आसते ये सूचनादाः, वन्दनीयास्ते।।२५९

भारतीयराजनीतिः कुटिला जाता अधुना, राजनीतौ गतः सन् सज्जनोऽपि निर्लज्जः जातः, सः सत्कृत्येभ्यः दूरं गत्वा दुष्कृत्येषु संलग्नो भवति, तस्य कृत्यानि न तं सम्मानयितुं शक्नुवन्ति।

ते (राजनेतारः) पूर्वं तु छन्ददात्र्याः प्रजायाः चरणेषु शीर्षं निदधति, प्राप्ते विजये सति छन्ददात्र्याः एव रक्तपानं कुर्वन्ति। दुष्कृत्यपरिपूताः एतादृशः राजनेतारः न वन्दनीयाः।२६० (वोट) समर्थनार्थं कदाचित्ते धर्मपरायणाः, कदाचिच्च धर्मस्याधिकारिणः छन्ददात्रीं प्रजामेव लुण्ठन्ति देशस्य दुर्दशां न ते पश्यन्ति, ते तु निर्वाचनसमीकरणे एव व्यस्ताः भवन्ति भारतीयजनमानसस्य दुःख-सुखयो उपेक्षा एव क्रियते तैः। एतादृशाः नेतारः सदैव निन्द्याः।

वैदिककालादारभ्य यस्य देशस्य सर्वदैव गौरवगानं जातं तस्यैव देशस्य निन्दां सम्पाद्य विश्वबन्धुत्वसम्पादनार्थं वार्तारतानां प्रयासरतानां च जनानां मूलमेव तैः छिन्नं, तेषां फलप्राप्त्याशा एव मूर्खता वर्तते। तादृशाः राजनेतारः किं वन्दनीयाः?

स्वदेशं निन्दयन्तो विश्वबन्धुत्वस्य वक्तारः।
फलं काङ्क्षन्ति ये मूलं विना, नो वन्दनीयास्ते।।२६१

भारतदेशे किञ्च अखिलेऽपि भूमण्डले हिंसा-अराजकत्व-आतङ्कवाद-भ्रष्टाचारादि कुकृत्यानां घोरताण्डवं जायते। ये कुकृत्यैः सज्जनानां जीवनं दुरूहतरं कुर्वन्ति, तान् पीडयन्ति च, न ते वन्दनीयाः न ते सम्मानार्हाः।

रमाकान्त! व्यथां देशस्य विश्वस्याथ निजकृत्यैः।
जना ये वर्धयन्ति प्रत्यहं किं वन्दनीयास्ते।।२६२

कविना अस्यां कवितायां मातृभूमेः रक्षकवीराणां स्थानं ससम्मानं प्रदत्तमस्ति। देशरक्षार्थं स्वीयाङ्गान्यपि यैः कर्तितानि ये कारागारेषु निबद्धाः, असह्यवेदनां स्वीकृत्याऽपि कटिबद्धैः यैः मातृभूमेः रक्षा कृता, तेषां वीराणां वन्दनं क्रियते।

निबद्धास्ताडिता निहता तथा विकलाङ्गतां याताः।
जना ये देशरक्षार्थं, न केषां वन्दनीयास्ते।।२६३

एवमस्यां कवितायां कविना कुकृत्येषु कुठाराघातः कृतः। कवेः संवदेना भारतराष्ट्रं समीहिततरं कुरुते। इयं संवेदना क्लिन्नात्मानं भारतं भारतं कर्तुं यतते। देशस्य रक्षकाः एव राष्ट्रं कलङ्कितं कुर्वन्ति। येषां हस्ते राष्ट्रस्य कुञ्जिका वर्तते त एव कुठाराघातं कुर्वन्ति। 'विजाति'च्छन्दसि रचितेयं रचना। अथवा उर्दूछन्दसि रचिता इयं कविता राष्ट्रैकत्वसम्पादनाय जनान् प्रेरयति।

वन्द्यतां काऽपि सा शासनासन्दिका

स्वतंत्रताया अनन्तरं स्थापितेऽस्मिन् लोकतंत्रे समयेन सहैव काश्चन विकृतयोऽपि आगताः। एतासां विकृतीनां सम्मुखीकरणं करोति समाजः। अद्यतनीयाः नेतारः अधिकारिणः वा शासनसत्तां प्राप्य, आसन्दिकां प्राप्य परिवर्तिताः भवन्ति। परिवर्तनेऽस्मिन् शासनासन्दिकात्वमेका जटिला समस्या वर्तते। सामान्या जनता लघु-लघु समस्याः स्वीकृत्य एतेषामेवाग्रे गन्तुं विवशाऽस्ति। परिवर्तिन्यामस्याम् आसन्दिकायां अन्याऽन्या एव व्यक्तिः उपविशति। स्वातंत्र्योत्तरसंस्कृतसाहित्ये परमानन्दशास्त्रि-राजेन्द्रमिश्र-डॉ. प्रशस्यमित्र-डॉ. उमाकान्तशुक्लसदृशाः कवयः आसन्दिकामभिलक्ष्य कवितां लिखितवन्तः। २६ जून-१९९५ तमे ख्रैष्टाब्दे लिखितायामस्यां कवितायां आसन्दिकायाः वन्दना व्यङ्ग्यार्थया वाण्या कृताऽस्ति।

कविः तादृशीं शासनासन्दिकां वन्दते या हि जन्मजन्मान्तरीयं वैर-भावं विस्मृत्य नेतॄन् एकतां प्रापयति। अत्र कवेः व्यङ्ग्यार्थवैभवं दर्शनीयम्-

जन्मजन्मान्तरीयं स्वकीयं परं
वैरभावं परित्यज्य यस्या वशात्।
एकतां यान्ति नेतार एकक्षणे
वन्द्यतां काऽपि सा शासनासन्दिका।।[२६४]

अस्यां शासनासन्दिकायामुपविश्य शासकाः प्रजां विस्मरन्ति, तस्याः पीडनं कुर्वन्ति। अपवञ्चनायाम्, भ्रष्टाचारे एव तेषां विश्वासः भवति, स्वार्थम् एव ते सफलीकुर्वन्ति

लक्ष्यकोट्यर्बुदानामहो वञ्चनं
शान्तभावेन यां प्राप्य कर्तुं क्षमम्।
यां श्रितैश्छन्ददात्री प्रजा पीड्यते
वन्द्यतां काऽपि सा शासनासन्दिका।।[२६५]

शासनासन्दिकां प्राप्य अक्षरज्ञानशून्या अपि पुरुषार्थचतुष्टयस्य उपदेशकाः भवन्ति। सर्वासु विद्यासु त एव प्रवीणाः पारङ्गताश्च भवन्ति। सत्कलाचुञ्चवो भवन्ति शासनासन्दिकायामुपविश्य ते। अत्र कवेः गम्भीरः पूर्वप्रतिबोधो विद्यते। तद्यथा–

धर्मकामार्थमोक्षोपदेशाकराः ,
सर्वविद्याचणाः सत्कलाचुञ्चवः।
अक्षरज्ञानशून्या अपि स्युर्यया,
वन्द्यतां काऽपि सा शासनासन्दिका।।२६६

शासनासन्दिकां प्राप्तुम् अस्माकं जनप्रतिनिधयः क्रूरां कुत्सितां च नीतिं स्वीकृत्य कुमार्गगामिनो भवन्ति। ते परस्परं कलहं सम्पादयन्ति, यया जनतया ते प्रतिनिधित्वेन नियुक्ताः तामेव जनतां विस्मरन्ति–

यां विधातुं करस्थां न किं किं कृतं
चातुरीभ्राजितैर्नेतृवर्यब्रुवैः।
यां समासाद्य विस्मर्यते तैर्जनो
वन्द्यतां काऽपि सा शासनासन्दिका।।२६७

शासनासन्दिकायाः प्रभावेण सद्गुणसमूहेषु दोषाणामुद्घोषणा सहजतयैव कर्तुं शक्यते। दुर्गुणेषु च सद्गुणानामुद्घोषणा सहजं कर्म भवति। अस्याः साहाय्येन नैके अपवञ्चना-दस्युता-प्रभृतयो दुर्गुणा अपि वन्दनीयाः भवन्ति।

वञ्चनं मित्रघातस्तथा दस्युता
निस्त्रपत्वं कृतघ्नत्वमित्यादयः।
दुर्गुणाः वन्द्यतां यान्ति सद्यो यया
वन्द्यतां क्वापि सा शासनसन्दिका।।२६८

विंशशताब्देः अन्तिमं दशकं नेतॄणां चारित्रिकपतनस्य समयः मन्यते। राजनीतेः ध्येयं आसन्दिकाप्राप्तिरेव। एभिरेव नेतृभिः स्वीया निष्ठा विस्मारिता, स्वीयं धर्मः विस्मृतः। समग्रेऽपि देशे प्रतिकूलता कृता। जनाः देशसेवाया देशभक्त्याश्च विमुखाः सञ्जाताः। सर्वतोऽपि मुख्यं शासनं, पदम् जातम्। हुतसर्वस्वाणां वीराणाम् अपि चिन्ता शासनासन्दिकया त्यक्ता।

यं स्वतन्त्रं विधातुं हुतं जीवनं
देशभक्तैरसंख्यैर्विलम्बं विना।
तस्य देशस्य चिन्ताऽपि हेया यया
वन्द्यतां काऽपि सा शासनासन्दिका॥[२६९]

वैभवप्रदात्र्याः आसन्दिकायाः प्रशंसनम् अद्य देशस्य सर्वेऽपि जनाः (आबालबृद्धाः) कुर्वन्ति।

पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः
सर्वकैरेव याद्यत्व आराध्यते
सर्वसौख्यप्रदात्री समेषां नृणां
वन्द्यतां काऽपि सा शासनासन्दिका॥[२७०]

एकविंशशतकस्य प्रथमो दशकः दशमसंस्कार इव जातः, यथा मानवस्य मृत्योरनन्तरं दशमे दिवसे दशमसंस्कारः जायते तद्वदेव अद्यतननागरिकाः शासकवर्गस्य कृते वोटप्रदातृरूपेणावस्थिताः दशवर्षाणि यावत् तेषा वञ्चनं कृत्वा निर्वाचनसमये तान् सम्मानयति। भारतीयजनता तु पशुमात्रमिव निरीहा जाता तस्य मौलिकाधिकारा अपि नष्टप्राया एव। प्रजायाः दशां द्रष्टुं न कोऽप्यवशिष्टः, जनाकाङ्क्षायाः प्रवञ्चनार्थं राजनेता अवतरितः। कविमुखात् सहसैव निर्गच्छति–

केनचिद्दृश्यतामस्मदीया दशा
स्थापिता मूर्ध्नि येऽस्माभिरुत्साहिभिः।
हन्त तैरेव वञ्च्यामहे यद्वशात्
वन्द्यतां काऽपि सा शासनासन्दिका॥[२७१]

अस्यां कवितायां कवेः व्यङ्ग्यात्मिका वाणी अत्यन्ततिरस्कृत-वाच्यध्वनेः विषयतामङ्गीकरोति। (सा शासनासन्दिका प्रवञ्चनं करोति मित्रघातं तथा दस्युतां करोति अहो वन्द्यताम् इयं शासनासन्दिका अत्र वन्द्यताम् इत्यत्र ध्वनिः।) स्रग्विणी छन्दसि रचितायाम् अस्यां कवितायां एकादशपद्यानि सन्ति। अस्याः रचनाकालः २६ जून–१९९५ खैष्टाब्दः वर्तते।

कवेः संवेदनास्वरः राजनीतिं शासनासन्दिकाञ्च दुत्करोति। खिन्नात्मना एतस्याः दुगुर्णान् अस्माकं पुरस्तात् स्थापयति सहैव सावधानान् अपि करोति अस्मान् यदियम् आसन्दिका तुच्छीभूताऽस्ति अस्माकं शत्रुभूता चाऽस्ति।

लोकतन्त्रेऽस्मिन्

लोकतंत्रस्य प्रजातंत्रस्य वा शाब्दिकार्थो वर्तते प्रजायाः शासनम्। लोकतंत्रे निश्चितावधये प्रजा शासकान् निश्चित्य तेभ्यः शासनाय अधिकारं प्रयच्छति। अस्याः शासनप्रणालेः प्रमुखा विशेषता वर्तते यत् अत्र सर्वेषां वर्गाणां प्रतिनिधित्वं भवति। या सर्वजनहिताय सर्वजनसुखाय भवति सा शासनपद्धतिः लोकतन्त्रम्। अधुना अस्यां शासनपद्धतौ नैके विकाराः समागताः, तेषां विकाराणां जीवद् वर्णनं करोति इयं कविता, विकारेषु कवेः कटाक्षपातो दर्शनीयो भवति। प्रथमे एव पद्ये अस्य लोकतंत्रस्य विचित्रां दशां वर्णयति कविः।

अकल्प्यं किं न घटते भावगम्ये लोकतंत्रेऽस्मिन्।
भवति किं, किं भविष्यति वा न जाने लोकतंत्रेऽस्मिन्॥[२७२]

शासनं हस्ते कर्तुं परस्परं वैरिणोऽपि प्रीतिं साधयन्ति। तेषामुपरि कवेः कटाक्षपातः दर्शनीयो वर्तते।

मयूरव्यालशालूराः स्वकीयं काङ्क्षितं लब्धुम्।
स्थिता एकत्र गतवैरा महिष्ठे लोतंत्रेऽस्मिन्॥
विडाला मूषकैस्साकं वृका हरिणैस्समं मैत्रीम्
प्रकुर्वाणा विलोक्यन्ते पदार्थं लोकतंत्रेऽस्मिन्॥[२७३]

राहु-चन्द्रमसोः मैत्री, दुग्धनिम्बुकयोः मैत्री, अजानां कोटिकैस्साकं मैत्री दर्शनीयाऽस्ति-

विधुन्तुदचन्द्रयोः प्रीतिः, पयोजम्बीरयोः प्रीतिः।
अजानां कोटिकैः प्रीतिर्विलोक्या लोकतंत्रेऽस्मिन्॥[२७४]

अस्मिन् लोकतंत्रे हैयङ्गवीनस्य मैत्री अग्निना साकम्, कदल्या मित्रता बदर्या साकम्, काकानां मैत्री उलूकैः सह, दिवसस्य रात्र्या सह मैत्री भवति अर्थात् सर्वेऽपि विरोधिनः एकीभूताः जाताः। अस्मिन् लोकतंत्रे भक्ष्यभक्षकयोः मध्येः सख्यं विपत्तेः मूलं नास्ति। कवेः कटाक्षं पश्यन्तु-

शृणुध्वं रे सुबद्धं भक्ष्यभक्षकसख्यमिह लोके।
विपत्तेः कारणं नास्ते सुपूज्ये लोकतंत्रेऽस्मिन्॥[२७५]

विपत्ते कारणं तु प्रवञ्चना- भ्रष्टाचारादि कुकृत्यानि विद्यन्ते।

भारतीयलोकतंत्रं विश्वस्य विशालतमं लोकतंत्रमस्ति। तस्य गरिम्णो भञ्जनं जायते अधुना, कतिपये नेतारः गरिमपूर्णे सदने असंसदीयानि कृत्यानि कुर्वन्ति अमर्यादया व्यवहरन्ते, मत्स्यापणं निर्मीयते संसत्सदनम्। सांसदा हिंसका जाताः लोकतंत्रमन्दिरं सदनं युद्धाजिरं जातम्। विधायकाः एव पण्याश्वीभवन्ति। प्रजाः सन्त्रस्ताः सन्ति। डॉ. परमानन्दशास्त्रिमहोदयः सांसदान् असभ्यान् मनुते।[२७६] दलपरिवर्तनं स्वार्थसिद्धये नित्यं भवति अधुना–

क्वचिच्चास्त्रीभवति सदने ध्वनेर्विस्तारकं यन्त्रम्
सदस्या कान्दिशीका हन्त! दृष्टा लोकतंत्रेऽस्मिन्॥
अहो युद्धाजिरं जातं सभाभवनं तु नेतृणाम्।
विधायक एव पण्याश्वीभवति हा लोकतंत्रेऽस्मिन्॥
कदाचिद्धावनं दलतः कदाचिन्नूत्नदलघटनम्।
कदाप्यपवञ्चनाकाण्डं विलोकय लोकतंत्रेऽस्मिन्॥[२७७]

निर्वाचनसमये स नेतात्मानं प्रजासेवकम् उद्घोषयति। आत्मानं दीन-दीनं मन्वानः भिक्षुक इवाचरति। कवितायां नेतारः वृकाणां प्रतीकत्वेन वर्णिताः कविना। तद्यथा–

करौ बद्ध्वा मुखे दत्त्वा तृणं नत्वा शिरः स्वीयम्।
वृकाः काङ्क्षन्ति मेषाणां मतं बत लोकतंत्रेऽस्मिन्॥[२७८]

जनेभ्यो मतदानं प्राप्य तानेवापवञ्चते नेता, प्रजापालितः विडालः (नेता) सर्वत्र म्याऊँ-म्याऊँ करोति। बिहारप्रान्तस्य नत्रा सम्पादितायाः चाराघोटालायाः चर्चाऽपि सम्पाद्यते कविना।

कलासाहित्यसङ्गीतप्रहीणो ना तृणं खादति।
पशूनां भागधेयं यद् हरे! शृणु लोकतंत्रेऽस्मिन्॥[२७९]

विकासस्य-विनाशपरम्परायां नैकानि अपवञ्चनानि (घोटाले) जातानि यथा कफन-यूरिया-चारा-खाद्यान्न-बोफोर्स-२जी-कोयला-सदृशाणि अपवञ्चनानि प्रमुखाणि सन्ति।[२८०] अधुना अयोग्या एव उन्नतिं प्राप्नुवन्ति सुयोग्याश्चावनतिं प्राप्नुवन्ति। राष्ट्रं पित्र्यं रिक्थं मन्वानां कृते कविः प्रश्नं पृच्छति–

कथं भो मन्यसे देशं धनं पित्र्यं विभज्याद्यम्।
त्वया नेतः! कृता का वास्य सेवा लोकतंत्रेऽस्मिन्॥[२८१]

इत्थं राजनेतृभिः भारतीयसंस्कृतेः देशस्य च चिन्तनं न क्रियते स्वसमृद्धिरेव तेषां सर्वोपरि वर्तते। तेषां मनःकर्मवचनानि भिन्नानि भवन्ति।

मनस्यन्यत् वचस्यन्यद् तथान्यत् कर्मणि स्वीये।
कुतो निजसंस्कृतेश्चिन्ता कुतो देशस्य वा चिन्ता[२८२]

क्वचित् दस्यवो मतदानकेन्द्रं लुण्ठन्ति क्वचिच्च हिंसारताः भवन्ति। कवेः कटाक्षदृष्टिः सावधानां करोति छन्ददात्रीं प्रजाम्।

कथं बन्धो मतं दास्यसि भयं त्यक्त्वा स्वके क्षेत्रे।
वृतः पाटच्चरैर्मतदानकेन्द्रे लोकतंत्रेऽस्मिन्॥[२८३]

बलात्कार-हत्या-अग्निकाण्ड-बाम्बविस्फोटाद्यानि दुष्कृत्यानि लोकतंत्रेऽस्मिन् चरमोत्कर्षे विद्यन्ते। राजनीतिः 'चातुरीदेवी' नाम्ना व्यवहृता कविना–

इयं देवी प्रतारणचातुरी भ्रष्टावने दक्षा।
मता नृपनीतिसंज्ञा वन्दनीया लोकतंत्रेऽस्मिन्॥[२८४]

लोकतंत्रे वञ्चिता जनता किंकर्त्तव्यविमूढा जाता यत्तेषां (राजनेतृणाम्) प्रियाप्रियं कथं कर्तुं शक्येत? यतो हि ते पुनः मतं प्राप्तुं समागताः।

पुनस्ते मे मतं काङ्क्षन्ति यैरेवास्मि परिमुषितः।
अहो निर्लज्जतेयं कीदृशी ननु लोकतन्त्रेऽस्मिन्॥
मतं मे काङ्क्षमाणा ये पुनर्मे द्वारि सम्प्राप्ताः।
कथं तेषां प्रियं कुर्याम् न जाने लोकतंत्रेऽस्मिन्॥[२८५]

कविः व्यङ्ग्योक्त्या वदति यत् लोकतंत्रस्यास्य यशोगानाय नैकानि महाकाव्यानि अपेक्षितानि। मदीयैः सीमितवाक्यैः सिद्धिः न भविष्यति।

नायकाः खलनायकाः जाताः, लोकतंत्रस्य विकृतयः पुस्तकाकारं नीताः कविना। कटुवाक्यैरपि एतेषु (नेतृषु) प्रभावो न जायते। कविः शासकान् सावधानान् करोति यत् मदान्धैर्न भवद्भिः भाव्यम्। नोचेत् विनाशः विनिपातो वा भविष्यति।

इदं दाहात्मकं तेजः सुगूढं यन्नृणामन्तः।
मदान्धाः किं न पश्यत रे? वदत भो लोकतंत्रेऽस्मिन्॥[२८६]

एवमस्यां कवितायां भारतीयलोकतंत्रे जायमानानां दुष्कृत्याना मुल्लेखः

क्रियते कविना। राजनीतिः भारतीयलोकतंत्रे विकासमवरुणद्धि, कवेः संवेदना भारतीयसामान्यजनानां दुःखेन साकं वर्तते। तेषां वञ्चनमेव कवेः वर्ण्यविषयः। कवेः रचनाशैली अत्यन्तं मधुराऽस्ति, कवेः भावान् असंस्कृतज्ञोऽपि सहजतया ज्ञातुं शक्नोति। उर्दूच्छन्दसि रचितायां कवितायां पञ्चचत्वारिंशत् पद्यानि सन्ति।

योऽयं कृतः शपथस्त्वया

अस्मिन् प्रजातांत्रिके राष्ट्रे आग्रामपंचायतात् राष्ट्रपतिपदं यावत् नियुक्तेः पूर्वं जनैः शपथग्रहणं क्रियते। सर्वे पदाधिकारिणः पूर्णनिष्ठायाः, सत्यवादितायाः विधेश्च शपथं गृह्णन्ति। प्रतिज्ञां स्वीकृत्य धैर्यशालिनः अनूकूलमाचरन्ति, प्रतिज्ञापूर्त्तये ते आपदं व्यथाञ्च नाऽनुभवन्ति। एकाग्रमनसा, तपस्यया च ध्येयपालनं तेषां लक्ष्यम्। आत्मनः पवित्रतायां सत्यां शक्तिरर्ज्यते, आगतशक्त्या कार्यावरोधः भवत्येव नहि। समेषामपि दृढव्रतिनां मूले सङ्कल्पविशेषो जायते। परञ्च इयं विडम्बना यत् संविधानेन निर्धारितप्रतिज्ञापालने सत्यनिष्ठायाः अभावो दृश्यते। यदि प्रभावो भवति चेत् अस्माकं भारतं पुनःभारतं स्यादिति मन्ये। अधुना तु प्रतिज्ञाया अंशतोऽपि पालनं न भवति। सर्वेऽपि चौराः मातृश्वसेया भ्रातरः एव। प्रायशः लुण्ठनकर्मणि रताः भवन्ति। कविः तान् जनप्रतिनिधीन् शिक्षक इव पृच्छति। कविः स्वीयरचनायां प्रश्नात्मकशैल्या अनुसरणं करोति–

योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?
यदिदं प्रतिज्ञातं त्वया तस्याशयं जानासि किम्?[२८७]

कविः प्रतिज्ञां मनसः कर्गले स्वात्माङ्कनं मनुते। शपथः कर्गले लिखिताः शब्दाः केवला पङ्क्तिः नास्ति। शपथस्तु–

व्यालीवदनचुम्बनमिदं करवालधारालेहनम्
क्षुरधारया पदमित्रता मधुराशया गरलाशनम्
त्यक्त्वा सुखदतल्पं सखे! भूमौ स्वपिषि, जानासि किम्?[२८८]

कविः शपथग्रहीतॄन् सम्बोधयन् वदति यत्– वाण्याः मूल्यं नाऽस्ति इयं तु अमूल्या वर्तते, यदा मानवः मनसा कर्मणा वचसा चाऽनुकूलमाचरति तदा सत्पुरुष इव पूज्यते, यस्य वाङ्मनःकर्माणि भिन्नानि सः दुर्जनपङ्क्तौ गच्छति, उक्तिरपि प्रसिद्धास्ति तदर्थम्।[२८९]

कविः कथयति–

मनसाथ वचसा कर्मणा भिन्ना भवन्ति न ये जनाः
सम्मानभाजनतां जगति ते यान्ति सर्वेषां जनाः।
क्षतवाग्जनो निन्द्यो भवति लोके सखे! जानासि किम्
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्।।[२९०]

विष्णुपुराणे परशुरामस्य प्रतिज्ञा, बलिमहोदयस्य प्रतिज्ञा, आदिकाव्ये दशरथस्य प्रतिज्ञा, रामस्य प्रतिज्ञा, महाभारते भीष्मादीनां प्रतिज्ञा, संस्कृतकाव्येषु चाणक्यस्य प्रतिज्ञा, शिवराजविजये शिववीरप्रतिज्ञा, वेणीसंहारे भीमसेनस्य प्रतिज्ञा, मेवाड़प्रतापकाव्ये राणाप्रतापस्य प्रतिज्ञा प्रसिद्धिं गताः। इमाः सर्वाः लोकवन्द्याः प्रसिद्धाश्च जाताः। शपथपूरकाः लोकवन्द्याः भवन्ति, शपथस्य भेत्ता जीवन्मृतः कथ्यते।

यैः पूरितः शपथो निजस्ते लोकवन्द्याः सम्मताः
यैः पूरितः शपथो नरा इतिहास पुरुषास्ते मताः।
शपथस्य भेत्ता कथ्यते जीवन्मृतो, जानासि किम्?....[२९१]

शपथस्तु हस्तबन्धनमिव (हथकड़ी) वर्तते। शपथकर्त्ता पाशेन आबद्धो जायते। सः चिन्तातुरो जायते। शपथस्य रक्षा प्राणार्पणेन कर्त्तव्या।

शपथो न केवलमस्ति वाण्या वर्णमात्रोच्चारणम्
शपथस्तु बन्धो! कथ्यते पञ्चाग्नितपसो धारणम्।[२९२]

लोभेन, कामतो भयतो वा प्रतिज्ञा नैव त्रोटनीया, आत्मजयेन प्रतिज्ञा रक्षणीया–

लोभेन भयतः कामतो वा यो निजं शपथं त्यजेत्
शपथेन साकं स हि पुमान् निजजीवनं न हि किं त्यजेत्।
शपथस्य रक्षा ह्यात्मजयतो, जायते जानासि किम्
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्।।[२९३]

मानवस्य जीवनमूल्यानि, दया- सौख्यादयोऽपि शपथापेक्षया नगण्यभूता सन्ति। शपथं त्यक्त्वा धनार्जनं तु भवितुं शक्यते यशोऽर्जनं नहि। मिथ्याव्रतानां तेजो मुखात् लुप्यते।

ये वञ्चयन्त्यनिशं जनान् शपथं गृहीत्वा मानवाः
आत्मानमथ सर्वेश्वरं जानन्ति नो ते मानवाः।
मिथ्याव्रतानां लुप्यते तेजो मुखाज्जानासि किम्?[२९४]

प्रतिज्ञापालनस्य विषये पद्मपुराणेऽपि वर्णितमस्ति।[२९५]

कविः प्रतिज्ञापालकं शपथग्रहीतारं श्लाघ्यं मनुते।

कवितायामस्यां कवेः लेखनी सत्यव्रतानां वन्दनां करोति यतो हि सत्यव्रताः शपथान्मनागपि न विचलन्ति–

"**शपथान्मनाक् प्रचलन्ति नो सत्यव्रताः**"[२९६] सत्यव्रताः स्वकर्मनिष्ठया सर्वेषां आदरभाजः भवन्ति। कविना व्यङ्ग्येन कटाक्षेन च ये शपथं स्वीकृत्य प्रतिकूलमाचरन्ति तेषामुपरि निन्दावचनानि क्षिप्तानि। कविः क्वचित्तान् प्रबोधयति, क्वचित्प्रश्नान् पृच्छति क्वचिच्च सत्यव्रतानां वन्दनं करोति। भारतदुर्दशा वर्णिताऽस्ति कविना कवितायाम्। इयं कविता हरिगीतिकाच्छन्दसि रचिताऽस्ति अस्याः रचनातिथिः १३.१०.१९९९ तमे खैष्टाब्दे (दिल्ली-शिमलामार्गे निशीथे) रचिता वर्तते।

किं कुर्यात्-१, किं कुर्यात्-२

सर्वशुक्लोत्तरायां सङ्गृहीतेऽस्मिन् काव्ये-किं कुर्यात् शीर्षकान्वितं रचनाद्वयम् वर्तते, प्रथमरचनायां २० श्लोकाः, द्वितीयास्याञ्च-१० श्लोकाः सन्ति। सर्वप्रकारेण एतेषु मनुष्यस्य विवशता वर्णिताऽस्ति, मानवजीवनस्य तासां घटनानामुल्लेखोऽस्ति याश्च यथार्थपूरिताः भवन्ति। कविशुक्लेन स्वीयाननुभवान् अत्र सङ्ग्रहीतुं साभिप्रायो यत्नः कृतः। साम्प्रतिके काले देशेऽस्मिन् याः घटनाः कविना दृष्टाः तासामुत्तरं तु कविनाऽपि न प्राप्तम्, अर्थात् एतादृशानां प्रश्नानामुत्तरप्राप्तिः असम्भवा एव प्रतीयते। कविव्यथां व्यञ्जयन्त्यः इमाः कविताः अस्माभिरवलोकनीयाः। आधुनिकी जीवनशैली व्यस्ततमा वर्तते, भोजनमपि जनाः सम्यक्तया कर्तुं न प्रभवन्ति अधुना। कवेः काव्यसमवाये श्रोतृणामल्पता अनेन पद्येन अनुभूयते।

कवी रात्रौ लिखति कवितामभरकोशं मुहुः पश्यन्।
न च श्रोताऽस्य शृणुते पद्यबन्धं सोऽत्र किं कुर्यात्।।[२९७]

कवेः शुक्लस्य जीवनम् अध्यापने एव व्यतीतं, तस्य व्याख्यानेषु

छात्राणां सम्मर्दः रुचिश्च तन्मुखादेव ज्ञायते। परं यदि विलिण्टाइन-दिवसे (१४ फरवरी) छात्राणाम् अभावश्चेत् किं कुर्यात्? शिक्षकसमुदायस्य विवशतां वर्णयति कविः।

विलिण्टाइन- दिने छात्राः कुसुमहस्ता गताः पार्के।
वराकोऽध्यापको गत्वाऽपि कक्षे ब्रूहि किं कुर्यात्॥[२९८]

विलिण्टाइनसन्तस्य जन्मोपलक्ष्ये पर्वणः आयोजनं भवति पाश्चात्त्यसभ्यतामूलकं पर्वैतत्, परं भारतेऽपि अस्य प्रभावः विस्तारश्च द्रष्टुं शक्यते।

प्रयत्न-कर्म-दैवविषयकीं विवशतां प्रकटयन् कविः वर्णयति-

कृते यत्नेऽपि नो सिद्धिर्भवति चेत्कोऽत्र किं कुर्यात्।
विरुद्धे भागधेये कर्म कुर्वाणोऽपि किं कुर्यात्॥[२९९]

नगरेषु मार्गावरोधसमस्या अधुना सर्वाधिकं विवशयति। कवेः लेखनी इमां विवशतां वर्णयति-

गृहादचलं भवन्तं द्रष्टुकामोऽहं यथाकालम्।
परं मार्गेऽमिलज्जामो विलम्बे कोऽत्र किं कुर्यात्॥
गृहाच्चलितः समयतोऽहं परं मध्येपथं रुद्धः।
बिलम्बादागतोऽस्मीति क्षमायाच्ञाऽपि किं कुर्यात्॥[३००]

कवेः शुक्लस्य यातायातमार्गावरोधसमस्यां वर्णयन्ती अपराऽपि कविता अस्मिन् सङ्ग्रहे सङ्गृहीताऽस्ति। यत्र देहलीनगरस्य मार्गावरोधः कविना दर्शितः।

अधुना योग-जुगाड़व्यवस्था (उत्कोचव्यापारः) फलीभूताऽस्ति। दक्षिणां विना तु सर्वकारीयोद्योगेषु सेवावृत्तिर्वा न प्राप्तुं शक्यते, तत्र चयनार्थं धनमावश्यकं भवति। अत्र साक्षात्कारात्पूर्वं विशेषज्ञैस्सह सम्पर्केणैव किमपि सम्भवं नो चेत् न किमपि प्राप्यते। उत्तमश्रेण्याः आवेदकस्य विवशतां वर्णयति कविः व्यङ्ग्यात्मके उपदेशे। तद्यथा-

भवति साक्षात्कृतिर्विद्यागृहे त्वं चोत्तमश्रेणिः।
न पूर्वेद्युस्त्वया दृष्टो विशेषज्ञोऽपि किं कुर्यात्॥[३०१]

पत्युः विवशतायाश्चित्रणम्, यथा-

प्रिया भार्या त्वमसि, वदसि प्रियं, प्रियमण्डने, पत्यै।
न चेत्समयेऽशनं दत्से पतिस्ते ब्रूहि किं कुर्यात्।।[३०२]

अस्माभिः चितो नेता (संसत्सदस्यः) एव अस्मत् उत्कोचं गृह्णाति। दीयते चेत् कार्यसिद्धिः नो चेत् कार्यसिद्धिरसम्भवा–

मतं दत्तं त्वया किल यत्तु तद्युक्तं परं भ्रातः।
ददासि न चेत्त्वमुत्कोचं तदा नेताऽपि किं कुर्यात्।।[३०३]

प्रियायाः वध्वाश्च विषये कविशुक्लस्य मुक्तकचातुरीं पश्यन्तु–

त्वया विषभक्षणं कृत्वा कृतायामात्महत्यायाम्।
प्रियस्त्वां नैति चेद् द्रष्टुं तवेदं कर्म किं कुर्यात्।।
वधूः श्वसुरालयादपमानिता गच्छति पितुर्गेहे।
पितुर्गेहेऽपि नो सौख्यं भजति चेत्सात्र किं कुर्यात्।।[३०४]

दलाध्यक्षः शासनसत्तां प्राप्तुं नैकान् यत्नान् करोति अनेकैः सह ग्रन्थिबन्धनं स्थापयति, द्वित्रान् प्रतिनिधीन् स्वीकृत्य दलनिर्माणं क्रियते, सहैव (बहुमतस्य) जनादेशस्य परिभाषा अपि परिवर्त्यते एतैः। न केवलम् एतावदेव, प्रतिनिधीनां क्रय-विक्रयोऽपि भवति। तथापि कदाचित् दलाध्यक्षः असफलतामेव प्राप्नोति। बहुमतप्राप्तये स किं कुर्यात्?

कृते विविधे प्रपञ्चेऽपि प्रकामं बहुमतं नाप्तम्।
इदानीं वञ्चनाचुञ्चुर्दलाध्यक्षोऽपि किं कुर्यात्।।[३०५]

भारते अटलबिहारीमहोदयस्य प्रधानमंत्रित्वे त्रिशंकुशासनमासीत् त्रयोदशदलैः सह तेन शासनं चालितम्। एतत्कार्यं बहुकठिनमासीत् अनेकासु पत्र-पत्रिकासु व्यङ्ग्यपरकाणि चित्राणि प्रकाशितानि, यत्र वाजपेयीमहोदयस्य रथं विविधैः दलैः विविधासु दिक्षु कर्षणस्य चित्रं भवति स्म। वाजपेयिमहोदयस्य विवशतां कविः लक्षयति।

इमे बहुनायका रथिनो रथं विमता यदारूढाः।
निनीषुस्तं प्रमुखसारथिरयं विवशो नु किं कुर्यात्।।[३०६]

आगराशिखरवार्तायाः विफलतामधिलक्ष्य कवेः विवशता वेदनारूपेण सम्मुखमायाति–

महामात्योऽटलोऽध्यक्षो मुशर्रफ् चागरानगरे।
शिखरवार्ताऽवसाने निष्फलौ! कः कोऽत्र किं कुर्यात्।।[३०७]

अद्य अस्माकं देशे धनस्य बहु उपयोगिताऽस्ति, धनाद् धर्म इति सिद्धान्तः परिवर्तितः। येषां अभ्यर्थिनां पार्श्वे धनं भवति तेभ्य एव टिकटं दीयते राजनीतिकदलैः, विजयं प्राप्नोति चेत् कामधेनुरूपिणीं सत्तां भुङ्क्ते तस्योपभोगं करोति–

धनाद्धर्म ततः सुखमित्ययं सिद्धान्त उच्छिन्नः।
धनाट्टिकटं ततः सत्ताधुना मे कोऽपि किं कुर्यात्।।[३०८]

सद्दामहुसैनस्य-(पूर्वराष्ट्रपति ईराक) सुदिनानि दुर्दिनानि च सर्वैः दृष्टान्येव। कवेः रचना तादृशस्य सिहंस्य विवशतां प्रकटयति–

अयं सद्दाम आस्ते पञ्जरे बद्धो यथा सिंहः।
प्रवर्धन्तेऽस्य रिपवो तांश्च पश्यन्नेष किं कुर्यात्।।[३०९]

मानवीयमूल्यरहितानां नेतृणां संसर्गेण हानिरेव जायते। तद्यथा–

त्वया नेतृब्रुवाः संसेविताः स्वीयाध्ययनकाले।
तृतीयश्रेणिमापन्नस्य ते वद कोऽत्र किं कुर्यात्।।
न शौचं नाऽपि चाचारो न सत्यं येषु विद्येत।
सखे तेषां सपर्या मे व्रतं मे कोऽपि किं कुर्यात्।।[३१०]

भारत-पाकदेशयोः अद्भुतां स्थिमिवलोक्य कवेः संवेदना प्रकटिता जायते–

न युद्धं नाऽपि शान्तिर्नैव मैत्री नाऽपि शत्रुत्वम्।
न संवादो न मौनं चावयोः कः कोऽत्र किं कुर्यात्।।[३११]

कवेः रचना विविधान् समस्यासंवलितान् विषयान् प्रकटीकरोति। कवेः दृष्टिस्तु चतुर्दिक्षु जायते। विद्यालयो भवतु, स्वराष्ट्रचिन्ता भवतु, धर्मः भवतु धनं वा भवतु सर्वत्र कवेः लेखनी सव्यङ्ग्यया वाण्या अस्मान् उपदिशति। कविः राजनीतिं तुच्छतरां मनुते, राजनेतृणां सपर्याऽपि हानिमुत्पादयति। युवकानां हृदयानि अपि कविना जितान्येव स युवमित्राणि सदैव प्रसादयति। तेन प्रदत्तः सन्देशः सर्वैरपि उद्घाटितनेत्राभ्यां स्वीक्रियते। बहुत्र सः सावधानतया प्रबोधनमपि करोति। कवेः भाषा सरला बोधयुक्ता च विद्यते अनेकत्र नूतनशब्दानां प्रयोगेऽपि सः चमत्कृतिमुत्पादयति।

निर्वाचने प्राप्ते

भारते बहूनि निर्वाचनानि समये-समये भवन्ति। नेतारः तस्मिन् लोकतंत्रे नाटककारमिव मतं प्राप्तुमुद्यताः भवन्ति। निर्वाचने समीकरणानि विचित्राणि भवन्ति। प्राकृतिको वैरभावोऽपि मित्रतायाम् अवसीयते। नानाप्रकारकछलछद्मापवञ्चना पदे-पदे दृश्यते। कविना अस्यां कवितायां नेतृणां दुश्चरित्र-प्रवञ्चना-लोलुपता वर्णिताः।

इयं कविता प्रप्रथमं २००४ तमे खैष्टाब्दे उज्जैनस्थमाधवीकाव्यचर्यायां पठिता, सरला जनता कथं पारङ्गतनेतृभिः मिथ्याचारेण लुण्ठ्यते- तद्दिङ्मात्रमुदाह्रियते-

इमे दर्शकसमूहाः लोभनीया नूनमस्माभिः।
वयं पारङ्गता नाट्ये सखे! निर्वाचने प्राप्ते॥
पशुभ्यो दीयतां किञ्चित्तृणं पूर्वं विना शङ्काम्।
इमे बलिकर्मयोग्या वै मखे निर्वाचने प्राप्ते॥[३१२]

जनताया ऋजुव्यवहारः, नेतृणां छलछद्मपरिपूर्ण चरित्रं च कविना वर्णितम्। नेतारः वाक्शक्तियुताः भवन्ति, भाषणे तेषां सिद्धिः भवति। तेषां मधुरा वार्ता जनतायाः मनांसि हरति। ते मानवानां मतं लुण्ठन्ति अनन्तरं च पूर्वोक्तवचनान्यपि न पूरयन्ति। नेतारः दुःशासनसदृशाः जनता च पाञ्चालीरूपेण वर्णिता कविना, कविः निर्वाचनस्य यथार्थ स्वरूपं चित्रयति। छलछद्मपरिपूरितैः नेतृभिः द्रौपद्याः (जनतायाः) चीरहरणं क्रियते।

इयं जनताऽस्ति पाञ्चाली विवस्त्रैषा भवेन्नूनम्।
अतो दुःशासना ऐक्यं गता निर्वाचने प्राप्ते॥[३१३]

यदि द्रौपद्याः एकस्याः चीरहरणेन शतसंख्यानां कौरवाणां समूलं नाशोऽभूत् तदा कोटिसंख्याकानां जनतानां चीरहरणेन असंख्यानां नेतृणां समूलं नाशोऽवश्यम्भावी अतः नेतृभिरवधातव्यम्।

अहं गोमायुरस्मि त्वं च गृध्रो दूरदृष्टिरसि।
अयं भक्ष्योऽस्ति बालो नः सखे निर्वाचने प्राप्ते॥[३१४]

कविना अन्योक्त्या प्राकृतिकवैरभावस्य मित्रतायां परिवर्तनस्य वर्णनं सम्पादितम्

मयूरव्यालशालूरा गले लग्ना प्रसीदन्ति
समेषां लाभ आयत्यां ध्रुवो निर्वाचने प्राप्ते।।
नमुचिशक्रौ तथा सुन्दोपसुन्दौ वज्रभूमिधरौ
अजाकण्ठीरवौ सुहृदौ सखे! निर्वाचने प्राप्ते।।[३१५]

निर्वाचनसम्बद्धम् अपूर्वं मित्रताचिन्तनं सम्पादितमत्र कविना। राजनीतिः तादृशं पङ्कमस्ति यत्र कमलानामपि विकासो न भवति। राजनीतिसदृशी कटुता, मित्रता नाऽन्यत्र द्रष्टुं शक्यते। राजनीतिः नूतनानि बन्धनानि बन्धयति। मायावती-ममताबनर्जी-जयललिता सदृश्यः राजनेत्र्यः कदाचित् कांग्रेसदलेन सह भवन्ति कदाचिच्च भाजपादलेन सह। एतेषां राजनेतॄणां बन्धनं सहसैव खण्डतामपि गच्छति यतो हि स्वार्थान्धाः इमे सर्वेऽपि। राजनीतौ प्रकृतविरोधिनां कथं सुमैत्री जायते कथञ्च तेषु सात्त्विकविचाराः आयान्ति तद्वर्णयति कविः। तद्यथा -

विरुद्धानां सुमैत्री जायते निर्वाचने प्राप्ते।
समीकरणं नवं नूत्नं भवति निर्वाचने प्राप्ते।
न वैरं शाम्यते वैरेण मैत्री सन्नृणां पुण्या
भवति सत्त्वावतरणं मानसे निर्वाचने प्राप्ते।।[३१६]

कविवरः अत्र उपदेशकरूपेण कुनेतॄणां चरित्रं प्रकटयति, वैरभावेन वैरस्य शमनं न कदापि जायते। सज्जनानां कृते मैत्री पुण्यदा भवति। नेतार एतादृशाणि सुभाषितानि कथं गृह्णन्ति? विचारणीयोऽयं विषयः।

नेतारः निर्वाचनात्प्राक् वातानुकूलितवातावरणे निवसन्ति प्राप्ते निर्वाचने ते पदयात्रां कुर्वन्ति। निर्वाचनयुद्धे मतप्राप्त्यर्थं भ्रमणरतानां चित्रणम्। यथा-

सदा वातानुकूलितसौधभवनैः परिचिताः सर्वे।
वयं मार्गे भ्रमामो हे प्रभो! निर्वाचने प्राप्ते।।[३१७]

निर्वाचनकाले पदयात्राः रथयात्राः, न्याययात्राश्च भवन्ति। मतप्राप्तिसमये एव यात्राणां स्मरणम् आयाति। एतेषां वाणी न्यक्कृतभाषया विरोधिनां महिम्नः खण्डनं कुर्वती आत्मानं सेविकां मनुते। लोकसभानिर्वाचनसमये सोनिया-महोदयायाः पदयात्रा आडवाणीमहोदयस्य दिग्विजयिनी रथयात्रा स्वार्थं व्यनक्ति। राष्ट्रकवेः शुक्लस्य इयं कविता एतादृशमेव भावपूरितं वर्णनं सम्पादयति-

कदाचित् ये सहजरिपवो ह्यभूवन् तेऽद्य सानन्दं
गले लग्नाः सहजमित्रत्वमाप्ता गद्गदायन्ते
कथंकारं भवेदस्मज्जयो ध्रुवमित्यमुं स्वार्थं
प्रपूरयितुं भवति यत्नः परो निर्वाचने प्राप्ते।।[३१८]

शासनसत्तां हस्तयितुं बहुमतमावश्यकं भवति। दलानि भीष्मसदृशान् नेतॄन् जेतुं शिखण्डिनमपि अन्वेषयन्ति। किन्नराः अपि निर्वाचने आयान्ति।

चलच्चित्राभिनेतारोऽभिनेत्र्यो बहुमतं लब्धुं
दलाध्यक्षैः सबहुमानं सदस्यत्वेन गृह्यन्ते।
शिखण्डी भीष्मजयहेतोर्दलैरन्विष्यते यत्नात्
अघट्यं घटयितुं शक्यं सखे निर्वाचने प्राप्ते।।[३१९]

विविधदलेषु सम्बन्धिनः एव निर्वाचनयुद्धं कुर्वन्ति। एकस्यैव परिवारस्य जनाः विविधदलं स्वीकृत्य निर्वाचने स्वीयं भाग्यं पश्यन्ति। अस्याः कवितायाः अन्ते नेतुः आध्यात्मिकी चेतना जागर्ति, स गीतानुसारिणीं कर्मशिक्षां स्वसहयोगिभ्यः प्रददाति। तद्यथा–

न जाने को जितः स्यात्कोऽथवा विजितो भवेन्नेता
न जाने कः स्थितः स्याच्छासनासन्द्यां सुपुण्यात्मा
इयं चिन्ता विधेया नैव सम्प्रति हे सखे त्वयका
तवाधिकृतिस्तु कर्मणि नो फले निर्वाचने प्राप्ते।।[३२०]

अस्यां कवितायां यः सन्देशः कविना प्रदत्तः तत्तु सर्वजनहिताय सर्वजनसुखाय चाऽस्ति, कवे सन्देशः वर्तते- **'न वैरं शाम्यते वैरेण'** महात्मगान्धिना अहिंसाबलेनैव भारतं स्वातन्त्र्यं लम्भितम् तस्य सद्भावना एव शत्रून् भारतात् बहिष्करणे तस्य परमायुधत्वेन आसीत्। कवेरयं सन्देशः विश्वम् एकसूत्रे बध्नाति। कवितायाम् अपराऽपि सूक्तिः, अपरोऽपि सन्देशः **सज्जनानां कृते मैत्री पुण्यदा भवति** सज्जनाः मैत्रीम् आन्तं यावत् निर्वहन्ति, अतः मैत्री अपि सज्जनैः साकं करणीया, मैत्री सन्नृणां पुण्याः इयं व्यङ्ग्यकविता नूनमेव राजनेतॄन् सत्पथि अवतारयतीत्यहं मन्ये। कवेः व्यङ्ग्यरूपात्मिका संवेदना स्वच्छराजनीत्यर्थं प्रेरयति। राष्ट्रभक्तः कविः राष्ट्रस्योन्नतये स्वीयाम् आहुतिं प्रयच्छति काव्यमाध्यमेन। अस्मिन् काव्यसङ्ग्रहे बहुशः तेन निर्वाचनं वर्णितम्। अनेन ज्ञायते यत् निर्वाचने कियन्तो दोषाः

सन्तीति। कवेरियं व्यङ्ग्यात्मिका शैली पाठकसहृदयान् आनन्दयति।

अभिनवहितोपदेशः

'अभिनवहितोपदेशः' व्यङ्ग्यात्मिका रचना विद्यते, अत्र कविना पुत्र-जनकयोः संवादः प्रस्तुतः, सः संवादः अभिनवहितोपदेशनाम्ना कवेः कथनशैलीं पुष्णाति, जनकस्याभिनवं प्रबोधनम् अद्यतनसमाजस्य स्पष्टं चित्रं कर्षयति। कीदृशाः जनाः अद्य संचारमाध्यमेषु उपस्थिताः भवन्ति इत्यत्र कवेः प्रस्तुतिः एव प्रमाणम्। विद्याविनयसम्पन्नः पुत्रः, सञ्चारमाध्यमेषु तस्य चर्चा न भवतीति कृत्वा दुःखितो जायते, विविधानि सुकृत्यानि संपाद्याऽपि मम चर्चा दूरदर्शने, वृत्तपत्रादिषु न भवति। हे पितः! कथं मम यशः दिग्-दिगन्तरेषु भविष्यति यतो हि यशसि अखण्डाभिरुचिस्तु महतां स्वभावसिद्धं लक्षणं वर्तते।

अवाप्नुवन् वै विविधाः प्रतिष्ठिता
पुरस्कृतीश्छात्रसभासु नैकदा।
अजोहवं यज्ञमहं यथाविधि
यशस्यमास्ते न तथापि मे कृतम्॥
तथापि मे नाम विलोक्यते क्वचित्
न वृत्तपत्रे न च दूरदर्शने॥
कमप्युपायं दिश तात येन मे
यशो दिगन्तावधिगामि जायताम्।
वदन्त्यखण्डाभिरुचिं यशस्यथो
स्वभावसिद्धं महतां सुलक्षणम्॥[३२१]

आधुनिके चाकचिक्ये समाजे महान्तः प्रसिद्धाः ये सन्तिः व्यवसायिकाः, लेखकाः, समाजसेविनः, पत्रकाराः, पण्डिताः, वैद्याः तेषामुपरि कवेः कटाक्षपातः वर्तते। अधिकाः प्रसिद्धा मानवाः प्रायशः कुकृत्यपारङ्गता एव भवन्ति। न केवलमुपर्युक्ताः जनाः अपितु धर्माधिकारिणोऽपि अधुना कुकृत्येषु रताः विद्यन्ते समये-समये तेषां कुकृत्यानि समाजे दृष्टिपथमायान्त्येव। कविलेखनी सशक्तरीत्या स्वीयकाव्यमाध्यमेन तेषां महिमखण्डनं सरलया बोधगम्यया च भाषया करोति। कवेः दृष्टिः सर्वत्र प्रसरति समाचारपत्रादिष्वपि

दिगम्बरप्रायविलासिनीनां चित्रं दृष्ट्वा सरस्वत्युपासकानां संतापवृद्धिरेव भवति। तद्यथा–

दिगम्बरप्रायविलासिनीनां चित्राणि नित्यं प्रविलोक्य पत्रे।
विद्यापराणां खलु मादृशानां सन्तापवृद्धिर्भवतीह नूनम्॥[322]

पत्रपत्रिकाणामपि प्रसिद्धिः विलासिनीचित्रमाध्यमेनैव भवति। अत्र संचारमाध्यममपि कवेरालोचनाविषयः। नग्नतासम्पन्ना अनेका पत्रपत्रिकाः समाजं दूषयन्ति, किशोराणां पथभ्रंशाय मार्गं प्रददति। कविना सर्वदैव स्वीयकवितासु असामाजिकानां तत्त्वानां निषेधः कृतः तेषामुपरि कटाक्षः, कुठाराघातश्च विहितः। समाजभञ्जकानि कार्याणि पत्र–पत्रिकासु प्रमुखत्वेन अधुना प्रकाश्यन्ते। कवितायामस्यां कविना यद् व्यङ्ग्यं सम्पादितं तत्तु चमत्कारपूर्णमेव।

वन्ध्यासुतोद्वाह–नभःप्रसून
ध्वाङ्क्षद्विजाली–शशशृङ्गरम्यैः।
वृत्तैः सुपूर्णं लिख पुस्तकं त्वम्
उदन्तपत्रेषु तव प्रकाशः॥[323]

असम्भवं कर्म यदि त्वया संपाद्यते तदा तव प्रकाशः नूनमेव वन्ध्या–पुत्रत्वमसम्भवं कर्म, आकाशकुसुमत्वमपि असम्भवम्, काकानां दन्तपङ्क्तिः न भवति, शशशृंगाण्यपि अदृश्याण्येव। अतः तादृशं कर्म न सम्पादयितुं शक्यते। यदि केनचित् संपाद्यते तादृशं वर्णनं तत्तु घटाटोपयुतमेव। अभिनवहितोपदेशमाध्यमेन कविना निहितकर्मणां व्यङ्ग्योपदेशः कृतः। तद्यथा

समस्तवंशस्य विनाशकारको, नृशंसजीवो भव वित्तलोलुपः।
वधूप्रदाही भव यौतुकेच्छया तदास्तु चर्चा तव पुत्र माध्यमे॥[324]

अस्माकं देशे अजमलकसाबसदृशाणामातङ्कवादिनां कारागारेऽपि सेवा, देशसमुपासकानां विदुषां चोपेक्षा भारतम् अभारतं कुरुते। अपवञ्चकाः, भ्रष्टाचारयुताः, तस्कराश्चाऽधुना पूजनीयाः सन्ति, तेषां भीतिस्तु तान् देवपदमलङ्कारयति। अशिष्टाः, मदिरापिपासुकाः वृत्तपत्रेषु सर्वदाऽपि उपस्थिताः जायन्ते। सुत! तादृशं नूतनं पुस्तकं लिख यत्र वर्णितं विषयवस्तु त्वयाऽपि न प्रमाणीक्रियेत तव मुखे अन्यत् लेखने च अन्यदेव आस्तां तदा तव चर्चा भविष्यति।[325] तिमिरार्थसञ्चयस्य वार्ता अधुना सर्वत्राऽपि भारते प्रमुखवार्तारूपेण

वर्तते, तस्य वर्णनं कविनाऽपि अस्यां कवितायां कृतम्। तद्यथा–

उत्कोच-लीला-तिमिरार्थसञ्चय-
स्वदेशसम्बन्धिरहस्यविक्रयैः।
तवास्तु कीर्तिश्च यशश्च सत्वरम्
उदन्तपत्रेऽथ च दूरदर्शने।।[३२६]

देशस्य रहस्यविक्रेतारः भारतं रिक्तं कर्तुं प्रयतन्ते तेऽपि कटाक्षशैल्या निन्दिताः। कृष्णार्थसञ्चयवर्णनेन कवे युगबोधः ज्ञायते। अधुना कृष्णार्थस्य महती (Black money) चर्चा भारते जायमानाऽस्ति। कविना स्वीयकाव्येषु युगस्य चर्चा, समाजस्य चिन्तनमेव वर्णितम्। मानवजन्म दुर्लभं स्वीकृतं विज्ञैः, ततश्च नरजनन्म पुस्त्वं वा तत्राऽपि विद्याविभूषितस्य पुरुषस्य महत्त्वं विदितमेव। परमधुना लौकिकप्रपञ्चस्य फलं द्विगुणितं भवति। लौकिकता एव, यशस्करी भवति अतः लौकिकतामेव भजस्व। सञ्चार-माध्यमेषु विदुषामपि चर्चा भवत्येव परं ते अङ्गुलिगणनीया एव।

यद्यप्यनेकविदुषामपि नामचर्चा,
सञ्चारमाध्यमगताक्षिपथं प्रयाति।
सा द्वित्रिपङ्क्तिभिरथो मरणे च तेषां
तस्मात्त्यज त्वमयि पुत्रक! वैदुषीं स्वाम्।।[३२७]

येषां पार्श्वे धनं भवति त एव वार्तादिपत्रेषु प्रकाशिताः भवन्ति प्रायशः। सरस्वत्युपासकानां पार्श्वे तावद्धनं न भवति अतः यदि समाचारपत्रेषु आगन्तुम् इच्छसि तर्हि पत्रकारमित्रमुपास्यताम् पुत्रक!

करोति कश्चिद्यदि पत्रकारितां
सखा त्वदीयस्तदुपास्यतामयम्।
क्षुतं गतं किञ्च विलोकितं हि ते
स वृत्तपत्रेषु प्रकाशयिष्यति।।[३२८]

कवेः लेखनी सामाजिकसमस्यानां जागरूकतया वर्णनं करोति। व्यङ्ग्यात्मकशैल्या रचिता इयं कविता कवेः युगबोधं प्रदर्शयति। अधुना ये समाजसेविनः ते अट्टालिकासु वातानुकूलितप्रकोष्ठेषु उपविश्य घटाटोपं प्रदर्शयन्ति किञ्च स्वार्थाय एव समाजं सेवन्ते। कविः दुष्कृत्यानि वर्णयित्वा तेषां सामाजिकनिषिध्यतां वर्णयति, कवेः मनीषा दुष्कृत्यजनितेन यशसा भारतस्य

विनाशः एव न तु विकासः भवतीत्येव। २००७ तमे खैष्टाब्दे रचितायामस्यां कवितायां बहूनि छन्दांसि प्रयुक्तानि कविना। षट्चत्वारिंशत् श्लोकेषु इयं कविता पूरिता।

परमाण्वनुबन्ध! १,२

परमाण्वनुबन्ध-कविता रमाकान्तशुक्लस्य युगबोधं प्रदर्शयति। २००८ तमे खैष्टाब्दे भारत-अमेरिकादेशयोः मध्ये परमाष्वनुबन्धः जातः, परमाण्वनुबन्धे विरोधिदलैः महान् असन्तोषः कृतः, तेषां विरोधेन वामदलेन स्वसमर्थनमपि कांग्रेसतः नीतम्। परमाण्वनुबन्धस्य केचन समर्थने आसन् केचन च विरोधे। परमाण्वनुबन्धेन मित्राणि शत्रुत्वं गतानि शत्रवश्च सुहृदः जाताः

रिपवो जाताः सुहृदः, सुहृदो जातास्तथा रिपवः।
परमाण्वनुबन्ध! कृतो भवता कोऽयं चमत्कारः॥[३२९]

परमाण्वनुबन्धस्य वामदलैः महान् विरोधः कृतः तैरुक्तं यत् अनेन भारतस्य परमाणुक्षमतायाः ह्रासो भविष्यति। कवेः लेखनी सर्वत्र विचरणं करोति, यः कोऽपि विषयः विनूतनः सन् प्रसिद्धिं प्राप्नोति चेत् कविः स्वलेखन्या तं विषयं काव्याकारं करोति। अयं परमाण्वनुबन्धः कवेः प्रयाससाफल्यं प्रदर्शयति। कविः कूटनीतिपरकान् विषयानपि स्वीयकाव्यविषयं करोति। सर्वशुक्लोत्तरायां तादृशाः नैके विषयाः तद्युगबोधं प्रदर्शयन्ति। अनेन परमाण्वनुबन्धनेन आरुषिहत्याकाण्डसदृशाः विषयाः लघुभूताः जाताः यतो हि समाचारपत्रे तस्यैव दर्शनानि जायन्ते। पत्रपत्रिकासु परमाण्वनुबन्ध एव तदानीं प्रमुखत्वेन वर्णितं प्रकाशितञ्च।

अपहृति-दुष्कृति-हत्योत्कोचक्रीडा-समाचाराः।
त्वयि तिष्ठति पठ्यन्ते परमाण्वनुबन्ध नो कैरपि॥[३३०]

परमाण्वनुबन्धे हस्ताक्षरानन्तरं तस्य यशः पताका द्विगुणिता जाता शासनस्य पटाक्षेपभयमपि कविं दुःखितं करोति–

मनमोहन-बुशयोस्त्वं यशःपताकास्वरूपोऽसि।
पश्यामस्त्वां रक्षति सदने कः को महावीरः॥[३३१]

कविना 'परमाण्वनुबन्ध!' शीर्षकान्विते द्वे कविते रचिते, प्रथमभागे-10 श्लोकास्सन्ति अपरे च भागे पञ्चदशलोकास्सन्ति। सदने परमाण्वनुबन्धस्य

समये वामदलेन अविश्वासप्रस्तावो पारितः यः च कांग्रेसदलेन २७५ मतैः जितः। तदानीं सदनस्य पवित्रता नष्टा जाता। कोटिमितानि रूप्यकाणि सदने प्रदर्शितानि, सांसदानां क्रयणं जातमिति अन्येन दलेन संभावना प्रकटिता। तस्मिन् सदने उपविश्य केचन सांसदा 'अहं मन्त्रिपदं प्राप्स्यामींति चिन्तयित्वा कालं नयन्ति। सर्वकारस्य पटाक्षेपो भविष्यति, 'अहं प्रधानमंत्रिपदे आरूढो भविष्यमीति कश्चिदन्यः चिन्तयति, आशा बलवती भवति। कविः परमाण्वनुबन्धस्य समर्थने सव्यङ्ग्यं कथयति–

प्रतीयते त्वन्मार्गो निष्कण्टक एव सञ्जातः।
अधुना त्वां को रोत्स्यति सदनेऽथ बहिश्च हे बन्धो।।[३३२]

परमाण्वनुबन्धेन भारते विद्युत्शक्तेः विकासः भविष्यति इति अस्माकं प्रधानमंत्रिणः आश्वासनमासीत्, सदने यूरेनियमसंवर्धनेन भारते तापसंयंत्राणां सञ्चालनं भविष्यति। कविः परमाण्वनुबन्धं विद्युत्शक्तिप्रदातृरूपेण वर्णयति। तद्यथा–

तमसो नो ज्योतिर्नय विद्युच्छक्तिं प्रयच्छ देशाय।
यथा प्रसिद्धिं नीतस्तथैव सिद्धो भवान् भवतात्।।[३३३]

परमाण्वनुबन्धस्य कविना मानवीकरणं कृतम्। कवेः मनीषा अस्ति यत् परमाण्वनुबन्धः दर्शितस्वप्नान् पूरयेत् भारतं आभायुतं कुर्यात् कुत्राऽपि अन्धकारः न स्यात्, सर्वत्र प्रकाशः स्यात्, भारतं विकसितं राष्ट्रं स्यात्। भारते थोरियमपदार्थस्य उपलब्धिः संभवाऽस्ति परं सर्वकारमतानुसारं तदाधारिततापगेहानां निर्माणे कश्चन दोषः विद्यते, अतः यूरेनियम-पदार्थस्यावश्यकता। कविः परमाण्वनुबन्धं तत्प्रशंसकानां सूर्यसोमसंज्ञया आकारयति।

अधुना त्वमेव सूर्यः सोमः पवनश्च तेषामसि।
बुश-मनमोहनकाले स्वीयां पुष्टिं भवान् कुरुतात्।।[३३४]

सूर्य-सोम-पवनसदृशस्तुत्यः परमाण्वनुबन्धः महान् वर्तते। सूर्यः-इत्यनेन प्रकाशः, चन्द्रः इत्यनेन शीतलता वर्तते सूर्यातपे प्रशीतलानि वातानुकूलितं कर्तुं तस्यावश्यकता। पवनं विना तु जीवनमेव न भवति अतः त्वं सर्वं विद्यसे तेषाम्। स्वर्णचटका वर्तते भारतभूः (भवत्कृपया) परमाण्वानुबन्धेन अन्यानि राष्ट्राणि तत्स्वर्णं जिघृक्षन्ति।

आर्याच्छन्दसि रचितायामस्यां कवितायां कवेः संवेदना संवेदनशील-विषयेषु व्यङ्ग्यपरकता च साक्षात्कर्तुं शक्येते। परमाण्वनुबन्धः भारतदेशस्य आकाङ्क्षां पूरयित्वा भारतं विकसितं कुर्यादित्येव कवेः मनीषा सोत्प्रासमत्र आविर्भवति।

मित्रतां कामये शात्रवं चाश्रये

२००१ तमे खैष्टाब्दे आगरानगरे भारतपाकयोः मध्ये शान्तिस्थापनार्थं शिखर-वार्ता आयोजिता। पाकिस्तानस्य हठधर्मितायाः कारणेनैव शान्तिस्थापनस्य भारतदेशस्य प्रयासोऽसफलः जातः। १६.७.२००१ तारिकायां रात्रौ पाकराष्ट्राध्यक्षः पाकिस्तानं प्रत्यावर्तितः। भारतेन कोटिमितानि रूप्यकाणि तद्व्यवस्थानिमित्तमेव व्ययीकृतानि। जनाः दूरदर्शन-माध्यमेन कार्यक्रमं साक्षात् प्रत्यक्षीकुर्वन्तः परिणामशून्यतां दृष्ट्वा दुःखिताः जाताः।

विविधभावसमन्वितायां कवितायां द्वादश पद्यानि सन्ति। यत्र कविना अन्योक्ति-स्वभावोक्ति-व्यङ्ग्योक्तीनां च माध्यमेन याथातथ्यं वर्णनं विहितमस्ति। इयं कविता आत्मोक्तिशैल्या रचिताऽस्ति यत्र अतिथिः उत्तमाङ्गं, शिरः इच्छति (जम्मूकाश्मीरप्रान्तं भारतस्य उत्तमाङ्गं (शिरः) वर्तते)। प्रस्तुतकवितायां पाकराष्ट्राध्यक्षस्य कुटिलं चरित्रं चित्रितमस्ति। तद्यथा–

मित्रतां कामये शात्रवं चाश्रये,
पार्श्ववर्त्ती तवाहं सदा कूटधीः।
त्वद्गृहे त्वद्विरुद्धं भणाम्यप्रियम्
आतिथेय! त्वदीयोऽतिथिश्चास्म्यहम्॥[335]

मनः-कर्म-वचःसु अनेकतायाः भावः मुशर्रफस्य चारित्रिकीं कुटिलतां प्रदर्शयति भारतीयकूटनीतिज्ञानां च मनःस्थितिं दर्शयति।

वाचि चित्तेऽथ कार्ये न चैकोऽस्मि भो
दर्शनीयं स्थलं वीक्ष्य मोदं भजे।
भोजनं स्वादु तेऽहं करिष्ये परं
नैव संयुक्तघोषं करिष्याम्यहम्॥[336]

संयुक्तोद्घोषणेन संयुक्तप्रतिज्ञया च द्वयोः देशयोः प्रगतिमार्गः प्रशस्यते सहैव पारस्परिकसम्बन्धोऽपि पुष्टो भवति। भारताय न किमपि दातुमुत्सुको मुशर्रफः, भारतात् सर्वं वाञ्छति।

त्वद्गृहे यच्च संगीतमायोज्यते
तत्स्वकर्णातिथीकर्तुमस्म्युत्सुकः।
किन्तु दातुं न पार्श्वे ममास्ते कण-
स्त्वत्सकाशाच्च सर्वं
जिघृक्षाम्यहम्।।[337]

स्वीयजन्मभूमिं द्रष्टुमुत्सुकता तु वर्तते परं न शान्तिस्थापनार्थम्, एतादृशस्य पाकिस्तानस्य नायकस्य चरित्रं मुखरितमस्यां कवितायाम्। अस्माकं भारतराष्ट्रं गेहविस्फोटकैः संत्रस्तमस्ति, मुशर्रफस्य पूर्वं तैस्सह वार्ता केभ्यश्चिदपि न रोचते।[338]

नह्युपेक्षे विवादास्पदानुद्धतान्,
गेहविस्फोटकान् त्वद्गृहे भाषितुम्।
पूर्वमेतैः सहाहं वदिष्यामि भो
त्वां ततोऽहं वदाम्यप्रियं वा प्रियम्।।[339]

पाकराष्ट्राध्यक्षः शान्तिप्रियवार्तासु न श्रद्दधे। अधुना सम्पत्तये मित्रस्यापि हत्या भवति न केवलं मित्रस्य, पित्रोः अपि हत्या क्रियते, तस्या एव सभ्यतायाः प्रभावः मुशर्रफेऽपि दृश्यते, सः अग्रजस्य शिरः (भारतस्य शिरः काश्मीरम्) प्राप्तुकामोऽस्ति।

आगतोऽहं गृहं ते सखे याचितुम्
उत्तमाङ्गं त्वदीयस्य गेहस्य वै।
दीयतां मह्यमेतद् यथा मद्गृहे
वर्धतां मे प्रतिष्ठा सुखी स्यामहम्।।[340]

भारतस्य शिरोदानादेव मित्रतायाः पुष्टिः भवितुं शक्यते। मुशर्रफः भारतं निष्ठुरमित्रसंज्ञया सम्बोधयति सहैव काश्मीरप्रदानार्थं विवशीकर्तुमिच्छति।

त्वं त्वतीवासि रे निष्ठुरो मित्र मे
नो शृणोषि त्वमीषन्ममाभाषितम्।
त्वं न दत्से यदा मे ममाकाङ्क्षितं
यामि नैजं गृहं रिक्तहस्तोऽप्यहम्।।[341]

पाकिस्तानं भारतस्य अनुजः, परम् अनुजः अग्रजस्य वार्तां न शृणोति वार्तां त्यक्त्वा गृहं गन्तुमपि सिद्धः। भारतात् रिक्तहस्ताभ्यां गमनेऽपि सः

स्वीयम् अपमानमवगच्छति किञ्च जनतायाः विषयेऽपि चिन्तयति–

यामि हंहो कथंकारमस्माद् गृहाद्
रिक्तहस्तः स्वकं गेहमद्य प्रभो।
मर्षयिष्यन्ति मां नो जना मे गृहे
स्वाननं तान् कथं दर्शयिष्याम्यहम्॥[३४२]

कवितायां मुशर्रफस्य चारित्रिककुटिलता मुखरितास्ति या च उभयोः देशयोः कृते अशान्तिकरी अस्ति। व्यङ्ग्येन वचसा पाकराष्ट्राध्यक्षस्य कूटनीतिः कविना निन्दिता, पाकिस्तानं कदाऽपि भारतं मित्रं न मनुते। कवेः संवेदना देशयोः (पाकभारतयोः) मित्रतां द्रष्टुं व्यग्राऽस्ति, परं पाकस्य हठवशात् मित्रतास्थापनस्य भारतस्य प्रयासः दग्धसाज्जायते। १७.७.२००१ तमे ख्रैष्टाब्दे रचितायां कवितायां १२ पद्यानि सन्ति यानि च स्रग्विणीच्छन्दसि रचितानि विद्यन्ते। कविना स्वीयकवितामाध्यमेन भारत-पाकिस्तानयोः मित्रतायाः कामना कृता। कवेः मनीषा भारतपाकिस्तानदेशयोः आदान-प्रदानसम्बन्धं स्थापयितुं वर्तते।

३.८ विविधविषयपरकरचनानां समीक्षणम्

भावसन्धिः

'भावसन्धिः' कविता भारतीयवायुयानापहरणस्य घटनायाः स्मरणं कारयति, भारतीय-बन्दिगृहेषु स्थितान् काञ्चन आततायिराक्षसान् मोचयितुम् आततायिनः घटनामिमां सफलीकृतवन्तः, कन्धहारविमानापहरणस्य दुर्घटना भारतीयानां कृते दुःखप्रदा विद्यते। अस्मिन् प्रकरणे एकः भारतीयः तैः हतः। रूपेनकतियालनाम्नः यात्रिणः हननेन कविः दुःखितो वर्तते, आततायिनः अमृतसरवायुयानस्थानतः तैलं गृह्णन्ति, ततः दुबई प्राप्य केचन यात्रिणः मुक्तिमपि प्राप्नुवन्ति। भावसन्धि- कवितामाध्यमेन कविहृदयं नितान्त दूयते। इयं घटना आरक्षकाणामपि शैथिल्यं व्यनक्ति। कविः कथयति -

विमानं नीतवन्तस्ते विना काठिन्यमस्माकम्॥[३४३]

इयं घटना अस्माकं राष्ट्रस्य विवशतां प्रदर्शयति। कविः इमामेव

विवशतामवलोक्य ग्लानिं करोति, कथयति च -

न दूयेऽहं रुजो वित्तस्य नाशाद् बन्धुनाशाद्वा
न दूयेऽहं सभायां मेऽपमानान्मित्रघाताद्वा।
न दूये पुत्रशाठ्याद्वाप्युपेक्षायाः स्वजायायाः
परं राष्ट्रस्य वैवश्यं विलोक्याऽहं भृशं दूये।।[३४४]

इयं घटना १९९८ तमे खैष्टाब्दे घटिताऽऽसीत्। अष्टौ दिनानि यावत् यात्रिणः बन्दीकृताः आसन्, घटनायां मृतस्य यात्रिणः भार्यायाः न जाने कीदृशी दशा स्यात्? तस्याः दशामनुभूय कविः महद्दुःखमनुभवति, प्रभुस्मरणेन सान्त्वनां च प्रकटयति। शताब्द्याः अन्तिमवर्षस्य शुभकामना सहसैव कविमुखात् प्रकटिता भवति। अस्य देशस्य स्वाभिमानो वृद्धिं गच्छेत्, एतादृशी घटना न पुनर्जायेत, आतङ्कवादस्य समूलमुन्मूलनं स्यात् इत्येव कविः कामयते। कस्यापि देशस्य सौभाग्यं भवति यत् तद्देशस्य नागरिकाः स्वाभिमानपूर्वकं जीवनं यापयेयुः, सर्वेऽपि प्राणिनः निर्भीकतया वसेयुः, किञ्चिदपि राष्ट्रं विवशतां न प्राप्नोतु, वञ्चकानां नाशः भवेत्। अस्माभिः भारतीयैस्तु 'स्वराष्ट्रे जागृयाम' इयं पङ्क्तिः सर्वदैव स्मर्तव्या। अन्ते च कविः कामयते यत् ईदृशी घटना न पुर्नभूयात् न चाहं पुनर्दूये।

भावसन्धिनामाख्ये काव्ये सप्तश्लोकास्सन्ति। अस्मिन् काव्ये कविना 'बहरे-हजज़्मुसम्मन्-सालिम्' नाम उर्दूछन्द 'विधाते'ति नाम हिन्दीछन्दो वा प्रयुक्तम् यस्य च वर्णनं चतुर्थे अध्याये करिष्यते। इयं कविता १.१.२००० तमे ई. वर्षे रचिताऽस्ति।

योऽयमातङ्कवादः

'योऽयमातङ्कवादः' शीर्षकान्वितेन रचितमिदं पद्यं स्रग्विणीछन्दसि वर्तते, श्लोकेऽस्मिन् आतङ्कवादस्य दुष्टता वर्ण्यते। अयमातङ्कवादः दुष्टतमः वर्तते दुष्टानामपि दुष्टः वर्तते। वर्धमानः आतङ्कवादः अधुना सम्मानितः प्रतीयते यश्च नित्यं जगत् पीडयति। या सर्वप्रमुखा समस्या वर्तते सा आतङ्कवादनाम्ना व्यवह्रियते क्वचिदपहरणम्, क्वचित् बाम्ब-विस्फोटः, निरीहमानुषाणां हत्या सर्वमपि दुष्टकृत्यजातं आतङ्कवादिभिरेव आचर्यते। अस्यैव आतङ्कवादस्य समूलनाशं कामयमानः कविः नूतनवर्षस्य मङ्गलकामनां

प्रयच्छति, अयमातङ्कवादः **"आयतौ नैव कीर्तिं जयं चाप्नुयान्नूतने वत्सरे ते भवेन्मङ्गलम्॥"**[३४५]

महाकुम्भे

महाकुम्भमेलापकम् न केवलं भारतस्यापितु समस्तस्य विश्वस्य बृहत्तमं मेलायकं भवति। अयं महाकुम्भः हरिद्वारे, उज्जयिन्यां, नासिके तीर्थराजप्रयागे च जायते। अस्यां कवितायां कविः प्रयागे अवस्थितो न विद्यते, प्रयागराजइलाहाबादस्थ-महाकुम्भस्य वर्णनं च करोत्ययम्। शिशिरर्तौ जायमाने मेलापकेऽस्मिन् अन्धविश्वासवशात् बद्धमूलास्थावशाद्वा जनाः शीतले जलेऽवगाहन्ते। महाकुम्भेः ग्रहाणामपि गतिः काचित् विशिष्टा एव भवति कविः तद्वर्णनं करोति। तद्यथा –

स्थितः सूर्यस्तथा चन्द्रो मकरराशौ गुरुर्मेषे।
वृषे वा, द्वादशाब्दानन्तरं स्नामो महाकुम्भे॥[३४६]

महाकुम्भे हिन्दुसंन्यासिनां दलानि एकैकं कृत्वा जले आत्मानं निमज्जयन्ति सर्वतः प्राक् नागासंन्यासिनां दलं स्नाति, ततः संन्यासिनः स्वदलाऽनुसारं (अखाड़ा-सर्वप्रथमं-जूना अखाड़ा, निरञ्जनी अखाड़ा,........ .एवं क्रमेण) स्नान्ति, तेषामनन्तरं गृहस्थानां क्रमो जायते।

कविवररमाकान्तशुक्लोऽपि अस्मिन् मेलापके स्नातुं गन्तुकाम आसीत् परं कार्यवशात् न गतः। तद्दृश्यं पाठकान् दर्शयति स्वीयरचनाचक्षुर्भ्याम्, महाकुंभस्य अलौकिकं दृश्यं अपूर्वं दृश्यं, यत्र मानवानां जलधिरूपा आस्था 'गागर में सागर' इत्याभाणकानुसारं एतस्य सौन्दर्यं वर्धयति। महाकुम्भनामके मेलापके सर्वेऽपि सम्मिल्य (भिन्नहृदयाः) एकत्र जले निमज्जिताः भवन्ति एतद्रहस्यं न कोऽपि जानाति। विद्वांसः तद्रहस्यं समीक्षन्ते। महाकुम्भमेलापकस्य कृते न कश्चिदपि प्रचारः आचर्यते तथापि एतावान् जनसमूहः महदानन्दमनुभवति मोक्षाय च प्रकल्पते। महाकुम्भादेव इदानीं राष्ट्रगरिमा जातोऽस्ति वयं सर्वे एकीभूताः जाताः। तद्यथा–

अहो मे राष्ट्रगरिमा येन जीवामो वयं सर्वे।
विभिन्ना एकतां याता मिलामो वै महाकुम्भे॥[३४७]

'यत्र समस्तं विश्वं भवत्येकनीडं' इति वेदवाक्यस्य सिद्धता अत्र

जायमाना दृश्यते। अर्थात् सम्पूर्णस्यापि विश्वस्य जनाः अत्र निमज्जन्ते आत्मानम्। महाकुम्भात् कश्चन विशिष्टः सन्देशः विश्वे प्रसार्यते-सः सन्देशः- "**विश्वं भवत्येकनीडं**' इत्येवाऽस्ति। समग्रमपि विश्वं भेदभावनारहितो जायेत, इत्येव कामयते कविः। महाकुम्भे आबालबृद्धाः सर्वे स्नान्ति, अनेन किञ्चन विलक्षणं दृश्यं दृश्यते। अथ च नव्यानां यन्त्राणामुपकरणानामपि संयोगो भवति येन कुम्भस्य सुचारुतया दर्शनं कर्तुं शक्यते दूरस्थैरपि जनैः। तद्यथा-

पुरातननूतननाभ्यामिह मिलित्वा साध्यते योगः।
भवन् मुग्धोऽवलोकय नूतनामाभां महाकुम्भे।।[३४८]

'योगश्चित्तवृत्तिनिरोधः' इति पतञ्जलिवचनं साधयतो जनान् महाकुम्भे पश्य। अन्ते कविः कथयति अहं न गतः त्रिवेण्यां महाकुम्भे, मन्ये कविना दूरदर्शने प्रसारितं दृश्यं दृष्टं स्यात् किञ्च स्वकीयरचनया एव कविः निमज्जितो दृश्यते।

कवितायामस्यां सप्तदशपद्यानि विद्यन्ते, सर्वाण्यपि पद्यानि हिन्द्याः 'विधाते'ति नाम्नि छन्दसि अथवा उर्दूच्छन्दसि - (बहरे हजज मुसम्मन् सालिम) विद्यन्ते, रचनातिथिः - १४.१.२००१ तम ई. वर्षः वर्तते।

कविसम्मेलन-प्रस्तावना

कविसम्मेलनप्रस्तावनायां कविः उत्कलवसुधां नमस्करोति या वसुधा स्वकीये क्रोडे सर्वानपि महापुरुषान् उपवेशयति धारयति च। कविः तेषां कवीनां, ख्याततीर्थस्थलानां साधूनां च स्मरणं कविसम्मेलनप्रस्तावनायां करोति, कविः सुभद्रां, बलभद्रं, दारुब्रह्मश्रीजगन्नाथं चन्द्रभागां, कोणार्कमन्दिरं, धवलगिरिं, लिङ्गराजं, गौरीकेदारमन्दिरं, नन्दनकाननं, चिलकासरोवरं, खण्डोत्तरगिरिम्, खण्डगिरिम्, उदयपूर्वगिरेर्गुहां, खण्डगिरि, दिगम्बरमहापात्रम्, केशवचन्द्रदाशादीन् कवीन् स्मरति।

कविसम्मेलनानि काव्यपिपासाकुलानां विदुषां विद्याव्यसनं विद्यते। आप्राचीनकालात् कविसम्मेलनानां बहु प्रचुरता आसीत्, कुञ्जे-कुञ्जे कविसम्मेलनार्थं कवयः एकत्रिताः भवन्ति स्म, इत्येतत् कविसम्मेलनस्य ऐतिहासिकं परिदृश्यं वर्तते। सैव परम्परा इदानीमपि आचर्यते सुधीभिः

कविहृदयैः, एतान् श्रोतुकामः सुधी श्रोतृवर्गोऽपि सावधानेन मनसा अत्र भागं गृह्णाति। कविसम्मेलनस्य प्रस्तावनां कविः लेखन्या सज्जीकरोति, काव्यपाठाय विविधान् कवीः आह्वयति तान् श्रोतुं च श्रोतृणाम् आवाहनं करोति। तत् काव्यं रसपूर्णं विद्यते। तद्यथा-

अल्पाक्षरमसन्दिग्धं रसपूर्णं च सारवत्।
काव्यं विजयतां तत्रभवतां प्रेरेणाप्रदम्।।[३४९]

कविः रसपूर्णं काव्यं प्रेरणाप्रदम् उत्तमं च मनुते, रसः काव्यस्य सारभूतं तत्त्वं विद्यते रसानुपस्थितौ काव्यमुत्तमं न भवति, रसः ब्रह्मसहोदरत्वेन काव्यतत्त्वविद्भिः स्वीकृतः। सारवत् रसयुक्तं च काव्यं ब्रह्मसहोदरसदृशम् आनन्दं प्रददाति इत्येव कवेः आशयः। अन्ते च कविः एतादृश्यां कविसङ्गतौ कवीनां वन्दनार्थं डॉ. चन्द्रकान्तशुक्लसहितमात्मानं धन्यं मनुते। इमावुभावपि पुर्यायामायोजितेऽस्मिन् कविसम्मेलने अध्यक्ष-मुख्यातिथी आस्ताम्।

कवितायामस्यां दश पद्यानि अनुष्टुप्छन्दसि वर्तन्ते, रचनातिथिः १५.१२.२००२ तम ईसवीवर्षं वर्तते।

वन्दे कविपरम्पराम्

'कवयति वर्णयति इति कविः' इति व्युत्पत्या वर्णनकुशलः कविः। आदीर्घकालात् अस्माकं वर्णनपरम्परा अनवरतं प्रवहति, वाल्मीकिना या सुदीर्घपरम्परा लौकिकवर्णनेन प्रारब्धा सा तु अतिशयचमत्कारोत्पादिनी एव या च परम्परा क्रौञ्चपक्षिणः वियोगस्वरूपा श्लोकीभूता, सा च रामायणाख्यं महाकाव्यं चकार। कवेः कार्यं भवति भूतवर्तमानभविष्याणां वर्णनं लोककल्याणाय। इयं परम्परा संस्कृते, प्राकृते अपभ्रंशे चाऽनिशं प्रवहन्ती विद्यते। 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' इति लोकहितकरं सन्देशं प्रददती वाल्मीकिवाणी प्रशस्यते।

अस्मिन् क्रमे कविः महाभारतकर्त्तारं कवीशम्, सौमिल्लभास-कालिदास-अश्वघोष-भारवि-माघ-रत्नाकर-हर्ष-जगन्नाथ-अप्पयदीक्षित-सदृशान् कवीन् स्मरति।

ये चास्मद्युगे जाता वाणीपूजनतत्पराः
विख्याताश्चाप्यविख्याताः गैर्वाणीकवयो बुधाः।।[३५०]

ये निर्लोभिनः भाषाकवयः ते तुलसीदास-सूर-कम्बनसदृशाः वन्दनीयाः। सुख्याताः संस्कृतकवयः भट्टमथुरानाथशास्त्री-रमेशचन्द्रशुक्ल-परमानन्दशास्त्री-रसिकबिहारीजोशी-हर्षदेवमाधव-श्यामदेवपाराशर-पुष्पादीक्षित-शंकरदेव अवतरे-राजेन्द्रमिश्र-राधावल्लभ-जनादर्नप्रसाद-बच्चूलालअवस्थी-सत्यव्रतशास्त्री-देवदत्तभट्ट-हरिदत्तशर्मा-इच्छारामद्विवेदिसदृशाः काव्यनिर्माणे संलग्नाः सर्वेऽपि देववाणीसमुपासकाः कवयः नित्यां स्मर्तव्याः। अन्ते च -

श्रीवाल्मीकिसमारब्धां कालिदासादिमध्यमाम्।
इदानीन्तनपर्यन्तां वन्दे कविपरम्पराम्॥[३५१]

उपर्युक्ताः सर्वेऽपि कवयः तत्तद्देशीयसामाजिकविषयाणां सन्निबन्धनेन विश्रुतास्सन्ति, सर्वैरपि एकैकस्मिन् क्षेत्रे असाधारणं कार्यमकारि, यैश्च अस्मादृशाः पाठकाः रसनिमग्नाः कृताः। अतः कविः सर्वेषां कवीनां नामस्मरणेन आत्मानं कृतज्ञं साधयति, कविभिः न केवलं कविता अपितु सर्वविधं काव्यतत्त्वं समासाधितम् अतः तेषां महानुपकारः वर्तते अस्मासु। इयं कविता कविना दिसम्बरमासस्य चतुर्दशतारिकायां २००२ तमे ई. वर्षे रचिता।

मम तथा विहगदम्पत्योर्विदेशयात्रा

अस्यां मुक्तककवितायां कविना सह विहगदम्पत्योः वार्तायाः विवरणं वर्तते, अस्याः कवितायाः भावः लघुकथारूपेण वर्तते-कथा इत्थं वर्तते-कविः विदेशे कुत्रचित् आमंत्रितः आसीत् सोऽपि एकाकी, एवं चिन्ताकुलः कविः स्वगृहाङ्गणे विहगदम्पतीं पश्यति। तयोरेकः निवेदयति तमपि विदेशयात्रार्थं नेतुं, परं कविः कथयति यत् तस्य कृते यात्राशुल्कं, सीमाशुल्कादिकं प्रदाय अनुमतिः लभ्यते। अतो मां धर्मसङ्कटे पातयितुं नार्हसि। एतच्छ्रुत्वैव विहगः आकाशे डयते, निर्दिष्टायां तिथौ कविः विदेशं प्राप्नोति। यत्र तस्य आवासव्यवस्था आसीत् तत्र तेन सैव विहगदम्पती दृष्टौ। कविः आश्चर्यचकितश्च जातः। विहगः ब्रूते यत् मित्र! त्वं सीमाबद्धोऽसि नाऽहम्, अस्माकं मुक्ताकाशयात्रायां कस्यापि देशस्य सीमा अवरोधं नोत्थापयति, तव यात्रा सुफला भवतु इति, कविना तस्य छविः अङ्किता यतो हि तत्कृते इयं स्मरणीया घटना आसीत्।

कवेः मानवीकरणं दर्शनीयं वर्तते अत्र, विहगः ब्रूते यत् दैन्यं मा कुरु मित्र। तद्यथा-

मित्र दैन्यं मा स्म गमः, त्वं मनुष्यः सन् विवश आसीः
त्वं सीमाबद्धोऽसि, अस्माकं मुक्ताकाशयात्रायां,
कस्यापि देशस्य सीमा
अवरोधं नोपस्थापयति॥[३५२]

पक्षिणः मानवोचिता कार्यशैली अत्र दृग्गोचरीक्रियते, कश्चन पक्षी कवेः कुशलक्षेमं पृच्छति, तस्य कविना सह मैत्री प्रगाढा वर्तते यतो हि तम् एकाकिनं त्यक्तुं सः विहगः न वाञ्छति। वयं सर्वेऽपि वाञ्छामो यत् विहगवत् अस्माभिरपि स्वतंत्रैः भूत्वा विचरणं क्रियेत। एवं तु तदैव भवितुं शक्नोति यदा सम्पूर्णमपि विश्वं कुटुम्बं स्यात् कुत्रापि गन्तुं भयं न स्यात् न कोऽपि नियमः। एतादृश एव चिन्तने व्यग्रः स्यात् कदाचित् कविः। तस्य आकांक्षा वर्तते यत् मानवानामपि यात्रा मुक्ताकाशयात्रा स्यात् कुत्रापि अवरोधः न स्यात् सीमाबन्धनरहिताः स्युः सर्वा अपि यात्राः। सर्वेऽपि मानवाः एकाकिगमनव्यथारहिता स्यात्। चिन्तारहिताः स्युः सर्वेऽपि मानवाः। कवेः संवेदना प्रखरीभूताऽस्ति अस्मिन् काव्ये। या तावत् विहगः भूत्वा मानवानपि प्रेरयति चिन्तामुक्तये।

अपहृत-विमाने

'अपहृतविमाने' इत्यस्यां कवितायां कवेः वायुयानापहरणस्य घटनाया काचित् स्मृतिः वर्तते तस्याः घटनाया उल्लेखः कविना स्वलेखन्या अस्माकं पुरः स्थापितः। सर्वशुक्लोत्तरायां 'भावसन्धिः' शीर्षकान्विता एका अपरा अपि रचना विमानापहरणसम्बन्धिनी रचिताऽस्ति कविना। यात्रिणां मनोदशां वर्णयन्ती इयं कविता आतङ्कवादिनां दुःसाहसमपि प्रदर्शयति। मृत्युं सम्मुखे दृष्ट्वा मानवस्य या स्थितिः सा तु भीतिकरी एव। अपहर्तॄणां निर्देशः कथं यात्रिभिः पाल्यते? दिङ्मात्रमुदाह्रियते-

विमानस्यापहर्तारो यात्रिणस्तर्जयन्त आज्ञापयन्ति-
सर्वे अधोमुखा अधोदृष्टयश्च भूत्वा तूष्णीं तिष्ठन्तु॥[३५३]

आतङ्कवादिनस्तु मानवीयतारहिताः भवन्ति तेषां चिन्तने विश्वासो नैव भवति, अपहृते (विमाने) वायुयाने मानवा नानाविधं चिन्तनं कुर्वन्ति, कश्चित् चिन्तयति यत् वयं सर्वेऽपि यात्रिणः सहैव उत्थाय एतान् हन्मः अपरोऽपि तथैव परं न कोऽपि तथा कर्तुं पारयति, यतो हि सम्मुखे मृत्युः वर्तते। अस्माकं भारते द्वित्राः तादृश्यः घटनाः घटिताः याभिः मानवता रक्तरञ्जिता जाताऽऽसीत्, इमाः घटनाः दृष्ट्वा कविहृदयः व्यथितः वर्तते। कवितायामस्यां कश्चिद् युवकः आतंकवादिभिर्हतः। तद्यथा –

अयं यात्री, अधोमुखोऽधोदृष्टिश्च सन् विमाने नातिष्ठत्।
अयमस्मान् वञ्चयितुकाम आसीत्।
अतोऽस्मै पुरस्कारः प्रदीयते।
एवमुक्त्वा छुरिकया स यात्री व्यापादितस्तेन क्रूरेण।।[३५४]

कवेः मनोदशाः अपहृतविमानस्य यात्रिरूपेण दृग्गोचरीक्रियते। क्रोडे यदा मृत्युः भवति तदा तु सर्वेऽपि प्राणिनः भीतभीताः भवन्ति मानवस्तु बुद्धियुक्तः कथं न खलु भयभीतस्स्यात्। मुक्तच्छन्दसि रचिता इयं कविता जुलाईमासस्य दशमदिनाङ्के २००६ तमे ईसवीयवर्षे लिखिताऽस्ति।

मातरम्प्रति पुत्रस्य जंगमभाषसन्देशः

कवेः इयं कविता आधुनिकतमा अत्याधुनिकी वा वर्तते, कवितामिमां पठित्वा मम तु रोमाञ्चस्सञ्जातः सहृदयानां तु का गतिः? कश्चन युवको रेलयाने विस्फोटकारणात् स्वकीयां जायां मृत्युशय्यायां दृष्ट्वा आत्मानं च दुर्घटनाग्रस्तं दृष्ट्वा स्वकीयां मातरं दूरभाषेन सूचयति यत् तस्याः पुत्रोऽपि विस्फोटेऽस्मिन् मृत्युसमीपे वर्तते, पौत्रः तु जीवति, तस्मात् अयमेव सन्देशः यत् त्वया (मात्रा) पुत्रशोकाकुलितया न भवितव्यं यतः पौत्रस्य पालनं करणीयम्। कविः कवितायाः प्रारम्भ एव आंग्ल 'हैलो-हैलौ' इति शब्देन करोति संस्कृतस्य नमो नमः शब्देन च समापयति। भारतीयपरम्परायां मातुः पुत्रः एव सर्वं भवति तस्यैव स्नेहपारावारे सा निमज्जिता जायते, पुत्रस्य मृत्युं सा द्रष्टुं न शक्नोति, पुत्रवियोगे साऽपि कदाचित् दिवंगच्छतीति कृत्वा कवितायामस्यां मातुः कृते पुत्रस्य सन्देशः त्वं मर्तुं न स्वतंत्राऽसि इति सहृदयानां कृते महदानन्दस्य विषयः यतो हि मम्मटाचार्यः शोकमपि नवमं रसं मनुते–

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः[39]

अत एव सहृदयपाठका रसपारावारे निमज्जिताः भवन्ति कविता वक्ति–

त्वया तु जीवितव्यमेव पौत्रस्य लालनार्थम्
नवाङ्कुरोऽयं तव वंशस्य।
पुत्रशोके मर्तुं त्वं स्वतंत्रा नासि, नमो नमः॥[40]

मुक्तच्छन्दसि रचितेयं कविता शोकरसं व्यनक्ति, अस्याः रचनाकालः १४.२.२००६ वर्तते।

कविसहृदयसंवादः

अस्यां लघुकवितायाम् आचार्यः कवि–सहृदययोः मध्ये संवादस्य संभावनां अन्विषति कविः सहृदयं भणति यद्–यत् वक्तव्यमहं वाञ्छामि कथयितुं तन्न त्वं श्रोतुं वाञ्छसि, अत्र मन्ये कारणं कविः समाजस्य कुरीतीनां विषये वक्तुम् इच्छति, समाजस्तु अस्माभिरेव निर्मीयते अतः अस्माकं न आलोचनां कर्त्तव्या आचार्यसदृशः कविस्तु कुरीतीषु, दुर्व्यवहारेष्वेव कुठाराघातं करोति, येन सुदृढः परिपक्वश्च समाजः निर्मीयेत। अद्यतनसमाजस्तु मिथ्याचार–जातिवाद–समाजवादादि पङ्के निमज्जितः अतः कथं कवि–सहृदयसंवादः भवेत्? न भवितुं शक्नोति, इति इयं कविताऽपि मुक्तच्छन्दसि निर्मितास्ति परं कवेः संवेदना लघ्वीभूतायामपि कवितायां सागरवत् दृश्यते, सारवचोभिः कविना स्वकीया मनोगता भावना प्रकटिता, परमत्र एका अपराऽपि संभावना मे मनसि वर्तते यत् सहृदयास्तु कविवाणीं रसपारावारे निगूढा सन्तः पान्ति तर्हि कथं संवादो न जायते अहं मन्ये कविना अपरः पक्षः त्यक्तः।

पुनर्नो भारते भूयात्

उत्तरप्रदेशप्रान्तस्य नोयडाजनपदस्य निठारी नामके स्थाने घटितायाः घटनायाः विषये कवेः हृदयं दुःखे निमग्नं विद्यते। २००७ तमे वर्षे इयं घटिताऽसीत् यत्र सुरेन्द्रकोली नामकः सेवकः किशोरीणामपहरणं कृत्वा ताः हन्ति स्म ततश्च मृतशरीरेण साकं बलात्कारं करोति स्म न केवलमेतावदेव, मृतशरीरस्यैव भोजनं स करोतिः स्म। सर्वा अपि मानवता तेन भस्मसात् कृता 17 युवतीभिः तेन एतादृशी कुत्सिता क्रिया सम्पादिता, एतदर्थं २०११तमे वर्षे

तस्मै (Supreme Court) सर्वोच्चन्यायालयेन मृत्युदण्डोऽपि दत्तः। ईदृशी घटना इतः प्राक् न कदापि अस्माभि श्रुताऽऽसीत्। कविः स्वलेखन्या घटनायाः विषये लिखति–

पुरा दुष्कर्म तदनु व्याहतिस्तदनु द्विधाकरणम्।
ततो नालाप्रवाहो नो पुनर्मे भारते भूयात्॥[३५७]

कविः दुःखितमनसा, खिन्नचेतसा वदति यत्–

न शालायां गता न क्रीडिता नाप्ता विकासं ये।
शिशूना हन्त तेषां वैशसं नो भारते भूयात्॥[३५८]

घटनायामस्यां सर्वेऽपि शिशवः (१० तः १६ वर्षीयाः) आसन्। कवेरियं कविता शासनस्य अकर्मण्यतामपि प्रकटयति। यैः साधूनां परित्राणाय यः विभागः स्थापितः तस्यामकर्मण्यत्वस्य परिणामभूता इयं घटना। निठारीत्याख्येन काण्डेन मानवीयतायाः सर्वेऽपि सीमानः लङ्घिताः। ईदृशी एव एका घटना मुक्तसरे अपि जाता आसीत्, तदानीमेव काले इमे द्वे अपि घटने कुत्सिते घटिते। एतादृशी घटना पुनः भारते न भूयात् इत्येव कवेः मनीषा।

कवितायामस्यां कानिचन विम्बानि अपि प्रयुक्तानि अकर्मण्यत्वम्, पिशाचानाम्, कुकृत्यं, मनुजता इत्यादीनि विम्बानि कवेः कौशलं द्विगुणितं कुर्वन्ति।

कविना स्वकवितासु सर्वदैव समाजस्य कुरीतयः, कुव्यवहाराः, कुकृत्यभूता घटनाः, वञ्चना, आतङ्कवादादिविषयाः स्वीयया सुहृल्लेखन्या उट्टङ्किताः। दुःखितमनसा कविः एतासु घटनासु कुठाराघातं करोति अयमपि कश्चन सुदृढः प्रयास यः सफलीभूतः प्रसिद्ध एव।

'विधाते'ति हिन्दीछन्दसि अथवा 'बहरे हजज मुसम्मन सालिम' इति उर्दूच्छन्दसि रचिताया अस्याः कवितायाः कालः १८-१-२००७ वर्तते। अन्ते तावत् २००६-०७ तमस्य अयं ध्वनिः कदापि न भारते भूयात्, लुधियानायां याचमानाः शिशवः कवेःकथनं स्मारयन्ति–

इमे शिशवो हि लुधियाना-गुरुद्वारेषु याचन्ते।
निठारी-मुक्तसर-काण्डं पुनर्नो भारते भूयात्॥[३५९]

"The Noida Serial Murders Case sovloed - Nithari Serial Murders Nitharikand- Took place in the house of busi-

nessman MoninderSingh in Nithari, India in 2005 and 2006. At present his servent Surender Koli has been convicted of Five murders and senenced to deth 11 murders remain officaially unsoved penting------legal proceedings"[360].

मधुपवृत्तिः

"मधुपवृत्तिः" इत्याख्या कविता सर्वशुक्लोत्तरायां सर्वप्राचीना विद्यते। न केवलम् इयं कविता सर्वशुक्लोत्तरायाः सर्वप्राचीना परं कवेः प्राचीनतामास्वपि प्राचीना विद्यते, इयं कविता कवेः छात्रजीवनस्य रचना वर्तते। प्रसादगुणोपेता माधुर्यगुणोपेता चेयं कविता कञ्चित् अलौकिकमानन्दं प्रददाति युवावस्थायां लिखिताम् इमां कवितां पठित्वा काचित् हिन्दी-भणितिः स्मर्यते- "होनहार बिरवान के होत चीकने पात"।

कविः कवितामाध्यमेन सुख्यातस्य मिलिन्दमहोदयस्य चरित्रं निन्दति। अयं चञ्चलो भ्रमरः अपराम् अपरामेव कलिकां चुम्बति, सर्वत्रापि नूतनायाः कलिकायाः रसं पिबति, पीत्वा नवं सुधारसं पातुं लालायितः भवति, कविलेखन्याः मधुरं पद्यम् द्रष्टव्यं वर्तते -

पीत्वा रसं-नव-सुधामधुरं मदीयं
कुत्र प्रयासि? वद सत्यमये मिलिन्द!
मालिन्यमेव वपुषो मनसश्च तेऽत्र
जानेऽधुनेति कलिका विललाप काऽपि[३६१]॥

इयं कस्याश्चित् कलिकाया विलपन्त्याः उक्तिः 'मम मधुरं रसं निपीय हे रसिक मिलिन्द! किमर्थमनुचितं प्रयासि? तव शरीरे मनसि च' कलुषतां पश्याम्यहम्।

वस्तुतः कविः भ्रमरमाध्यमेन दुर्वासनापरिपूतानां जनानां अस्थिरवृत्तिं प्रदर्शयति, तादृशः मानवः भ्रमरवत् एव भवति कदाचित् अत्र - कदाचित् तत्र, स पूर्णतया तृप्तिं नानुभवति कुत्राऽपि, ये दुश्चारित्र्याः भवन्ति, विविधविषयेष्वनुरक्ताः भवन्ति ये चाऽसक्ताः भवन्ति ते तु भ्रमरसदृशा एव, तैः तु इयं मधुपवृत्तिः त्यक्तव्या एव, सम्यगेवोक्तं कविना-

नानाप्रसूनकलिकासु मुदा मिलिन्दः
कृष्णोऽपि रक्तमनसा भ्रमिमातनोति।
सत्यं वदन्ति कवयो 'नहि चञ्चलानां
काऽपि स्थितिः सुरुचिरा भवतीह लोके[३६२]**॥**

कविः मिलिन्दमाध्यमेन तान् वराकान् मधुपवृत्तियुतान् निन्दति तद्यथा-

बालामसीम-रस-राशि-युतां जना ये
स्वीयैर्वचोभिरमितैः परिलोभयन्ति।
ते सत्यमेव परकीय-गुणाऽनभिज्ञा
निन्द्या भवन्ति सुचिराय मिलिन्द! विद्धि[३६३]**॥**

इमामेव मधुपवृत्तिम् अधुना बलात्कारादिकुकृत्यजननीं मनुते एतत् पंक्तिलेखकः, कविः सत्यां युवावस्थायामपि उपदेशवाक्यैः निन्दितवचोभिश्च मधुपवृत्तिसदृशैः कविताकामिन्या जनान् सन्मार्गोपदेशं करोति इति आनन्दं जनयति।

कवितायां वराक, भ्रमिमातनोति, दुर्वासनाकलितचञ्चलमानसाः, भावावबोधविधुरासदृशाः शब्दा सशक्ताभिव्यक्तये विम्बरूपास्सन्ति, यतोहि यथा वराक-शब्द कथनेन चञ्चलता दुष्टता अभिव्यज्यते तथैव अन्यैरपि शब्दैः तत्तद् विषया अभिव्यज्यन्ते।

●

सन्दर्भाः

१. वाणी वयं वन्दामहे, सर्वशुक्लोत्तरा-श्लोक-६, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

२. सुरभारती विजयते, सर्वशुक्लोत्तरा-श्लोक-६, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

३. वेदवाणीं नुमः, सर्वशुक्लोत्तरा-श्लोक-१, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली, २००८

४. वेदवाणीं नुमः, सर्वशुक्लोत्तरा-श्लोक-५, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली, २००८

५. वेदवाणीं नुमः, सर्वशुक्लोत्तरा, श्लोक-२, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

६. वेदवाणीं नुमः, सर्वशुक्लोत्तरा, श्लोक-४, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

७. वेदवाणीं नुमः, सर्वशुक्लोत्तरा, श्लोक-३, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

८. वेदवाणीं नुमः, सर्वशुक्लोत्तरा, श्लोक-७, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

९. वेदवाणीं नुमः, सर्वशुक्लोत्तरा-श्लोक-६, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

१०. वेदवाणीं नुमः, सर्वशुक्लोत्तरा-श्लोक-७, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

११. वेदवाणीं नुमः, सर्वशुक्लोत्तरा-श्लोक-१०, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

१२. धन्वन्तरिं तमीडे, सर्वशुक्लोत्तरा-श्लोक-१, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

१३. देववाणीसुवासः, पृ. ४/२०२, सम्पादक, राजेन्द्रमिश्रः, दे.प्र., नई दिल्ली-१९९३

१४. धन्वन्तरिं तमीडे, सर्वशुक्लोत्तरा-श्लोक-३, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

१५. धन्वन्तरिं तमीडे, सर्वशुक्लोत्तरा-श्लोक-४, ५, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

१६. धन्वन्तरिं तमीडे, सर्वशुक्लोत्तरा, श्लोक-६, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

१७. महाकालमालिका, सर्वशुक्लोत्तरा-श्लोक-७, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

१८. श्रीवरदेश्वराष्टकम्, सर्वशुक्लोत्तरा-श्लोक-९, रमाकान्तशुक्ल,: दे.प्र., नई दिल्ली-२००८

१९. देववाणीसुवासः, ५.०१९, डॉ. राजेन्द्रमिश्रः, दे.प्र., नई दिल्ली-१९९३

२०. भारतीय कविताएँ, पृ.-१८४-१८७

२१. देववाणीसुवासः, ५.१९, सम्पादकः-डॉ. राजेन्द्रमिश्रः

२२. तत्रैव, ५.८०

२३. तत्रैव

२४. अहं स्वतन्त्रता भणामि, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

२५. अहं स्वतन्त्रता भणामि, सर्वशुक्लोत्तरा, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

२६. अहं स्वतन्त्रता भणामि, सर्वशुक्लोत्तरा, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली-२००८

२७. अहं स्वतन्त्रता भणामि, सर्वशुक्लोत्तरा, रमाकान्तशुक्लः, दे.प्र., नई दिल्ली-२००८

२८. सर्वशु., रौतिते भारतम्, श्लो.-६

२९. रौति ते भारतम्, श्लो.-५
३०. तत्रैव, श्लो.-१९
३१. रौति ते भारतम्- श्लो-७
३२. भाति मे भारतम्- श्लो-१०७
३३. रौति ते भारतम्, दे.प., रमाकान्तशुक्लः
३४. भारतजनताऽहम्, दे.प., रमाकान्तशुक्लः
३५. भारत जनताऽम् - श्लो-९
३६. भारतजनताऽम्, श्लो-१४, १५, १६
३७. तत्रैव, श्लोक- २३, ३९, ४१
३८. रौति ते भारतम्- श्लो-३६
३९. तत्रैव, श्लो-४२
४०. अभितः परितः समया निकषा मां यद्घटते तत्प्रेक्षेऽहम्।
सर्वस्व कृते खलु सज्जा यासावहिता भारतजनताऽम् ।। भारतजनताऽम्, श्लोक-44
४१. एकं सद् बहुधा विलोक्यते भारतम्, सर्वशुक्लोत्तरा श्लो-१
४२. सर्वशुक्लोत्तरा, एकं सद् बहुधा विलोक्यते भारतम्, श्लो-२
४३. तत्रैव, श्लो-११
४४. सर्वशुक्लोत्तरा, एकं सद् बहुधा विलोक्यते भारतम्, श्लो-६
४५. तत्रैव, श्लो-७
४६. सर्वशुक्लोत्तरा, एकं सद् बहुधा विलोक्यते भारतम्- श्लो-८
४७. तत्रैव- श्लो-९
४८. तत्रैव- श्लो-११
४९. ब्रूहि जगन्नाथस्वामिन्, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्लः- श्लो-१
देववाणी परिषद्, नई दिल्ली-२००८
५०. ब्रूहि जगन्नाथस्वामिन्, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्लः- श्लो-२
देववाणी परिषद्, नई दिल्ली-२००८
५१. ब्रूहि जगन्नाथस्वामिन्, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्लः- श्लो-७,
देववाणी परिषद्, नई दिल्ली-२००८
५२. उत्स्य वातो वहति वासो अस्याः अधिरथं यदजयत् सहस्रम्।
रथीरभुन् मुदगलानी गविष्ठां भरे कृतं व्यचेदिन्द्रसेना।। (ऋग्वेद-१०/१०२/२)
यार्भिविश्पला धनसामथर्व्यं सहस्रमीऴ्हं आजावजिन्वतम् (ऋग्वेद-१/११२/१०)

५३. अबला जीवन हाय तुम्हारी यही कहानी, आँचल में है दूध और आँखो में पानी।

५४. सर्वशुक्लोत्तरा, ब्रूहिजगन्ननाथस्वामिन्, श्लोक-६

५५. सर्वशुक्लोत्तरा-ब्रूहिजगन्ननाथस्वामिन्, श्लोक-४

५६. सर्वशुक्लोत्तरा-ब्रूहिजगन्ननाथस्वामिन्।

५७. संस्कृतस्वातन्त्र्यस्वर्णसौरभम्, सम्पादकः-श्रीकृष्णसेमवालः, पृ.-४४२-४७३

५८. सर्वशुक्लोत्तरा, स्वतन्त्रतायाः स्वर्णजयन्ती - श्लो-२, ३

५९. तदेव, श्लोक-५

६०. सर्वशुक्लोत्तरा, स्वतंत्रतायाः स्वर्णजयन्ती - श्लो-६

६१. काकाकवेः रचना अत्र सार्थकं प्रतिभाति-
'कह काका कवि काँप रहा क्यो रिश्वत लेकर?
रिश्वत पकड़ी जाय, छूट जा रिश्वत देकर।।

६२. सर्वशुक्लोत्तरा, स्वतन्त्रतायाः स्वर्णजयन्ती - श्लो-७

६३. सर्वशुक्लोत्तरा, स्वन्त्रतायाः स्वर्णजयन्ती, श्लो-८

६४. सर्वशुक्लोत्तरा, भारतस्य विजयोऽयम्, श्लोक-१

६५. सर्वशुक्लोत्तरा, भारतस्य विजयोऽयम्, श्लोक-२

६६. स्वतंत्रभारत अणुशक्ति का प्रयोग विनाश की अपेक्षा लोकहित के लिये करने के पक्ष में है। नेहरूयशः सौरभम्, ९/१२/१३

६७. भारतस्य विजयोऽयम्, डॉ. रमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली।

७०. भारतस्य विजयोऽयम्, डॉ. रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली।

७१. तत्रैव

७२. अटलविहारीवाजपेयिमहोदयः स्वीयभावान् व्यनक्ति -
''गूँजी हिन्दी विश्व में स्वप्न हुआ साकार। राष्ट्रसंघ के मञ्च से हिन्दी की जयकार।
हिन्दी की जयकार हिन्द हिन्दी में बोला। देख स्वभाषा प्रेम विश्व अचरज से डोला।।
कह कैदी कविराय प्रेम की माया टूटी। भारत मात धन्य, स्नेह की सरिता फूटी।।''

७३. सर्वशुक्लोत्तरा, भारतस्य विजयोऽयम्, रमाकान्तशुक्लः, दे.परिषद्, नई दिल्ली।

७४. तदेव

७५. तदेव, पृ. -१८

७६. सर्वशुक्लोत्तरा, प्रणम्याः कारगिलवीराः, श्लोक-३
७७. तत्रैव, श्लोक-५
७८. सर्वशुक्लोत्तरा, प्रणम्याः कारगिलवीराः, श्लोक-१७
७९. तदेव, श्लोक-११, १५
८०. तदेव, श्लोक-२५
८१. सर्वशुक्लोत्तरा, प्रणम्याः कारगिलवीराः, आचार्यरमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली।
८२. तत्रैव
८३. (१) युद्धे वीरगतिका आदित्यमण्डलं भित्वा ब्रह्मभावं गच्छन्तीति विश्वासः, सर्वशुक्लोत्तरा, पृ.-२६६

(२) युद्धभूमि में वीरगति को प्राप्त हुआ सैनिक योगी की गति को प्राप्त करता है। स्वामी गंगाधरेन्दु।

(३) गीतायामपि अस्य पुष्टिः जायते - "हेतो वा प्राप्स्यस्ति स्वर्ग-श्रीमद्भगवद्गीता।
८४. सर्वशुक्लोत्तरा, कारगिलवीराः, श्लोक-२६
८५. दिवसे सर्वसम्मुखे हत्वा कमपि नर ह्यपराधीगुण्डा।
न्यायालयात् सपदि युक्तोऽसौ वक्षो दर्शयते।। डॉ. प्रशस्यमित्रशास्त्री, सत्यमेवजयते, पारिजातम्, २३/४, पृ. ३४
८६. सर्वशुक्लोत्तरा, भारतस्य जनता समीक्षते, श्लोक-१
८७. सर्वशु. भारतस्य जनता समीक्षते, श्लोक-१
८८. तत्रैव, श्लोक-६
८९. सर्वशु. भारतस्य जनता समीक्ष्यते।
९०. तदेव
९१. तदेव
९२. धारय छद्म तपस्वीवेशम्, इत्थं स्थास्यति सदा जीवनेऽभीष्टं सौख्यं शेषम्
वैभवराशिरपारं प्राप्स्यति चान्ते दिवि प्रवेशम्।। अर्वाचीनसंस्कृतम्, २६/१, पृ. १९ (वैभवप्राप्तिस्थानम्)
९३. सर्वशु. भारतस्य जनता समीक्षते। डॉ. रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली-२००८
९४. तत्रैव
९५. तत्रैव

९६. सर्वशु. भारतस्य जनता समीक्ष्यते। डॉ. रमाकान्तशुक्लः, देववाणी परिषद्, नई दिल्ली-२००८
९७. तत्रैव
९८. अखण्डज्योति, नवम्बर-२००६, पृ.-२४
९९. सर्वशु., भारतस्य जनता समीक्षते, डॉ. रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली-२००८
१००. तत्रैव
१०१. स्वतन्त्रदेशः सुतरां विभाति, आ. रमाकान्तशुक्लः, दे.प्र., नई दिल्ली।
१०२. तदेव
१०३. स्वतन्त्रदेशः सुतरां विभाति, आ. रमाकान्तशुक्लः, दे.प्र., नई दिल्ली।
१०४. तत्रैव
१०३. स्वतन्त्रदेशः सुतरां विभाति, आ. रमाकान्तशुक्लः, दे.प्र., नई दिल्ली।
१०५. नमः शास्त्रिणे वीरधुर्यायतस्मै, श्लोक-१, आ. रमाकान्तशुक्लः।
१०६. तत्रैव, श्लोक-५
१०७. शिशुपालवधम् महाकाव्यम्, महाकविमाघ।
१०८. सर्वशु. नमः शास्त्रिणे वीरधुर्यायतस्मै, श्लोक-४
१०९. सर्वशु., नमः शास्त्रिणे वीरधुर्याय तस्मै, श्लोक-२
११०. सर्वशु., नमः शास्त्रिणे वीरधुर्याय तस्मै, श्लोक-३
१११. सर्वशु., नमः शास्त्रिणे वीरधुर्याय तस्मै, श्लोक-६
११२. नेहरूं तं स्मरामो वयं सादरम्- श्लो-१
११३. नेहरूं तं स्मरामो वयं सादरम्- श्लो-७
११४. तत्रैव, श्लोक-१०
११५. नेहरूं तं स्मरामो वयं सादरम्, श्लोक-९
११६. नेहरूं तं स्मरामो वयं सादरम्- श्लो-१३
११७. तत्रैव, श्लोक-१२
११८. स्वतंत्रता संग्राम के अमर शहीद, डॉ. के.एल. जौहर, पृ.-२४१
११९. सर्वशु., तं सुभाषं स्मरामो वयं सादरम्, श्लोक-१
१२०. सर्वशु., तं सुभाषं स्मरामो वयं सादरम्, श्लोक-२
१२१. हमारे राष्ट्ररत्न, डॉ. लालबहादुरसिंह चौहान, पृ. १२३, १२४
१२२. सर्वशु., तं सुभाषं स्मरामो वयं सादरम्, श्लोक-४

१२३. सर्वशु., तं सुभाषं स्मरामो वयं सादरम्, श्लोक-५

१२४. तत्रैव, श्लोक-६

१२५. तत्रैव, श्लोक-७

१२६. सर्वशु., तं सुभाषं स्मरामो वयं सादरम्, श्लोक-८

१२७. तत्रैव, श्लोक-९

१२८. सर्वशु., तस्य स्मृतिर्जायते पुरुषोत्तमस्य, श्लोक-८, डॉ. रमाकान्तुशुक्लः।

१२९. तत्रैव, श्लोक-७

१३०. सर्वशु., स्मरामि ब्रह्मचारिणम्, श्लोक-७, डॉ. रमाकान्तुशुक्लः।

१३१. तत्रैव, श्लोक-१३

१३२. सर्वशु., स्मरामि ब्रह्मचारिणम्, श्लोक-१५, डॉ. रमाकान्तुशुक्लः।

१३३. सर्वशु., राजतां कालिदासः।

१३४. अभिज्ञानशाकुन्तलम्, महाकविः कालिदासः, मङ्गलपद्यम्।

१३५. सर्वशु., राजतां कालिदासः, डॉ. रमाकान्तशुक्लः, दे.पं., नई दिल्ली-२००८

१३६. सर्वशु., उज्जयिनीयं जयति, श्लोक-१०

१३७. तत्रैव, श्लोक-६

१३८. तत्रैव, श्लोक-७

१३९. विषुवत् रेखा का वासी जो, जीता है नित हाँफ-हाँफ कर,
रखता है अनुराग अलौकिक, फिर भी अपनी मातृभूमि पर।
हिमवासी जो हिम में तम मे, जी लेता है काँप-काँप कर,
वह भी अपनी मातृभूमि पर, कर देता है प्राण निछावर।।

१४०. सर्वशु., उज्जयिनीयं जयति, आचार्यरमाकान्तशुक्लः, दे.पं., नई दिल्ली।

१४१. तदेव

१४२. सर्वशु., उज्जयिनीयं जयति, श्लोक-११, आचार्य रमाकान्तशुक्लः, दे.पं., नई दिल्ली।

१४३. तदेव, श्लोक-१

१४४. तदेव, श्लोक-२

१४५. सर्वशु., राजस्थानम्, श्लोक-८, आचार्यरमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१४६. तदेव, श्लोक-५

१४७. तदेव, श्लोक-६

१४८. सर्वशु., राजस्थानम्, श्लोक-१६, आचार्यरमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१४९. सर्वशु., फिलाडेल्फिया, श्लोक-१२, आचार्य रमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१५०. सर्वशु., फिलाडेल्फिया, श्लोक-१७, आचार्यरमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१५१. तत्रैव, श्लोक-१६

१५२. तत्रैव, श्लोक-१९

१५३. सर्वशु., फिलाडेल्फिया, श्लोक-१०, १४ आचार्यरमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१५४. तत्रैव, श्लोक-२१

१५५. तत्रैव, श्लोक-१९, २०

१५६. सर्वशु., फिलाडेल्फिया, श्लोक-१०, आचार्यरमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१५७. सर्वशु., जाबालिपुरं चल, श्लोक-३, आचार्यरमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१५८. सर्वशुक्ला प्रास्ताविकम्, पृ.-६, आचार्यरमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१५९. सर्वशु., जाबालिपुरं चल, गीतिसंख्या-४, आचार्यरमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१६०. सर्वशु., जाबालिपुरं चल, गीतिसंख्या-६, आचार्य रमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१६१. धर्मक्षेत्रे कुरुक्षेत्रे, श्लोक-२

१६२. दैनिकजागरणनामवार्तापत्रे-२६.०७.२००८ तमे खैष्टाब्दे इयं वार्ता वर्तते। (द्रष्टव्यं दैनिकजागरणं २६.०७.२००८)

१६३. सर्वशु., धर्मक्षेत्रे कुरुक्षेत्रे, आचार्य रमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१६४. तत्रैव

१६५. तत्रैव

१६३. सर्वशु., धर्मक्षेत्रे कुरुक्षेत्रे, आचार्य रमाकान्तशुक्लः, दे.प्र., नई दिल्ली।

१६४. तत्रैव

१६५. तत्रैव

१६७. तुरीनो स्मृतिसपादशकम्, श्लोक- ४, सर्वशु.

१७०. सर्वशु., तुरीनो स्मृतिसपादशकम्, श्लोक- ५, ६

१७१. तदेव, श्लोक-७१

१७२. तदेव, श्लोक-३१-४०

१६८. तत्रैव, श्लोक-८, ९

१६९. सर्वशुक्ला, प्रास्ताविकम्, सर्वशु., पृ.-२७२, ३०८

१७०. सर्वशु., तुरीनो स्मृतिसपादशकम्, श्लोक- ५, ६,

१७१. तदेव, श्लोक-७१

१७२. तदेव, श्लोक-३१-४०

१७३. सर्वशु., तुरीनो स्मृति सपादशकम्, श्लोक-११९

१७४. धर्मक्षेत्रे-कुरुक्षेत्रे, रमाकान्तशुक्ल, देववाणीप्रकासनम्, नई दिल्ली।

१७५. पोलकहालस्थ, रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

१७६. तत्रैव

१७७. पोलकहालस्थटर्नरहाउसवातायनात् - आ. रमाकान्तशुक्लः, देववाणी परिषद्, नई दिल्ली।

१७८. पोलकहालस्थ, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।

१७९. तदेव

१८०. एडिबनरानगरोत्तमे, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।

१८१. तदेव

१८२. मेघप्रबोधनम्, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।

१८३. मेघप्रबोधनम्, श्लोक-४, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।

१८४. मेघप्रबोधनम्, श्लोक-९, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।

१८५. तदेव, श्लोकसंख्या-१२

१८६. मेघप्रबोधनम्, श्लोक-१७, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।

१८७. अकालजलद्, श्लोक-१, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।

१८८. अकालजलद्, श्लोक-२, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली।

१८९. तत्रैव, श्लोक-३

१९०. तत्रैव, श्लोक-५

१९१. अकालजलद्, श्लोक-६, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली।

१९२. सुभाषितरत्नभाण्डागारम्, सङ्कलकः- काशीनाथ पाण्डुरंगः, पृ. ५१-१७०, चौखम्बाप्रकाशनम्।
(अस्मिन् श्लोके पाठभेदोऽपि जायते प्रायशः तृतीय पादे)

१९३. स्वागतं पयोद ते, श्लोक-११, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।

१९४. तत्रैव, श्लोक-९

१९५. स्वागतं पयोद ते, श्लोक-७, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली।

१९६. स्वागतं पयोद ते, श्लोक-८, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली।
१९७. तत्रैव, श्लोक- १०
१९८. तत्रैव
१९९. स्वागतं पयोद ते, सर्वशुक्लोत्तरा, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।
२००. तत्रैव
२०१. तत्रैव
२०२. यजुर्वेदसंहिता, प्रकाशक-स्वाध्यायमण्डल, पारडी, २२/२२
२०३. उत्तरमङ्गलं, डॉ. रमाकान्तशुक्ल, देववाणीप्रकाशनम् नई दिल्ली
२०४. अर्वाचीन संस्कृत- २५/४, १५ अक्टूबर २००३, सम्पादकीयम्, पृ. १, सम्पादकः- रमाकान्तशुक्लः।
२०५. श्रावणमासे, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली।
२०६. तत्रैव
२०७. श्रावणमासे, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्लः, देववाणीप्रकाशनम् नई दिल्ली।
२०८. तत्रैव
२०९. श्रावणमासे, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नई दिल्ली।
२१०. तत्रैव
२११. तत्रैव
२१२. तत्रैव
२१३. सर्वशुक्लोत्तरा, किं जीवनं ते, श्लोक-१
२१४. सर्वशुक्लोत्तरा, किं जीवनं ते।
२१५. तदेव
२१६. यत्र मातापिताचार्य आराध्यते देवतेव प्रधीभिर्जनैस्सादरम्।
यत्र दुःखी दरिद्रोऽस्ति नारायणो भूतले भाति तन्मामकं भारतम्।।
दूरदर्शने प्रस्तुतं-भाति मे भारतम्, १२ भाग, रमाकान्तशुक्ल, देप्र, दिल्ली।
२१७. सर्वशुक्लोत्तरा-किं जीवनं ते, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली।
२१८. तत्रैव
२१९. तत्रैव
२१६. यत्र मातापिताचार्य आराध्यते देवतेव प्रधीभिर्जनैस्सादरम्।
यत्र दुःखी दरिद्रोऽस्ति नारायणो भूतले भाति तन्मामकं भारतम्।।
दूरदर्शने प्रस्तुतं-भाति मे भारतम्, १२ भाग, रमाकान्तशुक्ल, देप्र, दिल्ली।

२१७. सर्वशुक्लोत्तरा-किं जीवनं ते, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली।
२१८. तत्रैव
२१९. तत्रैव
२२३. सर्वशुक्लोत्तरा-किं जीवनं ते, श्लोक-३०, २९, रमाकान्तशुक्ल, देववाणीपरिषद्, नई दिल्ली।
२२४. तदेव, श्लोक-११, २२, २१
२२५. तदेव, श्लोक-३, ४, २३, २५
२२६. सर्वशुक्लोत्तरा-किं जीवनं ते, श्लोक-२, १५, रमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली।
२२७. सर्वशुक्लोत्तरा, आशा, पृ.-२००-२०४, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली।
२२८. तत्रैव
२२९. सर्वशुक्लोत्तरा-आशा, पृ.-२००-२०४, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली।
२३०. तदेव
२३१. सर्वशुक्लोत्तरा-आशा, पृ.-२००-२०४, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली।
२३२. तत्रैव
२३३. तत्रैव
२३४. तत्रैव
२३५. सर्वशुक्लोत्तरा-आशा, पृ.-२००-२०४, रमाकान्तशुक्ल, दे.प्र., नई दिल्ली।
२३६. मदीयकवितेकुरुष्वमानम्, सर्वशुक्लोत्तरा, श्लोक-१, रमाकान्तशुक्ल, देववाणीपरिषद्, नई दिल्ली।
२३७. तदेव, श्लोक-२
२३८. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। (मौखिकपरम्परायाः सूक्तिः)
२३९. उदुस्वानेनेभिरीत उद्रभेरुदु वायुभिः। उत्सायै पृश्निमातरः।। ऋग्वेदः (८/७/१७)
२४०. तदेव, श्लोक-२४
२४१. हिन्दीकविः मैथिलीगुप्तः कथयति- ''क्षुधार्थ रन्तिदेव ने दिया करस्थ भाल भी, तथा दधीचि ने दिया परार्थ अस्थि जान भी, दशीनर क्षितीश ने स्वमांश दान भी दिया सहर्षवीर कर्ण ने शरीरचर्म भी दिया। अनित्य देहके लिये अनादि जीव क्या डरे, वही मनुष्य है कि जो मनुष्य के लिये मरे।''
२४२. सर्वशुक्लोत्तरा, मदीयकवितेकुरुष्वगानम्, देववाणीप्रकाशनम्, नई दिल्ली।
२४३. तत्रैव
२४४. ''स कृषको गृहणीदययाहृतामपि निगीर्य गलेऽरस रोटिकाम्।
जल कणांश्च निपीय रजोञ्चितान् मुहुरहो! रमते कृषि कर्मणि।।''
सत्यनारायणशास्त्री भारतदिग्दर्शनमहाकाव्यम्, २-५४

२४५. सर्वशुक्लोत्तरा, मदीयकवितेकुरुष्वगानम्, श्लोक-१२, देववाणीप्रकाशनम्, नई दिल्ली।
२४६. सर्वशुक्लोत्तरा, मदीयकवितेकुरुष्वगानम्, श्लोक-८, देववाणीप्रकाशनम्, नई दिल्ली।
२४७. तत्रैव, श्लोक-४
२४८. पारम्परिकः श्लोकः
२४९. स्वप्नवासवदत्तं, महाकविभासः, प्रथमोङ्कः
२५०. सर्वशुक्लोत्तरा, विलसितं नियतं नियतेरिदं, श्लोक-७
२५१. तत्रैव, श्लोक-३
२५२. काव्यप्रकाशः, आचार्यमम्मटः, प्रथमोऽल्लासः, चौखम्बाप्रकाशनम्, वाराणसी।
२५३. सर्वशुक्लोत्तरा, विलसितं नियतं नियतेरिदं, श्लोक-५
२५४. तत्रैव, श्लोक-६
२५५. तत्रैव, श्लोक-१
२५६. सर्वशुक्लोत्तरा, वन्दनीयास्ते, श्लोक-१, रमाकान्तशुक्ल, देववाणीप्रकाशनम्, नई दिल्ली।
२५७. तत्रैव, श्लोक-४
२५८. पारिजातम्, २३/९, पृ. २०
२५९. वन्दनीयास्ते, सर्वशुक्लोत्तरा, श्लोक-४, ५, देववाणीप्रकाशनम्, नई दिल्ली-२००८
२६०. तदेव, श्लोक-३२
२६१. वन्दनीयास्ते, सर्वशुक्लोत्तरा, श्लोक-३२, देववाणीप्रकाशनम्, नई दिल्ली-२००८
२६२. तदेव
२६३. वन्दनीयास्ते, सर्वशुंक्लोत्तरा, , देववाणीप्रकाशनम्,, नई दिल्ली-२००८
२६४. वन्दनीयास्ते, सर्वशुक्लोत्तरा, श्लोक-३२, देववाणीप्रकाशनम्,, नई दिल्ली-२००८
२६५. वन्द्यतां काऽपि सा शासनासन्दिका, सर्वशुक्लोत्तरा, आचार्यरमाकान्तशुक्लः, देववाणीप्रकाशनम्,, नई दिल्ली।
२६६. तदेव
२६७. सर्वशुक्लोत्तरा, शासनासन्दिका, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
२६८. तदेव
२६९. तदेव
२७०. सर्वशुक्लोत्तरा, शासनासन्दिका, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
२७१. तदेव

२७२. सर्वशुक्लोत्तरा, शासनासन्दिका, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२७३. लोकतन्त्रेऽस्मिन्, आचार्यरमाकान्तशुक्लः, देववाणी परिषद्, नई दिल्ली-२००८

२७४. तदेव

२७५. तदेव

२७६. लोकतन्त्रेऽस्मिन्, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२७७. सभासु युध्यन्ति मिथः सदस्याः
क्षिप्त्वा क्रुधोपानह आसनानि।
जनाश्च मार्गेषु तदाचरन्ति
दूरे कियह के खलु सभ्यतायाः।। विप्रश्निका, २१

२७८. लोकतन्त्रेऽस्मिन्, श्लोक- १५, १६, १७ - आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२७९. तदेव, श्लोक-१८

२८०. इन्टरनेट द्रष्टव्यम् ।

२८१. तदेव, श्लोक-२५

२८२. लोकतन्त्रेऽस्मिन्, श्लोक- ३० - आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२८३. तदेव, श्लोक-३१, ३२

२८४. तदेव

२८५. लोकतन्त्रेऽस्मिन्, श्लोक- ३० - आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२८६. तदेव

२८७. लोकतन्त्रेऽस्मिन्, श्लोक- ३० - आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२८८. योऽयं कृतः शपथस्त्वया, (सर्वशुक्लोत्तरा) श्लोक-१, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२८९. मनस्यन्यद् वचस्यन्द् कर्मण्यन्यद् दुरात्मनाम्।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।।

२९०. योऽयं कृतः शपथस्त्वया, (सर्वशुक्लोत्तरा), आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२९१. योऽयं कृतः शपथस्त्वया, (सर्वशुक्लोत्तरा) श्लोक-१, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२९२. तदेव

२९३. तदेव

२९४. योऽयं कृतः शपथस्त्वया, (सर्वशुक्लोत्तरा) श्लोक-१, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२९५. धेनूनां तु शतं दत्त्वा यत् फलं लभते नरः।
तस्मात् पुण्यं कोटिगुणं प्रतिज्ञा पालने द्विजः।। पद्मपुराणम्, ३/२६/४

२९६. योऽयं कृतः शपथस्त्वया, (सर्वशुक्लोत्तरा) श्लोक-१, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२९७. सर्वशुक्लोत्तरा, किं कुर्यात्, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२९८. तदेव

२९९. सर्वशुक्लोत्तरा, किं कुर्यात्, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३००. तदेव

३०१. सर्वशुक्लोत्तरा, किं कुर्यात्, आचार्यरमाकान्तशुक्लः, देववाणी परिषद्, नई दिल्ली-२००८

३०२. तदेव

३०३. तदेव

३०४. सर्वशुक्लोत्तरा, किं कुर्यात्, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३०५. तदेव

३०६. तदेव

३०७. सर्वशुक्लोत्तरा, किं कुर्यात्, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३०८. तदेव

३०९. तदेव

३१०. सर्वशुक्लोत्तरा, किं कुर्यात्, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३११. तदेव

३१२. सर्वशुक्लोत्तरा, निर्वाचने प्राप्ते, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३१३. तत्रैव

३१४. सर्वशुक्लोत्तरा, निर्वाचने प्राप्ते, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३१५. तदेव

३१६. सर्वशुक्लोत्तरा, निर्वाचने प्राप्ते, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३१७. तत्रैव, श्लोक-८

३१८. सर्वशुक्लोत्तरा, निर्वाचने प्राप्ते, श्लोक-३, आचार्य रमाकान्तशुक्ल, देववाणीपरिषद्, नई दिल्ली-२००८

३१९. तत्रैव, श्लोक-११

३२०. सर्वशुक्लोत्तरा, निर्वाचने प्राप्ते, श्लोक-१६, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३२१. सर्वशुक्लोत्तरा, अभिनवहितोपदेशः, श्लोक-६, १०, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३२२. सर्वशुक्लोत्तरा, अभिनवहितोपदेशः, श्लोक-८, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३२३. सर्वशुक्लोत्तरा, अभिनवहितोपदेशः, श्लोक-२५, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३२४. तत्रैव, श्लोक-२८

३२५. तत्रैव, श्लोक-२४

३२६. सर्वशुक्लोत्तरा, अभिनवहितोपदेशः, श्लोक-३४, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३२७. तत्रैव, श्लोक-४२

३२८. सर्वशुक्लोत्तरा, अभिनवहितोपदेशः, श्लोक-४६, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३२९. सर्वशुक्लोत्तरा, परमाण्वनुबन्धः!, श्लोक-५, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३३०. तत्रैव, श्लोक-९

३३१. सर्वशुक्लोत्तरा, परमाण्वनुबन्धः!, श्लोक-१०, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३३३. सर्वशुक्लोत्तरा, परमाण्वनुबन्धः!, श्लोक-१०, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३३४. तदेव, श्लोक-१४

३३२. तदेव, श्लोक-७

३३५. सर्वशुक्लोत्तरा, मित्रतां कामये शात्रवं चाश्रये!, श्लोक-१, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३३६. सर्वशुक्लोत्तरा, मित्रतां कामये शात्रवं चाश्रये!, श्लोक-४, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३३७. तदेव, श्लोक-४

३३८. बस गृहभेदन का पाप न जो।
चाहे वह भारत जनता मैं।। भारतजनताऽहम्, श्लोक-२२ हिन्दी रूपान्तरणम्।

३३९. सर्वशुक्लोत्तरा, मित्रतां कामये शात्रवं चाश्रये!, श्लोक-३, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३४०. सर्वशुक्लोत्तरा; मित्रतां कामये शात्रवं चाश्रये!, श्लोक-8, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३४१. तदेव, श्लोक-१०

३४२. सर्वशुक्लोत्तरा, मित्रतां कामये शात्रवं चाश्रये!, श्लोक-१२, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३४३. सर्वशुक्लोत्तरा, भावसन्धिः, श्लोक-१, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३४४. तदेव, श्लोक-४

३४५. सर्वशुक्लोत्तरा, योऽयमातङ्कवादः, श्लोक-१, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३४६. सर्वशुक्लोत्तरा, महाकुम्भे, श्लोक-७, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३४७. सर्वशुक्लोत्तरा, महाकुम्भे, श्लोक-१२, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३४८. तदेव, श्लोक-१६

३४९. सर्वशुक्लोत्तरा, कविसम्मेलनप्रस्तावना, श्लोक-९, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८

३५०. सर्वशुक्लोत्तरा, वन्दे कविपरम्पराम्, श्लोक-१२, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३५१. तदेव, श्लोक-२४

३५२. सर्वशुक्लोत्तरा, मम तथा विहगदम्पत्योर्विदेशयात्रा, आचार्यरमाकान्तशुक्ल, देववाणीपरिषद्, नई दिल्ली-२००८

३५३. सर्वशुक्लोत्तरा, अपहृतविमाने, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३५४. तदेव

३५५. काव्यप्रकाशः, आचार्यो मम्मटः

३५६. सर्वशुक्लोत्तरा, मातरं प्रति पुत्रस्य जङ्गमभाषसन्देशः, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३५७. सर्वशुक्लोत्तरा, पुनर्नो भारते भूयात्, श्लोक-७, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३५८. तदेव, श्लोक-११

३५९. सर्वशुक्लोत्तरा, पुनर्नो भारते भूयात्, श्लोक-१६, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३६०. Noida Serial Murders. en.m. Wikipedia.org/wiki/ Noida-serial murders.

३६१. सर्वशुक्लोत्तरा, मधुपवृत्तिः, श्लोक-९, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३६२. सर्वशुक्लोत्तरा, मधुपवृत्तिः, श्लोक-१, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३६३. तदेव, श्लोक-११

चतुर्थोऽध्यायः

सर्वशुक्लोत्तरायाः काव्यशास्त्रीयं विवेचनमम्

४.१ अलङ्कारयोजना

अलङ्काराणां सर्वप्रथमम् उल्लेखो भरतकृते नाट्यशास्त्रे प्राप्यते। तत्र यमक-उपमा-रूपक-दीपकानीति चत्वारोऽलङ्कारा निर्दिश्यन्ते। अग्निपुराणे १५ अलङ्काराः, वामनकृते काव्यालङ्कारसूत्रे ३३ अलङ्काराः, दण्डिकृते काव्यादर्शे ३५ अलङ्काराः, रुद्रटकृते काव्यालङ्कारे ५२ अलङ्काराः, भामहकृते काव्यालङ्कारे ३९ अलङ्काराः, उद्भटकृते काव्यालङ्कारसारसङ्ग्रहे ४१ अलङ्काराः, मम्मटकृते काव्यप्रकाशे ६७ अलङ्काराः, विश्वनाथकृते साहित्यदर्पणे ८४ अलङ्काराः, जयदेवकृते चन्द्रालोके १०० अलङ्काराः, अप्पयदीक्षितकृते कुवलयानन्दे १२४ अलङ्काराः, पण्डितराजजगन्नाथकृते रसगङ्गाधरे १८० अलङ्काराः विविच्यन्ते। एवं क्रमशोऽलङ्काराणां वृद्धिर्लक्ष्यते।

अलङ्करोतीति अलङ्कारः, अलङ्क्रियतेऽनेनेति वा अलङ्कारः उभयथापि अलङ्करणसाधनम् अलङ्कार इति वक्तुं शक्यते। न केवलं संस्कृतसाहित्ये सर्वत्राऽपि अलङ्काराणां महन्महत्त्वं विद्यते। न कान्तमपि निर्भूषं विभाति वनिताननम् इति भणितिविशिष्टेन यथा गुणगौरवसम्पन्नाऽपि वनिता साङ्लकारैव शोभते तथैव रसपाकपरिपुष्टेऽपि काव्ये-शब्दार्थयोः सौन्दर्यं भवति अलङ्कारः। अलङ्काराः न केवलं सौन्दर्यवर्धकाः अपितु काव्ये चमत्कृतिमपि आदधति। सैव चमत्कृतिः क्वचित् उपमादिरूपेण, क्वचित् अतिशयोक्त्या, क्वचिच्च शब्दसाम्यमूलकेन अनुप्रासेन द्योत्यते। यद्यपि काव्यात्मरूपेण अलङ्काराणां महत्त्वं नास्ति तथापि शब्दार्थशरीरस्य बाह्यसौन्दर्यवर्धनेन रसादीनपि पोषयन्ति। यथा शरीरे वस्त्रादीनां महत्त्वं तथैव काव्ये अलङ्काराणाम्। अलङ्काररहिता

नारी यथा न शोभते तथैवालङ्कारहीनं काव्यम्। अग्निपुराणेऽपि उद्घोषितम् - **'अर्थालङ्काररहिता विधवैव सरस्वती'**। अलङ्कारतत्त्वज्ञ आचार्यो दण्डी काव्यादर्शे लक्षयति -

काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते[1]

ध्वनिप्रस्थापनपरमाचार्यः मम्मटः अलङ्कारं लक्षयति -

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥[2]

आचार्यविश्वनाथानुसारम् अलङ्कारा: अङ्गदादिवत् शब्दार्थयोः शोभावर्धकाः रसादीनां चोपकर्त्तारः, प्रसादादिगुणवत् इमे न उपेक्षणीयाः, अतएव ते अस्थिराः धर्मा उच्यन्ते -

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥[3]

काव्यशोभाजनकानां गुणानाम् अतिशयसम्पादने साधनीभूतानाम् अलङ्काराणां महत्त्वं जायत एव। ध्वनिवादिन आनन्दवर्धन-मम्मटादय अलङ्काराणां महत्त्वं न स्वीकुर्वन्तोऽपि प्रकारान्तरेण अलङ्काराणां सत्तां स्वीकुर्वन्त्येव - यथा

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि[4]

अलङ्कारसर्वस्वस्य निर्माता रुय्यकः अलङ्कारविभाजनं सप्तधा करोति -

१. सादृश्यमूलकाः
२. विरोधमूलकाः
३. क्रममूलकाः/शृंखलाबन्धमूलकाः
४. न्यायमूलकाः
५. कारण-कार्य-सम्बन्धमूलकाः
६. निषेधमूलकाः
७. गूढार्थप्रतीतिमूलकाः

आचार्यमम्मटः अलङ्कारान् द्विधा विभाजयति शब्दालङ्कार-अर्थालङ्कारभेदाभ्याम्, श्लेषालङ्कारः उभयथाऽपि विभज्यते शब्दश्लेषः अर्थश्लेषश्चेति।

आचार्यरमाकान्तशुक्लविरचितेऽस्मिन् सर्वशुक्लोत्तराकाव्यसङ्ग्रहे अलङ्काराणां स्थितिः आह्लादं जनयति, काव्यसङ्ग्रहेऽस्मिन् कविना अनुप्रासस्तु प्रतिपदं प्रयुक्तः। संक्षेपेण अस्मिन् प्रसङ्गे सर्वशुक्लोत्तरायाम् अलङ्काराणां स्थितिः विविच्यते।

कविवरवाणीषु तदुपकारकतया यथा रसादिभावनाभावितचेतसां चमत्कारोल्लासपराः शब्दार्थाः अहमहमिकया परापतन्ति तद्वदेव शब्द-द्वारेणोपस्कारकाः अनुप्रासयमकश्लेषादयः शब्दालङ्काराः अर्थद्वारेण उपकुर्वन्तः अर्थालङ्कारा उपमारूपकोत्प्रेक्षाविरोधादयोऽप्यसकृदुल्लसन्ति। यथा हि सहस्रशो हि अलङ्कारप्रकाराः कवितल्लजानां काव्येषु चमत्कृतिमातन्वन्ति तथाऽपि न ते सर्वेऽपि पूर्वाचार्यपरम्परायामुन्नीता एव अपितु बहवः उन्नेतव्या अपि।[५]

आचार्याणाम् आधुनिककविमण्डलमण्डनानां श्रीरमाकान्तशुक्ल-महोदयानां काव्येष्वपि स्वाभाविकरीत्या परापतितानाम् अयत्नासादित-चमत्कृतीनामलङ्काराणां शोभा अपूर्वैमेव प्रतिभासते। अञ्जसात्र केषाञ्चित् स्फुटप्रतिभासमानानामलङ्काराणां दिङ्मात्रनिदर्शनं विधीयते।

अनुप्रासच्छाया – रसानुकूल्येन वर्णानां प्रकृष्टतया न्यासः अनुप्रासः। अनुप्रासः यद्यपि सर्वत्र प्राप्यते तथापि विशिष्टचमत्कारजनकतया पदबन्धेषु अनुप्रासच्छटा कविवरशुक्लस्य वैशिष्ट्यम्, यथा 'मालाधरां पुस्तकधरां' इत्यत्र अनुप्रासच्छटा हृदयाह्लादिका। आचार्यविश्वनाथानुसारम् अनुप्रासलक्षणम्।

तद्यथा –

"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्"[६] अनुप्रासः पञ्चधा भवति, छेकानुप्रासः वृत्त्यनुप्रासः, श्रुत्यनुप्रासः, अन्त्यानुप्रासः लाटानुप्रासश्चेति।

छेकानुप्रासः

छेकश्छेकानुप्रासः। कविवरशुक्लस्य प्रथमकवितायामेव छेकानुप्रासच्छटा दृश्यते तद्यथा –

यस्याः स्मरणमात्रेण पुम्भिर्लभ्यते ज्ञानप्रभा
यस्याः कृपालवलेशतः सुलभा शुभा वाचो विभा।
शब्दार्थगुणवृत्तिपदां रीतिप्रदां रसदायिनीम्
ध्वन्यौचितीवक्रोक्तिदां वाणीं वयं वन्दामहे॥[७]

अत्र कृपालवलेशतः, सुलभा शुभा, वृत्तिपदां रीतिप्रदां इति व्यञ्जनानां बहूनां सकृदावृत्तिः छेको विदग्धस्तत्प्रयोजकत्वादेव छेकानुप्रासः।

वृत्त्यनुप्रासः - यत्र एकधा स्वरूपत एव न तु क्रमतोऽपि। अनेकधा स्वरूपतः क्रमतश्च आवृत्तिः भवति चेत् वृत्त्यनुप्रासः, सर्वशुक्लोत्तरायां सुरभारती विजयते इत्यत्र -

"**सौमिल्लभासहासा सुरभारती विजयते**"[८], सौमिल्ल 'भासहास' इत्यस्य सकारस्य आवृत्तिः वृत्त्यनुप्रासं द्योतयति।

अन्त्यानुप्रासः - यत्र पादान्ते सस्वरव्यञ्जनं समानं भवति तत्र अन्त्यानुप्रासः जायते, कविवरशुक्लस्य काव्येषु अन्त्यानुप्रासस्य छटा प्रतिपदं दृष्टिपथं समायाति, दिङ्मात्रमुदाह्रियते -

तत्त्वं विचारयन्ती ज्ञानं प्रचारयन्ती।
चित्तं विकाशयन्ती सुरभारती विजयते।।[९]

यथा वा -

निगमागमाकृतिधारिणीं सच्छास्त्रचिन्तनरूपिणीम्।
विज्ञानदर्शन-साहिती-भाषा-विभाषा-रूपिणीम्।।[१०]

विरोधालङ्कारः - कवेरेतेषु स्फुटकाव्येषु विरोधालङ्कारच्छटाऽपि शोभातिशयं पुष्णाति। यथा मधुपवृत्ति कवितायाः प्रथमे पद्ये-

नानाप्रसूनकलिकासु मुदा मिलिन्दः
कृष्णोऽपि रक्तमनसा भ्रमिमातनोति।
सत्यं वदन्ति कवयो नहि चञ्चलानां
काऽपि स्थितिः सुरुचिरा भवतीह लोके।।[११]

वस्तुगत्या विरोधाभावेऽपि द्वयोर्वस्तुनो विरोधप्रतिभासप्रयोजकरूपेण यदभिधानं सः विरोधालङ्कारस्य विषयः। यदुक्तम्। - "विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः[१२]" अयं विरोधालङ्कारः जातिगुणक्रियाद्रव्यात्मकानां पदार्थानां परस्परं दशधा विरोधस्य सत्त्वात् दशधा भवति। अत्र हि उदाहृते पद्ये कृष्णवर्णस्य रक्तवर्णतया प्रतिभासः परस्परं गुणयोर्विरोधः। परमेकत्र मिलिन्दवपुराश्रितः कृष्णवर्णः रक्तता रागानुरागभावरूपेति विरोध-परिहारादलङ्कारता। यथा वा-

अभिमानधना विनयोपेता शालीना भारतजनताहम्।
कुलिशादपि कठिना कुसुमादपि सुकुमारा भारतजनताहम्।।[१३]

अत्र या जनता कुसुमादपि सुकुमारा सा जनता दुःखसहिष्णुत्वतया दुःखपरिवहने वा कुलिशादपि कठोरा जाता अतः विरोधः परिलक्ष्यते इयं भारतजनता विशिष्टगुणसमलङ्कृता दुःखपरिवहने कठोरा परं हृदयेन सुकुमारा एव।

उदात्तालङ्कारच्छटा - संपदादिवस्त्वतिशयवर्णनमुदात्तं, यदुक्तम् - "**वस्तुप्रचय उदात्तं महतामङ्गत्ववचनं वा**"[१४] कविवररमाकान्तशुक्लस्य कवितासु उदात्तालङ्कारच्छटा बहुषु स्थलेषु चमत्करोति। उज्जयिनीयं जयति, राजस्थानम् इत्यादि शीर्षकान्वितासु कवितासु उदात्तालङ्कारच्छटा कवेः काव्यशोभां वर्धयति। दिङ्मात्रमुदाह्रियते -

हारास्तारास्तरला गुटिका भाण्डसमूहाः भव्याः
पुष्पस्तवकाः शेखरहारा माला नव्या नव्याः।
.......यत्राद्याप्यविरतं हरन्ति प्रेक्षावतां सुचित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।।[१५]

इत्यत्र उज्जयिन्याः नगरशोभायाः अतिशयवर्णनेन यथा - हारास्तारास्तरला गुटिका, भव्याः भाण्डसमूहाः नव्या नव्याः मालाः, इत्यादि उदात्तालङ्कारच्छटा हृदयाह्लादिका वर्तते। यथा च -

रविकरचुम्बितकमलविकासैः मदकलसारसनादैः
मालविकानां सुमधुरहासैः विबुधशिरोमणिवादैः।।[१६]

इत्यत्र रविकरचुम्बनेन विकसितपद्मानां शोभा, मदकलसारसनादशोभया च उज्जयिनी विलसतीति लोकातिशयवर्णननेन उदात्तालङ्कारस्य विषयः।

दीपकम् - 'दीप इव दीपकम्' 'संज्ञायां कन्', दीपयतीति दीपकम्, दीपस्यैकस्यैव सकलप्रकाशकत्वादेकत्वस्यैव सर्वे समन्वयबोधजनकत्वेन तत्साधर्म्यादित्यर्थः। यत्र कार्यसिद्धये अनेकाः क्रियाः एकं कारणम्प्रति गच्छन्ति अर्थात् अनेकाः क्रियाः कार्यसिद्धये हेतुभूताः भवन्ति चेत् दीपकालङ्कारस्य विषयः। यदुक्तम्

अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते।
अथ कारकमेकं स्यात् अनेकासु क्रियासु चेत्।।[१७]

कविवरशुक्लस्य काव्येष्वपि दीपकालङ्कारच्छटा बहुषु स्थलेषु चमत्करोति। 'उज्जयिनीयं जयति', 'भारतजनताहम्', निर्वाचने प्राप्ते-इत्यादि शीर्षकान्वितासु कवितासु दीपकालङ्कारशोभा नितरां हृद्या वर्तते। दिङ्मात्रमुदाह्रियते। -

विहरति विहसति विलसति नृत्यति या मानसे न केषाम्?
सुखयति मदयति रमयति रसयति या मानसं न केषाम्?
सरसा सरसा मुग्धोदारा या राजते समेषाम्।
शुभदा सुखदा वरदादरदा या राजते समेषाम्।।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्[१८]

इत्यत्र बुधजनवन्द्यायाः उज्जयिन्याः शोभावर्णनार्थं विहरति, विहसति विलसति, नृत्यति, सुखयति, मदयति, रसयति, रमयति इत्यादीनां क्रियापदानां प्रयोगः दीपकालङ्कारस्य विषयः, उपर्युक्तानां क्रियाणां सम्बन्धः उज्जयिन्याः शोभया सह वर्तते।

विषमालङ्कारशोभा - आचार्यरमाकान्तशुक्लमहोदयस्य काव्येषु विषमालङ्कारच्छटा स्फुटतया द्रष्टुं शक्यते। यत्रात्यन्तं विलक्षणभूतयोः परस्परसंबन्धेनानुपपद्यमानः प्रतीयते सः विषमालङ्कारस्य विषयः। यदुक्तम् -

संबन्धानुपपत्तौ इष्टार्थानाप्त्यनिष्टसंप्राप्तौ।
जन्यजनकोभय गुणक्रिया विरोधे च विषमः स्यात्।।[१९]

आचार्यशुक्लस्य कवितासु विषमालङ्कारः चमत्करोति। कवेः भारतजनताहम्, लोकतंत्रेऽस्मिन् सदृशेषु काव्येषु विषमालङ्कारच्छटा नितरां आनन्दोत्पादयति- तद्यथा-

ज्वालामुखिनं गिरिमारूढं परमाणुदैत्यविकलितचित्तम्।
अधुनापि जगच्छान्तिं ब्रूते या सैषा भारतजनताहम्।।[२०]

इत्यत्र ज्वालामुखिगिरेः शिरसि उपविश्यापि शान्तिस्थापनाय कृतप्रयासा भारतीयजनता किञ्च परमाणुदैत्यविकलचित्तस्वरूपताजनता जगच्छान्तिं ब्रूते इत्ययं विषमालङ्कारस्यविषयः। वस्तुतः परमाण्वातङ्कादि अशान्तिं सोढ्वाऽपि इयं जनता विश्वशान्तये प्रयतते इत्यलङ्कारता। यथा वा

विधुन्तुदचन्द्रयोः प्रीतिः पयोजम्बीरयोः प्रीतिः।
अजानां कौटिकैः प्रीतिर्विलोक्या लोकतंत्रेऽस्मिन्।।[२१]

इत्थं कविवरशुक्लस्य काव्येषु बहुषु स्थलेषु विषमालङ्कारस्य स्फुटतया प्रतीतिः जायते विस्तरभयात् दिङ्मात्रमेवोदाहृतम्।

समासोक्तिः - संक्षिप्ता उक्तिः समासोक्तिः। यत्र प्रस्तुतवर्णनेन, समानार्थ- संसूचकैर्विशेषणैः अप्रस्तुतस्य बोधो जायते तत्र समासोक्तिरलङ्कारः भवति। यदुक्तम् -

''विशेषणार्थकपदमात्रवृत्तिश्लेषसामर्थ्यादप्रस्तुतार्थबोधः''[२२]

समासोक्तिं लक्षयति अलङ्कारसर्वस्वकारः **''विशेषणानां साम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः''**[२३]

आचार्यरमाकान्तशुक्लवर्याणां काव्येष्वपि समासोक्तेरलङ्कारस्य शोभा बहुषु स्थलेषु चमत्कारजनिता वर्तते। मधुपवृत्ति शीर्षकान्वितायां कवितायां समासोक्तेरलङ्कारस्य छटा दिङ्मात्रं प्रस्तूयते। तद्यथा -

एकां निपीय सरसां सुरसाञ्च रम्यां
भूयो भ्रमन् कुसुमितां समुपैति वल्लीम्।
तृप्तिं न पश्यति तथापि क्वचिन् मिलिन्दः
स्वीयां रतिं प्रशिथिलां प्रदिशन् वराकः।।[२४]

इत्यत्र सरसां, सुरसां, रम्यां वल्लीञ्चेत्यादीनां श्लिष्टविशेषणमहिम्ना नायकव्यवहारप्रतिप्रत्तिः। कविना मिलिन्दस्य व्याजेन दुर्वासनापरिपूरितनायकस्य वर्णना समाचरिता। किञ्च -

दुर्वृत्त-रीति-कलिता विषयाऽनुरक्ताः
सक्ताः परत्र न कदापि सुखं लभन्ते।
एते हि चञ्चलहृदो ननु चञ्चरीका
नैकां भजन्ति कलिकां परितो भ्रमन्तः।।[२५]

इत्यत्राऽपि नैकां कलिकां इत्यनेन, चञ्चलहृदः इत्यनेन च अप्रस्तुतार्थबोधः।

परिकरालङ्कारच्छटा - विशेषणे साभिप्राये सति परिकरः अलङ्कारः भवति **''विशेषण- साभिप्रायत्वं परिकरः**[२६]**''** प्रकृतार्थस्योपकारको भवति

परिकरः। कवेः स्फुटकाव्येषु परिकरालङ्कारच्छटाऽपि बहुषु स्थलेषु सहृदयान् आनन्दयति दिङ्मात्रमुदाह्रियते विस्तरभयात्-

पीत्वा रसं-नव-सुधा-मधुरं मदीयं
कुत्र प्रयासि वद सत्यमये मिलिन्द!
मालिन्यमेव वपुषो मनसश्च तेऽत्र
जानेऽधुनेति कलिका विललाप काऽपि[२७]

इत्यत्र 'मालिन्यम्' इति मिलिन्दस्य वपुषः साभिप्रायं विशेषणं विद्यते। कलिकायाः मधुररसं निपीय तां त्यक्त्वा क्वचिदन्यत्र गच्छति इत्यत्र तस्य मलिनता साभिप्राया।

आक्षेपालङ्कारयोजना - सर्वशुक्लोत्तरायां कवेः स्फुटकाव्येषु आक्षेपालङ्कारशोभा काव्यशोभां विवर्धयति। आक्षेपो नाम निषेधः। वक्तुं प्रारब्धस्यापि विशेषद्योतनार्थं यो निषेधः स आक्षेपः। आक्षेपं लक्षयति काव्यप्रकाशकारः-

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधाः मतः[२८]**॥**

वक्ष्यमाणविषयः उक्तविषयश्चेति द्विविधोऽयमलङ्कारः। आचार्यशुक्लेन अभिनवहितोपदेशशीर्षकान्वितायां कवितायां आक्षेपेण स्वीयकथनं प्रस्तावितम्, तद्यथा-

बलात्कृतिं त्वं चर दानवोचिताम् पुनश्च हत्यां कुरुतादनागसाम्।
तथा च कृत्वापहृतीर्धनी भव तदास्तु चर्चा तव वृत्तपत्रके॥[२९]

किञ्च-

सुतानुजाभ्यां सह दुष्कृतिं कुरु न लज्जितस्त्वं भव कैमरान्तिके।
स्वदेशनिन्दां कुरु वा सडिण्डिमं तदास्तु चर्चा तव पुत्र माध्यमे॥[३०]

इत्यत्र बलात्कारादिकुकृत्यानां सम्पादनेन वार्तापत्रेषु तव चर्चा इति आक्षेपः। द्वितीये च पद्ये - दुष्कृत्यसम्पादनेनाऽपि कैमरान्तिके न लज्जितो भवतु किञ्च स्वदेशनिन्दादि दुष्टतापूर्णकृत्ये नैव ते चर्चा, इति जनकस्य पुत्रमाध्यमेन समाजम्प्रति आक्षेपः।

विशेषोक्तिरलङ्कारः - विद्यमाने कार्येऽपि यत्र कार्याऽभावः तत्र

विशेषोक्तिरलङ्कारः -

मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः।

यदुक्तम्

विशेषोक्तिरखण्डेषु कारणेषु फलावचः।।[३१]

कविवरस्य 'अभिनवहितोपदेशः' शीर्षकान्वितायां कवितायां विशेषोक्तेः शुद्धस्फुटतया प्रयोगः वर्तते। अन्यास्वपि कवितासु अयमलङ्कारः काव्यसङ्ग्रहस्य शोभां चमत्करोति। - दिङ्मात्रमुदाह्रियते -

अपापठं शास्त्रचयं दिवानिशम् अजेजयं विज्ञसभासु नैकदा।
अजोवहं यज्ञमहं यथाविधि यशस्यमास्ते न तथापि मे कृतम्।।[32]

अस्मिन् श्लोके - दिवानिशं शास्त्रचर्चया, विज्ञसभासु जयं प्राप्य चेत्यादि कारणेष्वपि यशःप्राप्तिरूपकार्यस्याभावः विशेषोक्तेः विषयः। कारणेषु विद्यमानेष्वपि कार्यस्याकथनं विशेषोक्तिः।

उपमालङ्कारयोजना - अर्थालङ्कारेषु उपमालङ्कारः सर्वप्रमुखः मन्यते। अलङ्कारस्यास्योपस्थितिः प्रायशः सर्वेष्वलङ्कारेषु भवति अतः उपमा सर्वेषामलङ्काराणां मूलं विद्यते। अयमलङ्कारस्तु कविकुलजननीरूपेण ख्यातिं गतः[३३]। उपमानोपमेययोः यत्र साधर्म्यं तत्रोपमालङ्कारः यदुक्तम् - **'साधर्म्यमुपमा भेदे'**[३४], पूर्णा लुप्ता चेति भेदाभ्यामुपमा द्विविधा जायते।

कविवररमाकान्तशुक्लस्य कवितासु स्फुटास्फुटतया उपमालङ्कारच्छटा प्रतिकवितां विद्यते। 'उज्जयिनीयं जयति' इत्यत्र कवेः उपमा चमत्कारमुत्पादयति। तद्यथा-

कामकामिनोऽभिमतं स्थानं नवलविलासोल्लसितम्
मोक्षार्थिनो महाकालेशं ज्योतिर्लिङ्गं प्रथितम्।
क्षीरसागरं यान्ति च रसिका नद्यो यथा समुद्रम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।।[३५]

इत्यत्र तृतीये पादे उपमालङ्कारः विद्यते। रसिकः उपमेयपदम्, नदी उपमानम्, उद्विग्नता-साधारणधर्मः, यथा वाचकशब्दः, पूर्णोपमायाः विषयाः। यथा वा -

जलबुद्बुदसङ्काशाः कति नो संस्कृतयो लुप्ताः संसारे।
गङ्गाप्रवाह इव सनातनी गतिशीला भारतजनताऽहम्।।[३६]

अस्मिन् श्लोके उपमालङ्कारस्य चत्वारि अङ्गानि विद्यन्ते। भारतजनता उपमेयपदम्, गङ्गाप्रवाह उपमानपदम्, सनातनी गतिशीलता च साधारणधर्मौ, इव वाचकपदं विद्यते। अतोऽत्र पूर्णोपमायाः चमत्कारः काव्यम् उत्तमोत्तमं कुरुते।

श्लेषालङ्कारः - एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोऽर्थः स श्लेषः। **श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत्**[३७] श्लेषालङ्कारः उभयालङ्कारेषु परिगण्यते। शब्दश्लेष अष्टधा वर्णितः आचार्यमम्मटेन। -

वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः।
शिलष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा।।[३८]

कविवरशुक्लस्य काव्येषु श्लेषालङ्कारच्छटाऽपि पाठकान् आनन्दयति। दिङ्मात्रं यथा-

शिप्रास्थानं यत्र धर्मिणः कलिमलदारणनिपुणम्
मोक्षार्थिनो महाकालेशं ज्योतिर्लिङ्गं प्रथितम्।
क्षीरसागरं यान्ति च रसिका नद्यो यथां समुद्रम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्यानित्यम्।।[३९]

इत्यत्र-'क्षीरसागर'पदं शिलष्टं वर्तते क्षीरसागरनामकं कालिदाससमारोहाङ्गभूत- सांस्कृतिककार्यक्रमायोजनस्थलं द्वितीयं च क्षीरसागरनामाब्धिः।

व्याजस्तुतिः - व्याजेन स्तुतिर्व्याजरूपा वा स्तुतिरिति व्याजस्तुतिः। कविवर- रमाकान्तशुक्लस्य 'कुरुक्षेत्रे मशकदंशतो रक्षा' शीर्षकान्वितायां रचनायां व्याजस्तुतिरलङ्कारस्य शोभा चमत्कुरुते -

कुरुक्षेत्रमशकस्य स्नेहः किमिव प्रकाशनीयः स्यात्।
यः सद्य एव दूरादागतमतिथिं परिष्वजते।।[४०]

अस्मिन् पद्ये कुरुक्षेत्रस्य मशकदंशस्य स्तुत्या वर्णनं विहितम्, कुरुक्षेत्रमशकस्य स्नेहः दूरादागतातिथिं सद्य एव परिष्वजते इति निन्दावर्णनं स्तुतिमुखात् व्याजस्तुतिं लक्षयति।

कविवरशुक्लस्य काव्येषु प्रायशः सर्वेऽपि अलङ्काराः विद्यन्ते। शब्दालङ्काराः, अर्थालङ्काराः, कवेः काव्यशोभां द्विगुणितां कुर्वन्ति, यमकालङ्कारच्छटा अनेकत्र चमत्करोति, अनुप्रासस्तु प्रतिपदं विद्यते। यमकालङ्कारस्तावत् -

धनस्य वा श्रमस्य वा न कृच्छ्रतास्ति भारते
समस्तधातवो मिलन्ति भारते प्रभारते[४१]

इत्यत्र 'भारते प्रभारते' यमकालङ्कारस्य विषयः।

इत्थं सर्वशुक्लोत्तरायां अलङ्कारयोजना बहुविस्तृता वर्तते। कवेः काव्यसङ्ग्रहे प्रतिपदं प्रतिकविताम् अलङ्कारच्छटा हृदयावर्जिका विद्यते। काव्यसङ्ग्रहस्य चतुःषष्टि कवितासु विविधाः अलङ्काराः काव्यशोभां चतुर्गुणितं कुर्वन्ति। अत्रास्माभिः अनुप्रास-यमक-श्लेष-उपमा-रूपक-विरोध-उदात्त-दीपक-समासोक्ति-विषम-परिकर-साक्षेप-विशेषोक्ति- व्याजस्तुतीनामलङ्काराणां यथामति प्रदर्शनं विहितम्। कवेः काव्यसङ्ग्रहः अलङ्कारदृशा बहुसमृद्धः इति वक्तुं शक्यते। उपुर्यक्ताः अलङ्काराः स्फुटरूपेण सर्वशुक्लोत्तरां चमत्कुर्वन्ति।

४.२ छन्दोयोजना

'छदिर्संवरणे' इत्यनेन संवरणोर्थे, छदि आच्छादने धातोः छन्दस्शब्दः निर्मीयते। यथा वैदिकमन्त्राणामुच्चारणज्ञानाय छन्दोज्ञानमावश्यकं तथैव कविकर्मसम्पादनेऽपि कवेः छन्दोज्ञानमावश्यकं स्वीक्रियते विज्ञैः। छन्दोज्ञानं विना कविता कर्तुं नैव शक्यते। छन्दो वैदिकलौकिकभेदाभ्यां द्विविधं जायते, लौकिकमपि छन्दः वर्णिक-मात्रिकभेदाभ्यां पुनः द्विविधं भवति, यस्मिन् छन्दसि पादस्थानां वर्णानां संख्या गण्यते तत् वर्णिकच्छन्दः।

यत्र मात्रा गण्यन्ते तन्मात्रिकं छन्दः। वेदाङ्गेषु परिगणितं छन्दः शास्त्रं वेदपुरुषस्य पादौ वर्तते येन विना गमनक्रिया एव न जायते-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥[४२]

सर्वशुक्लोत्तरायां कवेः छन्दःशास्त्रस्य विपुलज्ञानात् परिचयो जायते, कवेः छन्दोयोजना भावानुगुणं विषयानुगुणञ्च वर्तते। सर्वशुक्लोत्तरायाः पठनेन ज्ञायते यत् न केवलं कवि संस्कृतच्छन्दांसि जानाति अपितु हिन्दी-उर्दू-छन्दसामपि प्रयोगनिपुणः वर्तते।

सर्वशुक्लोत्तरायां हिन्दीसंस्कृतउर्दूच्छन्दसां प्रयोगः कविना कृतः। सर्वप्रथमं संस्कृतच्छन्दोयोजना प्रस्तूयते-

संस्कृतच्छन्दांसि

स्रग्विणी-छन्दः - सर्वशुक्लोत्तरायां स्रग्विणीछन्दसः प्रयोगः प्राचुर्येण प्राप्यते, वेदवाणीं नुमः, रौति ते भारतम्, फिलाडेल्फिया, नेहरू तं स्मरामो वयं सादरम्। उत्तरमङ्गलम्, वन्द्यतां काऽपि सा शासनासन्दिका, योऽयमातङ्कवादः, तुरीनोस्मृतिसपादशतकम्, मित्रतां कामये शात्रवं चाश्रये, दीपमालादिकविताः स्रग्विणी-छन्दसि रचितास्सन्ति। 'तुरीनो स्मृति सपादशतकम्' कवितायां बहूनां छन्दसां प्रयोगो वर्तते तेषां विवरणं तत्तद् प्रसङ्गे प्रदास्यते। स्रग्विणी छन्दसः लक्षणं तद्यथा-

''**रैश्चतुर्भिर्युता स्रग्विणी सम्मता**' यस्मिन् काव्ये श्लोके वा एकस्मिन् पादे रगणचतुष्टयं भवति तत्र स्रग्विणी छन्दः भवति। उदा.-

जन्मजन्मान्तरीयं स्वकीयं परं,
वैरभावं परित्यज्य यस्या वशात्।
एकतां यान्ति नेतार एकक्षणे,
वन्द्यतां काऽपि सा शासनासन्दिका॥

चामरम् - आचार्यरमाकान्तशुक्लेन सर्वशुक्लोत्तरायां प्रसिद्धाऽप्रसिद्धानां छन्दसां प्रयोगः कृतः तानि च छन्दांसि सर्वशुक्लोत्तरायाः कवितासु दृग्गोचरीक्रियन्ते। तादृशमेव किञ्चित् छन्दः चामरं नामकम्। चामरच्छन्दसि रगण, जगण, रगण, जगणरगणाः प्रत्येकस्मिन् पादे भवन्ति। इदमेव छन्दः तूणकमित्यपि व्यपदिश्यते। तल्लक्षणं यथा-

तूणकं समानिकापदद्वयं विनान्तिमम्।[४३]

अत्र द्विपवसुभिर्यति, चामरछन्दसः नामान्तरं वर्तते तूणकम्।

सर्वशुक्लोत्तरायां राष्ट्रदेवते, स्वागतं पयोद ते द्वयोः कवितयोः एतदेव तूणकच्छन्दः वर्तते, दिङ्मात्रमुदाह्रियते–

गजनेन वर्षणेन ते धरा प्रमोदते।
स्वागतं पयोद ते स्वागतं पयोद ते
राष्ट्रदेवते कथं नु पूजनं करोमि ते
ब्रूहि देवते! समर्चनं कथं करोमि ते।।[४४]

पदपादाकुलकम् – अस्मिन् छन्दसि १६ (षोडश) मात्राः भवन्ति, अस्मिन् आदौ द्विकल एकः भवति एतल्लक्षणं छन्दःप्रभाकरे यथा –

पदपादाकुलकला सोला। सम विषम विषम गति अनमोला।[४५]

पदपादाकुलकस्यादावेकस्य द्विकलस्य स्थितिरनिवार्या भवति। अस्य गतिः तोटकस्येव भवति।[४६]

भारतजनताऽहम् इत्याख्ये शीर्षकान्विते काव्ये ५३ पद्येषु (सर्वेष्वपि) पदपादाकुलकं छन्दः वर्तते, तत्रोदाहरणम् –

विज्ञानधनाऽहं ज्ञानधना साहित्यकलासङ्गीतपरा।
अध्यात्मसुधातटिनीस्नानैः परिपूता भारतजनताऽहम्।।[४७]

भुजङ्गप्रयातम् – भुजङ्गप्रयातच्छन्दसि चत्वारो यगणाः भवन्ति।

प्रत्येकस्मिन्नपि पादान्ते यतिः भवति। आचार्याशुक्लेन ''नमः शास्त्रिणे वीरधुर्याय तस्मै'' शीर्षकान्वितायां कवितायां, 'तुरीनो'स्मृतिसपादशतकम्' कवितायाः १० श्लोकतः १३ श्लोकं यावत् भुजङ्गप्रयातं छन्दः प्रयुक्तम्। तल्लक्षणं यथा –

भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः[४८]
भुजङ्गप्रयातं यः ।।३/३७[४९]

'तुरीनो ' स्मृतिसपदशतकम् कवितायाः पद्यम् दिङ्मात्रमुदाह्रियते–

विला ग्वालिनो – स्वागतस्थानमध्ये
नियुक्ता प्रसन्नानना या युवत्यः।
विदूरागतेभ्यो बुधेभ्यः समास्ता
ददुः पूर्णसाह्यं, कथं विस्मृताः स्युः।।[५०]

पञ्चचामरम्- कविना 'अहं स्वतंत्रता भणामि' शीर्षकान्वितायां कवितायां पञ्चचामरच्छन्दसः प्रयोगः कृतः, यस्मिन् छन्दसि क्रमशः जगण-रगण-जगण-रगण-जगणवर्णाः अन्ते च गुरु-वर्णः आयाति तच्छन्दः पञ्चचामरं कथ्यते। तल्लक्षणं यथा -

जरौ जरौ ततो जगौ च पञ्चचामरं वदेत्[५१]

रावणप्रणीतं 'शिवताण्डवस्तोत्रम्' पञ्चचामरस्य प्रकृष्टोदाहरणं विद्यते। अहं स्वतंत्रता भणामि इत्यतः दिङ्मात्रमुदाहरणम् -

जलं न लभ्यते तथा, यथा सुरा पदे-पदे
वचांसि सन्ति भूरिशो न हि क्रियाः पदे-पदे।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे
इदं दशा समर्थनं किमर्हतीति चिन्त्यताम्।।[५२]

वसन्ततिलका - उक्ता वसन्ततिलका तभजा जगौ गः।[५३]

तगण-भगण-जगणवर्णा अथ च गुरुद्वयं यस्मिन् श्लोके भवति सः श्लोक वसन्ततिलकाछन्दोयुक्तो भवति। सर्वशुक्लोत्तरायां 'तस्य स्मृतिर्विजयते पुरुषोत्तमस्य' इत्याख्यायां कवितायामेतच्छन्दः प्रयुक्तम्। मधुपवृत्तिनामकं काव्यमपि वसन्ततिलकाछन्दसि रचितमस्ति। दिङ्मात्रमुदाहियते-

गङ्गा कलिन्दतनया च सरस्वती च
यं नैजपुण्यसलिलैः परिपावयन्ति।
तत्रापि यो निजननिं प्रथिते प्रयागे
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य।।[५४]

अस्मिन् छन्दसि चतुर्दशवर्णाः पादान्ते च यतिः भवति।

रथोद्धता- कविना 'भारतस्य जनता समीक्षते' इत्यत्र रथोद्धता-छन्दसः प्रयोगः कृतः। तल्लक्षणं यथा -

रान्नराविह रथोद्धता लगौ।।[५५]

यस्मिन् वृत्ते प्रतिचरणं रगण, नगण, रगण लघुः गुरुः भवति तत् रथोद्धता नाम वृत्तम्। अस्मिन् पादान्ते यतिः भवति। उदाहरणं -

कश्च केन किमिति प्रसाद्यते
कश्च केन किमिति प्रतार्यते।
कोऽस्ति कस्य प्रणिधिः क्व कीदृशो
भारतस्य जनता समीक्षते॥[५६]

अनुष्टुप्-छन्दः – संस्कृतसाहित्ये सर्वप्रचलितं छन्दः वर्तते अनुष्टुप्, रामायण- महाभारतादिग्रन्थेषु एतच्छन्दः प्रमुखतया प्रयुक्तम्। अस्मिन् प्रत्येकमपि पादे अष्टौ वर्णाः भवन्ति। एतल्लक्षणं यथा -

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥[५७]

सर्वशुक्लोत्तराकाव्यसङ्ग्रहे – 'वन्दे कविपरम्पराम्' शीर्षकान्विता कविता कवि सम्मेलन प्रस्तावना, शीर्षकान्विता च कविता अनुष्टुप् छन्दसि वर्तेते। दिङ्मात्रमुदाह्रियते-

दारुब्रह्मजगन्नाथं श्रीसुभद्राबलान्वितम्।
चन्द्रभागां च कोणार्कं गिरिं धवलपूर्वकम्॥[५८]

आर्याच्छन्दः- यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या॥[५९]

सर्वशुक्लोत्तरायाम् उदाहरणम् -

चटका स्वर्णस्यासीदस्ति भविष्यति च भारतभूः।
त्वत्कृपयाऽन्ये देशा अस्याः स्वर्णं जिघृक्षन्ति॥[६०]

काव्यसङ्ग्रहेऽस्मिन् परमाण्वनुबन्धः(२), परमाण्वनुबन्धः(२), धर्मक्षेत्रे कुरुक्षेत्रे, कुरुक्षेत्रे मशकदंशतो रक्षा इत्येताः कविताः आर्याच्छन्दसि विरचिताः आचार्यशुक्लेन। आशाकवितायाः अधिकांशतः पद्यान्यपि आर्याच्छन्दसि विरचितानि सन्ति।

एतदतिरिच्य सर्वशुक्लोत्तराकाव्यसङ्ग्रहे विविधानां छन्दसां प्रयोगः वर्तते – अभिनवहितोपदेशनामके काव्ये उपजातिः, वंशस्थः, इन्द्रवंशा, उपेन्द्रवज्रा, इन्द्रवज्रा, वसन्ततिलका इत्येतानि छन्दांसि प्रयुक्तानि संस्कृतच्छन्दःसु स्मरामि ब्रह्मचारिणमित्यत्र अनुष्टुप्, वैश्वदेवी, शार्दूलविक्रीडितम्, स्रग्धराछन्दसां प्रयोगः

वर्तते। स्रग्धरा छन्दसः उदाहरणं दिङ्मात्रमुदाह्रियते -

भाले श्रीखण्डलेपं वपुषि हिमनिभं शुभ्रवस्त्रं दधानः
कण्ठे रुद्राक्षमालां स्मितमतिविमलं चाधरे कञ्जनेत्रः।
अन्नक्षेत्रादिसंस्था अतिकुशलतया चालयन् जीवने स्वे
श्रीदेवेन्द्रस्वरूपः परहितनिरतः स्मर्यते ब्रह्मचारी।।[६१]

'राजतां कालिदासः' इति कवितायां मन्दाक्रान्ताच्छन्दः वर्तते, स्वतंत्रदेशः सुतरां विभाति- इत्यत्र उपेन्द्रवज्रा-छन्दः प्रयुक्तम्।

पृथ्वी-छन्दः - "जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः"[६२] पृथ्वी-छन्दसि प्रत्येकस्मिन्नपि चरणे क्रमशो जगण-सगण-जगण-सगण-यगणवर्णाः भवन्ति अन्ते च लघुगुरू वर्णौ भवतः, अत्र अष्टमे नवमे वर्णे यतिः भवति। सर्वशुक्लोत्तराकाव्यसङ्ग्रहे अकालजलद इत्याख्या कविता पृथ्वीच्छन्दसि रचिताऽस्ति। तदुदाहरणं यथा-

अकालजलद त्वया किमिति निन्द्यमाचर्यते?
कृषीवलपरिश्रमः कथमहो त्वया नाश्यते?
निपात्य कारकाचयं परिणतेषु सस्येषु हा
त्वया किमिति तुद्यते वद पयोद! पृथ्वीमनः।।[६३]

हिन्दी-छन्दांसि

कविना-रमाकान्तशुक्लेन स्वकीये जीवने औपचारिकतया हिन्दीभाषायाः सेवा कृता, देहलीविश्वविद्यालयस्य राजधानीमहाविद्यालये सः हिन्दी-प्राध्यापकत्वेन सेवारत आसीत्। अतः तस्य संस्कृतलेखने हिन्दीप्रभावः द्रष्टुं शक्यते। कविना- सर्वशुक्लोत्तराकाव्यसङ्ग्रहे हिन्दी-छन्दांसि स्वीकृत्य स्वीया रचना प्रगाढा कृतास्ति। वस्तुतः एतानि छन्दांसि संस्कृतात् एव प्रादुर्भूतानि तथापि सर्वशुक्लोत्तरायां प्रयुक्तच्छन्दसां विवरणं, हिन्दीछन्दोयोजना वा अधस्तात् प्रस्तूयते।

हरिगीतिकाच्छन्दः- सर्वशुक्लोत्तरायाः प्रारम्भः 'वाणीं वयं वन्दामहे' इति वाण्याः वन्दनया विद्यते। अस्यां प्रथमायां रचनायामेव कविना हरिगीतिकाच्छन्दसः प्रयोगः कृतः। हरिगीतिका छन्दः सममात्रिकं छन्दः

वर्तते। अस्मिन् प्रत्येकऽस्मिन्नपि चरणे अष्टाविंशति-अष्टाविंशति मात्राः भवन्ति विषमसमचरणयोः अन्त्यानुप्रास(तुक)मेलनं जायते। १६ मात्रायां पादान्ते च यतिः भवति एतल्लक्षणं यथा -

''शृंगारभूषण अन्त लग जन, गाइये हरिगीतिका''[६४]। हिन्दी कवेः मैथिलीशरणगुप्तस्य भारत-भारती, जयद्रथ वध इत्यनयोः काव्ययोः एतदेव छन्दः विद्यते। वाणीं वयं वन्दामहे इत्यतः दिङ्मात्रमुदाह्रियते -

यस्याः स्मरणमात्रेण पुम्भिर्लभ्यते ज्ञानप्रभा
यस्याः कृपालवलेशतः सुलभा शुभा वाचो विभा।
शब्दार्थगुणवृत्तिप्रदां रीतिप्रदां रसदायिनीम्
ध्वन्यौचितीवक्रोक्तिदां वाणीं वन्दामहे।।[६५]

''योऽयं कृतशपथस्त्वया' शीर्षकान्विता कविताऽपि हरिगीतिका-च्छन्दसि वर्तते।

गीतिका- रत्न रवि कल धारिके लग, अन्त रचिये गीतिका[६६]

गीतिकाच्छन्दसि २६ मात्रा भवन्ति १४-१२ अथवा १२-१४ मात्रा क्रमशश्च यतिः भवति। सर्वशुक्लोत्तरायां श्री वरदेश्वराष्टकमित्यत्र गीतिकाच्छन्दः प्रयुक्तम्।- दिङ्मात्रमुदाह्रियते।

अशरणानां शरणदं भवभीतिभीताभयकरं
भक्ति-मुक्तिसुदायकं शक्तिप्रदं पापाहम्।
सच्चिदानन्दस्वरूपं व्यापकं विभुमव्ययं
नौमि वरदाम्बायुतं वरदेश्वरं वरदायकम्।।[६७]

दिक्पाल-छन्दः - सविता विराज दोई दिक्पाल छन्द सोई।

दिक्पाल-छन्दः मात्रिकच्छन्दः वर्तते। प्रत्येकस्मिन्नपि चरणे २४ मात्राः भवन्ति। १२ मात्रायां पादान्ते चात्र यतिः भवति, 'सुरभारती विजयते' कवितायां कविना पादद्वयं स्वीकृत्य एकपद्यनिर्माणं कृतम्। यथा-

निगमागमैरुपेता विज्ञानरत्नरम्या।
वेदाङ्गपूतकाया सुरभारती विजयते।।[६८]

धन्वन्तरिं तमीडे इत्यत्राऽपि कविना तथैवाचरितम्।

पद्धरि-छन्दः - पद्धरि-पादाकुलकयोः काचित् समानता स्वीकृता आचार्यैः, परं द्वे अपि छन्दसी पृथक् समीहिते ' महाकाल मालिका' शीर्षकान्वितायां रचनायां कविना एते द्वे अधिप्रयुक्ते।

पद्धरि-छन्दसः लक्षणम् - (पृ. ४८) **वसु वसु कल पद्धरि लेहु साज।** अस्मिन् छन्दसि चत्वारि चतुष्कलानि भवन्ति। अष्टममात्रायां यतिः भवति। प्रसिद्धहिन्दी कविः केशवदासः एतस्य नामकरणं 'पद्धटिका' इति करोति। अस्योदाहरणं सर्वशुक्लोत्तरायाम्-

जय शिव हर मृड भव रुद्र भीम
पितृसद्मनिलय पशुपतेऽसीम।
जय महादेव हर विरूपाक्ष
ईशान महेश्वर जय जय जय[७०]॥

सार-छन्दः - सोरह रत्रिकल अन्ते कर्णा, सारछन्द अति नीको॥७२॥ सारनाम छन्दः अष्टाविंशतिमात्रात्मकं वर्तते, प्रतिपादं अष्टाविंशतिमात्राः, अत्र षोडश्यां द्वादश्यां च मात्रायां यतिः भवति। अन्ते द्वयोर्गुरुवर्णयोः प्रयोगः मोहको भवति।

सर्वशुक्लोत्तरायां 'उज्जयिनीयं जयति, राजस्थानम्' इत्येतयोः कवितयोः सारच्छन्दः वर्तते। दिङ्मात्रोदाहरणं यथा-

डिङ्गलपिङ्गल वयणसगाई काष्ठपुत्तलीनृत्यैः
रत्नपरीक्षा प्रस्तरखण्डन- ढोला- मारू- वृत्तैः।
अणुविस्फोट परीक्षण पुस्तक- गृह- परमाणुविकासैः
आर्हतवैदिकधर्मप्रचारैर्विविधकलानां हासैः॥[७२]

रोला-छन्दः - रोला सममात्रिकं छन्दः वर्तते। अत्र प्रत्येकस्मिन्नपि चरणे २४ मात्राः भवन्ति विषम-समचरणयोः तुकमेलनं जायते। एकादशे पादान्ते च यतिः भवति। एतल्लक्षणं यथा-

रोला की चौबीस कला यति ग्यारह तेरह[७३]।

उदाहरणं सर्वशुक्लोत्तरायाम्-

देशभक्तिभावितचित्तान् सादरं नमन्ती,
स्वातन्त्र्याहववीरभटान् सादरं स्मरन्ती।
देशवासिनां चिन्तनधारां पुरो नयन्ती
सम्प्राप्तेयं स्वतंत्रतायाः स्वर्णजयन्ती॥[७४]

सर्वशुक्लोत्तरायां स्वतंत्रतायाः स्वर्णजयन्ती, श्रावणमासे उभेऽपि कविते रोलाच्छन्दसि रचिते।

विधाताच्छन्दः/विजातिछन्दः- हिन्दीभाषायां प्रयुक्तं विधाताच्छन्दः सममात्रिकमस्ति, अत्र प्रत्येकस्मिन्नपि चरणे २८ मात्राः भवन्ति, प्रथम-अष्टम-पञ्चदशश्च मात्राः लघुगणयुताः भवन्ति। तल्लक्षणाम्, यद्यथा-

लहौ विद्या लहौ रत्नै लखौ रचना विधाता की[७५]

कविना प्रणम्याः कारगिलवीराः इत्यत्र विधाताच्छन्दः द्विचरणात्मकीकृत्य प्रयुक्तम्, वन्दनीयास्ते इत्यत्राऽपि विधाताच्छन्दः प्रयुक्तम्, एकमुदाहरणं प्रस्तूयते-

इयं स्वर्गाधिका मे मातृभूमिर्वन्दनीयास्ते।
परं यस्या दशाद्यत्वे, कथय किं वन्दनीयास्ते॥[७६]

विधाताच्छन्दः उर्दूभाषायां 'बहरे हजज मुसम्मन् सालिम्' इति कथ्यते। यथा -

न छोड़ा साथ लक्ष्मन ने बिरादर हो तो ऐसा हो।

दोहाच्छन्दः - जा न विषम राखै स-र-न अन्त सु सम हो जात।[७७] अथात्र यदि 'विजाति'च्छन्दः स्वीक्रियते तदा चतुश्चरणात्मकं तन्निष्पद्यते। तल्लक्षणं यथा छन्दः प्रभाकरे - 'लहो विद्या विजाती कीं (पृ. ४४)

दोहाच्छन्दसि विषमचरणयोः त्रयोदश-त्रयोदश मात्राः, समचरणयोः एकादश-एकादश मात्राः भवन्ति। विषमचरणयोः प्रारम्भः जगणवर्णैः न भवेत् किञ्च अन्ते सगण-रगण-नगवर्णाः न आगच्छेयुः।

सर्वशुक्लोत्तरायां - **'त्वं चन्दनमसि हे प्रभो'** कवितायां दोहा छन्दः वर्तते, हिन्दीतः दोहाछन्दसि अनूदितानि इमानि पद्यानि।

हिन्दी भाषायाः प्रसिद्धानि छन्दांसि कविः स्वकीये काव्ये प्रयुंक्ते। सर्वशुक्लोत्तरायां - 'भारतस्य विजयोऽयम्' इत्यस्यां कवितायां सार छन्दः प्रयुक्तम्, 'किं जीवनं ते' इत्यत्र सुमेरू-छन्दः प्रयुक्तम्। 'एकं सद् बहुधा विलोक्यते भारतम्' इत्यत्र रासकच्छन्दः प्रयुक्तम् - दिङ्मात्रमुदाह्रियते-

यदि पादेऽस्य कदापि निविशते कण्टकम्
निखिलतनौ पीडनं भवति मर्मान्तकम्।
यदि वेदना शिरसि समुदेति तदा ध्रुवं
व्यथते सकलतनौ मे निखिलं भारतम्।।[७८]

कविना 'मेघप्रबोधनम्' इत्यत्र योगच्छन्दः प्रयुक्तम्। एवं क्रमेण सर्वशुक्लोत्तरायां प्रभूततया कविः हिन्दीछन्दांसि स्वीकृत्य रचनां करोति।

उर्दूबहर/उर्दूच्छन्दांसि

सर्वशुक्लोत्तरायां कविना उर्दूच्छन्दसां प्रयोगेऽपि कुशलता प्रदर्शिताऽस्ति, उर्दूभाषायां 'छन्दः' इत्यस्य कृते 'बहर'[७९] शब्दस्य प्रयोगे भवति, यस्य अनेके, अर्थाः भवन्ति परं एकः अर्थः वृत्तम् अपि। उर्दूभाषायां गणस्य कृते रुक्न शब्दस्य प्रयोगः विद्यते, रुक्न शब्दस्य बहुवचने 'अरकान्' प्रयोगः भवति। उूर्दभाषायामपि गणाः भवन्ति -

१. फऊलुन - ISS
२. फाइलुन - SIS
३. मफाईलुन- ISSS
४. मुस्तफइलुन- SSIS
५. मफाइलुन- ISIS
६. मुस्तफइलुन IISIS
७. फाइलातुन SISS
८. मफऊलात SSSI [८०]

उर्दूभाषायां मुख्यतया १९ (बहर) छन्दान्सि वर्तन्ते तबील, मफीइ, सुरीफ, इत्यादयः एतेषामपि अशीति भेदाः जायन्ते। प्रत्येकस्यापि बहरस्यान्ते तुकमेलनं (काफिया) भवति।

बहरे मुतकारिब-मुसम्मन्-मकबूज-आलम-मुजाइफच्छन्दः-

प्रस्तुतेऽस्मिन् छन्दसि द्वात्रिंशत् मात्राः भवन्ति प्रत्येकस्मिन्नपि पादे। अष्टममात्रायां यतिः भवति। एतत् मात्रिकच्छन्दः। लक्षणं यथा-

फऊल फेलुन फऊल फेलुन फऊल फेलुन फऊल फेलुन[८१]

सर्वशुक्लोत्तरायां 'बहरे मुतकारिब मुसम्मत् मकबूज़ आलम मुजारफः' छन्दसः प्रयोगः 'मदीयकविते कुरुष्व गानम्, शीर्षकान्वितायां कवितायां कृतमस्ति। उदाहरणं यथा-

सरस्वतीपादपद्मसेवा यदीयमास्ते परं हि लक्ष्यम्।
बुधाग्रगाणामतन्द्रिताणां, मदीयकविते कुरुष्व गानम्[८२]**॥**

बहरे-हजज-मुसम्मन्-सालिम-छन्दः- एतन्नामकं छन्दः सर्वशुक्लोत्तरायां कविना अनेकासु कवितासु प्रयुक्तम्। वन्दनीयास्ते, लोकतंत्रेऽस्मिन्, प्रणम्याः कारगिलवीराः, भावसन्धिः, तुरीनो स्मृतिसपादशतकम्, पुनर्नो भारते भूयात् इत्यादिषु कवितासु बहरे हजज मुसम्मन् सालिम नाम छन्दः वर्तते। एतल्लक्षणं यथा

मफाईलुन मफाईलुन मफाईलुन मफाईलुन[८३]

हिन्द्यामुदाहरणं यथा -

न छोड़ा साथ लछमन ने विरादर हो तो ऐसा हो

अस्मिन् छन्दसि 28 मात्राः भवन्ति प्रत्येकस्मिनमपि चरणे, १४ मात्रायां यतिः जायते। हिन्दीभाषायाः विधाताच्छन्दसा सह एतस्य साम्यं दृश्यते। सर्वशुक्लोत्तरायामागतं पद्यं दिङ्मात्रामुदाह्रियते। -

चलच्चित्राभिनेतारोऽभिनेत्र्यो बहुमतं लब्धुं
दलाध्यक्षैः सबहुमानं सदस्यत्वेन गृह्यन्ते।
शिखण्डी भीष्मजयहेतोर्दलैरन्विष्यते यत्नात्
अघट्यं घटयितुं शक्यं सखे निर्वाचने प्राप्ते।।[८४]

बहरे-रमल-मुसम्मन्-महजूफच्छन्दः- सर्वशुक्लोत्तरायां बहरे रमल मुसम्मन् महजूफ-छन्दसः प्रयोगः यानावरोधो दुस्त्यजः शीर्षकान्वितायां कवितायां कृतम्। एतल्लक्षणं यथा -

फाइलातुन फाइलातुन फाइलातुन फायलुन।[८५]

उदाहरणम्-

लाजवन्ती गार्डनं स्यात्स्यादथो धौलाकुआँ।
स्याच्च वा मायापुरी यानवरोधो दुस्त्यजः।।[८६]

एवं क्रमेण कविना सर्वशुक्लोत्तराकाव्यसङ्ग्रहेऽस्मिन् उर्दूछन्दसि कवितां कृत्वा (न केवला एका कविता अपितु दशाधिकाः कविताः उर्दूच्छन्दसि वर्तन्ते) संस्कृत-हिन्दी- उर्दू-छन्दसां यः समन्वयः कृतः सः तु समाजोपयोगी एव। सर्वशुक्लोत्तरायां मुक्तछन्दसामपि कश्चन प्रवाहो विद्यते। मुक्तच्छन्दसि लेखनस्य क्षमताऽपि कवेः रचनात्मिकां शक्तिं वर्धयति सर्वशुक्लोत्तरायां मम तथा विहगदम्पत्योर्विदेशयात्रा, अपहृतविमाने, मातरं प्रति पुत्रस्य जङ्गमभाषसन्देशः, कविसहृदयसंवादः, एडिनबरा-नगरोत्तमे इत्येताः कविताः मुक्तच्छन्दसि विद्यन्ते।

सर्वशुक्लोत्तरायां कवेः छन्दोयोजना वैज्ञानिकी प्रतिभाति, कविना संस्कृत-हिन्दी- उर्दूछन्दस्सु कविताः रचितास्सन्ति, अनेनेयं रचना सर्वतोभावेन सर्वत्र पाठकान् सम्मोहयति। सर्वशुक्लोत्तरा काव्यसङ्ग्रहे छन्दसां योजना मनोवैज्ञानिकी प्रतीयते। कविना गेयच्छन्दसां प्रयोगः समधिकतया कृतः अतः इयं रचना प्रसिद्धिं गता, कविना बहुषु स्थलेषु नूतनतयाऽपि छन्दः प्रयुक्तं यथा 'दिक्पाल'छन्दसः पादद्वयेनैव पद्यनिर्माणं कृतं सुरभारती विजयते' इत्यत्र कवितायां कवेः ये केऽपि मनोभावाः ते सर्वेऽपि छन्दस्सु निबद्धाः सन्तः पाठकवर्गेषु, पाठकमनस्सु च सामान्यतया आदरभावेन गृह्यन्ते।

४.३ ध्वनिविवेचनम्

साहित्यशास्त्रे ध्वनिसम्प्रदायः स्वीयं प्रमुखं स्थानं बिभर्ति, सम्प्रदायस्यास्य प्रवर्तकः आचार्य आनन्दवर्धनः विद्यते। साहित्यशास्त्रे ध्वनिशब्दः पञ्चधा निरूप्यते काव्यतत्त्वविद्भिः साहित्यिकैः तद्यथा- (१) ध्वनति यः स व्यञ्जकः शब्दो ध्वनिः (२) ध्वनति ध्वनयति वा यः सः व्यञ्जकोऽर्थः ध्वनिः। (३) ध्वन्यते इति ध्वनिः यद् ध्वन्यते इत्यनेन रसालङ्कारवस्तुरूपं व्यङ्ग्यार्थत्रयमुपतिष्ठते, (४) ध्वन्यते अनेनेति ध्वनिः, इत्यनेन व्यञ्जनादिशक्तीनां ग्रहणम्, (५) ध्वन्यतेऽस्मिन्निति ध्वनिः इत्यनेन

व्यङ्ग्यार्थप्रधानं काव्यं गृह्यते। एवं ध्वनिशब्देन व्यञ्जकशब्दस्य व्यञ्जकार्थस्य, व्यङ्ग्यार्थस्य व्यञ्जनाव्यापारस्य, व्यङ्ग्यार्थप्रधानकाव्यस्य च ग्रहणं जायते।

वस्तुतः वाच्यार्थापेक्षया व्यङ्ग्येऽर्थे मुख्ये सति ध्वनिरिति कथ्यते, तथाविधं च काव्यं सर्वोत्कृष्टं स्वीक्रियते।

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः[८७]

किञ्च -

वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्[८८]

ध्वनिसंस्थापकः आचार्यः आनन्दवर्धनः ध्वनिं लक्षयति -

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥[८९]

यत्र शब्दार्थौ स्वार्थं गौणरूपेणोपस्थाप्य व्यङ्ग्यमर्थम् अभिव्यञ्जयेतां तदा व्यङ्ग्योऽर्थो ध्वनिर्वेति जिज्ञासायां ध्वनिकारेण स्फुटीक्रियते यत् कामिनीलावण्यमिव प्रसिद्धातिरिक्तम् अन्यदेव किञ्चित् प्राधान्येन प्रतीयते वाच्यातिरिक्तं व्यङ्ग्यरूपं स ध्वनिः -

प्रतीयमानं पुनरन्यदेव वस्वस्ति वाणीषु महाकवीनाम्।
यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥[९०]

ध्वनिसिद्धान्तस्य स्थापना व्याकरणे विशेषतो भर्तृहरिकृतवाक्य-पदीयमाश्रित्य वर्तते वाक्यपदीये नादस्फोटयोः स्वरूपं निरूप्यते -

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा।
व्यङ्ग्य-व्यञ्जकभावेन तथैव स्फोटनादयोः॥[९१]

स्फोटनादयोः व्यङ्ग्यव्यञ्जकसम्बन्धो मन्यते, स्फोटव्यञ्जका वर्णाः ध्वनिनाम्ना व्यवह्रियन्ते। आचार्यआनन्दवर्धनः मम्मटश्च ध्वनेः व्याकरणमूलत्वं स्वीकुरुतः -

''प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम् ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति''।[९२]

''बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः''[९३]।

क्षणे-क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः इति शिशुपालवधस्य उक्तिः। एतादृशी च रमणीयतां काव्ये व्यञ्जनाशक्तेः ध्वनेर्वा सञ्जायते, यथा

रमणीशरीरे लावण्यम्, मेघे विद्युत्, चन्द्रमसि ज्योत्स्ना तथैव काव्ये ध्वनेरधिष्ठानम्, ध्वनितत्त्वं न काव्यस्यावयवरूपम् अपि तु अवयविरूपेण आत्मरूपेण वा जायते।

ध्वनेर्मुख्यतया द्वौ भेदौ स्तः -

१. लक्षणामूलध्वनिः/अविवक्षितवाच्यध्वनिः।

२. अभिधामूलध्वनिः/विवक्षितान्यपरवाच्यध्वनिः।

लक्षणमूलध्वनिः

१. अर्थान्तरसङ्क्रमितवाच्यध्वनिः

२. अत्यन्ततिरस्कृतवाच्यध्वनिः

अभिधामूलो ध्वनिः

१. संलक्ष्यक्रमव्यङ्ग्यध्वनिः

२. असंलक्ष्यक्रमव्यङ्ग्यध्वनिः

ध्वनिवादिभिराचार्यैः उत्तमकाव्यस्य त्रयो भेदाः स्वीक्रियन्ते -

१. रसध्वनिः

२. अलङ्कारध्वनिः।

३. वस्तुध्वनिः।

ध्वनौ सर्वेषामपि काव्यमूलतत्त्वानां रसालङ्कारवक्रोक्त्यादीनां समावेशो भवति, ध्वनेः रमणीयत्वं शब्दार्थोभयमूलकम्। ध्वनिः काव्ये ललनालावण्यवद् अपूर्वं रम्यत्वं द्योतयति।

न केवलमितिवृत्तमात्रनिर्वाहेण कस्यापि कवेः कवित्वपदलाभः यतोहि नानाविधवाच्यवाचकरचनाप्रपञ्चपरिलसितसौन्दर्यस्य काव्यस्य सारभूतं ध्वनितत्त्वमेव। प्रतीयमानार्थसद्भावादेव अलोकसामान्यं वस्तुतत्त्वं प्रकाशयन्ती कविभारती लोकोत्तरचमत्कारमातनोति सहृदयहृदयाह्लादकं काव्यस्य जीवातुभूतं ध्वनितत्त्वं नितरां प्रकाशते।

अविवक्षितवाच्यध्वनेः अर्थान्तरसङ्क्रमितप्रभेदः - वाच्ये अविवक्षिते सति वाच्योऽर्थः अनुपपद्यमानतया यत्र अर्थान्तरेऽभिसङ्क्रामति सोऽर्थान्तरसङ्क्रमितिवाच्यध्वनेर्विषयो भवति यथा शुक्लमहोदयस्य मदीयकविते कुरुष्व गानम्, वन्द्यतां काऽपि सा शासनासन्दिका, भारतजनताऽहम्

इत्यादिकवितासु पुनरावर्तितानि पदानि मदीयकविते इत्यादीनि अर्थान्तरेऽभिसङ्क्रान्तानि विशिष्टसौन्दर्यञ्चोत्पादयन्ति किमपि निगूढरमणीयार्थं चाभिव्यञ्जयन्ति यथा -

अभिमानधना विनयोपेता शालीना भारतजनताऽहम्।
कुलिशादपि कठिना कुसुमादपि सुकुमारा भारतजनताऽहम्॥[९४]

इत्यत्र अहमिति पदं विशिष्टार्थद्योतकम्। 'मदीयकविते कुरुष्व गानम्' इत्यत्र मदीयपदं बाधितार्थः सन् विशिष्टार्थपरतया चमत्कारमातनोति। यदुक्तम्-

सरस्वतीपादपद्मसेवा यदीयमास्ते परं हि लक्ष्यं,[९५]
परोपकारव्रतं पवित्रं सदैव ये पालयन्ति हृष्टाः
सुपूजितानां नृणां हि तेषां मदीयकविते कुरुष्व गानम्॥[९६]

इत्थमेव वन्द्यतां काऽपि सा शासनासन्दिका -

जन्मजन्मान्तरीयं स्वकीयं परं वैरभावं परित्यज्य यस्या वशात्।
एकतां यान्ति नेतार एकक्षणे वन्द्यतां काऽपि सा शासनासन्दिका॥[९७]

इत्यत्र 'काऽपि' इतिपदम् अर्थान्तरसङ्क्रमितं प्रतिभाति।

लक्षणामूलायाः अत्यन्ततिरस्कृतवाच्यध्वनिः- अविवक्षितवाच्यध्वनेः प्रभेदस्य अत्यन्ततिरस्कृतवाच्यस्यापि समाश्रयेण काव्यच्छाया समासादितचमत्कारैव भवति। यत्र काव्ये मुख्यार्थबाधे सति सर्वथा तस्य परित्यागः अभिमतः सन् किमपि अर्थान्तरं लक्षयति तत्र लक्षणामूलात्यन्ततिरस्कृतवाच्यध्वनेः विषयः। यथा सर्वशुक्लोत्तरायां - 'वन्द्यतां काऽपि सा शासनासन्दिका' इति शीर्षकान्वितायां कवितायां -

वञ्चनं मित्रघातस्तथा दस्युता निस्त्रपत्वं कृतघ्नत्वमित्यादयः।
दुर्गुणाः वन्द्यतां यान्ति सद्यो यया वन्द्यतां काऽपि सा शासनासन्दिका॥[९८]

इत्यत्र 'वन्द्यता'मिति पदं बाधितार्थः सर्वथा मुख्यार्थं जहाति विपरीतलक्षणया विपरीतार्थं लक्षयन् पुनः साक्षात् शब्दसामर्थ्येनाप्रकाश्यम् अत्यन्तं गर्हिततत्त्वरूपार्थं प्रकटयति। अत्र सर्वथा मुख्यार्थपरित्यागात् वैपरीत्यसम्बन्धयोगात् अत्यन्ततिरस्कृतध्वनिः प्रतिभासते सम्पूर्णायां कवितायां 'वन्द्यता'मिति पदं स्वार्थे बाधितः सन् विपरीतार्थं लक्षयन् व्यञ्जनया शब्दसामर्थ्यादप्रकाश्यमत्यन्तनिन्दनीयरूपार्थं द्योतयति।

यां श्रितैश्छन्ददात्री प्रजा पीड्यते
वन्द्यतां काऽपि सा शासनासन्दिका॥[९९]

अतः सर्वत्र लक्षणामूलात्यन्ततिरस्कृतवाच्यध्वनिप्रभेदविषयः।

अभिधामूल- (विवक्षितान्यपरवाच्यध्वनिः) ध्वनिः - यत्र वाच्यं स्वार्थे अन्वीयमानोऽपि व्यङ्ग्यनिष्ठं भवति तत्र विवक्षितान्यपरवाच्यध्वनेर्विषयः[१००]। अस्य संलक्ष्यक्रम-असंलक्ष्यक्रमाविति भेदद्वयम्।

असंलक्ष्यक्रमध्वनिप्रकाशः - उक्तं हि "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः[१०१]" एतेन विभावानुभावव्यभिचारिण एव न रसः अपितु रसस्तैरभिव्यज्यते अतः क्रमस्तु अस्त्येव परन्तु स क्रमः अत्यन्तं लाघवात् सूचीशतपत्रभेदन्यायेन न लक्ष्यते अतः असंलक्ष्यक्रमः इति युक्ताभिधानम्, अयं च असंलक्ष्यक्रमो ध्वनिः रसभावतदाभासादिरूपः एक एव। शुक्लवर्याणां काव्येषु रसादिध्वनिमध्ये भावध्वनेर्प्राधान्यं परिलक्ष्यते। यथा -

कुन्देन्दुहिमधवलां धवलवस्त्रावृतां हंसस्थितां
वरकच्छपीझङ्कृतिपरां ब्रह्मेशनारायणनुताम्।
मालाधरां पुस्तकधरां निःशेषजाड्यविलोपिनीम्
अक्षय्यविद्याविभवदां वाणीं वयं वन्दामहे॥[१०२]

इत्यत्र वाग्देवताऽऽलम्बनविभावः कुन्देन्दुहिमधवलत्वं धवलवस्त्रावृतत्वम्, निःशेषजाड्यविलोपकर्त्रीदित्वञ्चोद्दीपनविभावाः वाग्देवतातिशयवशात् स्तुत्याद्यावरणात्मकोऽनुभावः। मतीत्यादयो गम्याः सञ्चारिणः सम्भूय कविनिष्ठ-वाग्देवताविषयक-रतिभाव-ध्वनिं परिपोषयन्ति। 'इत्थं वाणीं वयं वन्दामहे' शीर्षकान्वितायां सम्पूर्णकवितायां कविसहृदयनिष्ठवाणीविषयकरतिभावस्य परिपोषात् गुरुदेवतादिविषयकरतेः भावत्वात् रतिभावध्वनिः चमत्कुरुते।

इत्थंमेव अन्यास्वपि कवितासु सुरभारती विजयते, धन्वन्तरिं तमीडे, वेदवाणीं नुमः, महाकालमालिका, उज्जयनीयं जयति, श्रीवरदेश्वराष्टकम्, नमः शास्त्रिणे वीरधुर्याय तस्मै इत्यादिषु रतिभावध्वनेः चमत्कारः।

सर्वशुक्लोत्तरायां रतिभावध्वनिः दिङ्मात्रमुदाह्रियते -

मदर्चनाकृते शिरांस्युपायनीकृतानि यैः
धनं वपुस्तथा मनः सहर्षमर्पितानि यैः।
अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः,
गतास्त एव मे जना सदैव वन्दनीयताम्
अहं स्वतंत्रता भणामि मद्वचो निशम्यताम्।।[१०३]

इत्यत्र प्रथम-त्रिषु पादेषु वर्णितविभावाऽनुभावसञ्चारिभिः उत्साहप्रतीतेर्वीररसो ध्वन्यते। चतुर्थे पादे एतावदुत्साहपरिपूर्णदेशभक्तानां वन्दनार्हत्वप्रतिपादनेन रतिभावध्वनिः वीररसस्य च तदुपकारकत्वात् तदङ्गता, अतः रसवत् अलङ्कारस्यापि विषयः। यदुक्तम्

प्रधाने यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः।।[१०४]

इत्थं कविवरस्य कवितासु ध्वनेः योजना हृद्या वर्तते, कवेः अधिकासु कवितासु भावध्वनिः विद्यते, अर्थात् सर्वशुक्लोत्तरायां विद्यते! रतिभावध्वनिः कवितासु चमत्कारं जनयति अर्थान्तरसङ्क्रमितमत्यन्ततिरस्कृतं च वाच्यं चतुर्गुणितं माधुर्यं तनुते। कविवरस्य कवितासु रसध्वनिरपि काव्यशोभां वर्धयति।

अत्रास्माभिः ध्वनेः दिङ्मात्रमेव प्रकाशः कृतः। ध्वनिस्तावत् विस्तृतः विषयः, कवेः स्फुटकवितासु ध्वनेः भेदोपभेदाः प्रायशः सन्ति, अतो विस्तरभयात् नात्राधिकं समुपस्थापितम्।

४.४ रीतिविवेचनम्

रीतिसम्प्रदायस्य संस्थापकः वामनाचार्यः विद्यते। रीतिर्नाम मार्गपर्यायः, पद्धतिः शैली इत्यादयस्तदर्थबोधकाः पर्यायशब्दाः, काव्ये प्राधान्येन रमणीयत्वं चाकाङ्क्षते। प्रत्येकं कवेः स्वकीया भावाभिव्यञ्जनप्रणाली भवति। सैव विशेषता तस्य समग्रकाव्यावगाहिनी, तयैव विशेषतया कवेः स्वरूपं निर्धार्यते। रीतिर्नाम काव्ये सौन्दर्याधायिनी, विशिष्टगुणसमवेता, रसादीनुपकर्त्री, विशिष्टा पदसंघटना।

रीङ् गताविति धातोः रीतिशब्दः निष्पद्यते, रीतेर्व्युत्पत्तिमूलकः अर्थः भवति मार्गः पन्था वा ''रीतिशब्दो मार्गपर्यायः''। आचार्यविश्वनाथो रीतिं लक्षयति-

पदसंघटना रीतिरङ्गसंस्थाविशेषवत्

उपकर्त्री रसादीनाम्..................॥[१०५]

रीतिः चतुर्धा भवति -**वैदर्भी चाऽथ गौडी च पाञ्चाली लाटिका तथा।**

माधुर्यवञ्यजकैर्वर्णै रचना ललितात्मिका॥[१०६]

कविवरशुक्लस्य काव्येषु प्रायशः सर्वा अपि रीतयः प्राप्यन्ते तथापि कवेः स्फुटरचनासु वैदर्भीरीतेराधिक्यं विद्यते, वैदर्भी रीतिस्तावत् - "**अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरिष्यते**"[१०७] कवेः सर्वशुक्लोत्तराकाव्य-सङ्ग्रहाद् दिङ्मात्रमुदाह्रियते -

अभिमानधना विनयोपेता शालीना भारतजनताहम्।

कुलिशादपि कठिना कुसुमादपि सुकुमारा भारतजनताऽहम्॥[१०८]

अस्मिन् श्लोके भ, म, ध व य, ल, र इत्यादि वर्णानामाधिक्येन वैदर्भी रीतिः। समग्रेऽपि काव्यसङ्कलने वैदर्भीरीतेः प्रधानता विद्यते।

गौडी रीतिः- यत्र ओजः प्रकाशकानां वर्णानामधिकता भवति, यत्र-महाप्राणवर्णानां यत्र च अनुप्रासमहिमपरतन्त्राणां वाक्यानामधिकता जायते तत्र गौडीरीतिः भवति। सर्वशुक्लोत्तरायां गौडीरीतेरपि उदाहरणानि प्रायशः प्राप्यन्ते। तद्यथा-

दारिद्र्यदुःखदावाग्निदग्धदेहापि नो म्रिये ह्यद्यावधि।

साहसजिजीविषाकर्मठतापुत्तलिका भारतजनताऽहम्॥[१०९]

किञ्च -**बप्पारावल-राणासाँगा-गोरा-बादल-वीरैः।**

सिंहप्रतापसदृशरणवीरैः सन्धापालनधीरैः॥[११०]

उपर्युक्तयोरुदाहरणयोः महाप्राणवर्णानामाधिक्यात् गौडीरीतिः विद्यते।

लाटीरीतिः - यत्र वैदर्भीपाञ्चाली इत्यनयोः द्वयोः सम्मेलनं भवति, अर्थात् यस्मिन् पद्ये वैदर्भी पाञ्चालीरीतयोः उपस्थितिः भवति सा लाटीरीतिः भवति। सर्वशुक्लोत्तरायां अस्याः रीतेः वर्णनम् अस्फुटतया प्राप्यते। तद्यथा-

यत्र रिङ्गत्तरङ्गा 'डलेवर्' नदी

यत्र 'शोमेनि' सञ्ज्ञं च यूनां गृहम्।

मेपलैश्चैष्टनड्वृक्षकैः शोभिता

राजते शोभना सा फिलाडेल्फिया॥[१११]

अस्मिन् पद्ये प्रथमे पादे 'रिङ्गत्तरङ्गा' इत्यत्र वैदर्भी रीतिप्रयुक्तानां माधुर्यवर्णानाम्, तृतीये चरणे 'मेपलैश्चेष्टनड्वृक्षकैः' इत्यत्र पाञ्चाली रीतिप्रयुक्तानां वर्णानां मिश्रणेन अस्फुटतया लाटीरीतेः प्राधान्यम्।

पाञ्चालीरीतिः –वैदर्भीगौणीरीतयोः अवशिष्टैः वर्णैः पाञ्चाली रीतेः निष्पत्तिः भवति, यदुक्तम्–

वर्णैः शेषैः पुनर्द्वयोः।

समस्तपञ्चषपदो बन्धः पाञ्चालिका मता।।[११२]

सर्वशुक्लोत्तराकाव्यसङ्कलने पाञ्चालीरीतेररुदाहरणम् –

शङ्करशशिलेखावारिविन्दुरखिलौघहरो

बहुवीचिविवर्तावर्तयुता नर्मदा बभौ।।[११३] इत्यत्र प्रथमे पादे चतुर्थपञ्चषां पदानां समासेनाऽत्र पाञ्चालीरीतिः। किञ्च–

कृष्णायन–कृद्द्वारिकाप्रसादमिश्रलसितम्

श्रीहीरालालजैनकृतशोधमयूखसितम्।।[११४]

अस्मिन् श्लोकेऽपि दीर्घसमासेन पाञ्चालीरीतिः। भोजराजेन पाञ्चालीरीतेः लक्षणं लक्षयता निगदितम् –

समस्तपञ्चषपदामोजःकान्तिसमन्विताम्।

मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः।।[११५]

'प्रणम्याः कारिगिलवीराः' शीर्षकान्वितायां कवितायां पाञ्चालीरीतेः शोभा हृदयाह्लादिका। तद्यथा –

जुबर्–थारु–कुकुरथाङ्–तुर्तुकाख्येभ्योऽद्रिशिखरेभ्यः।

तुलालिङ्गात्तथा शत्रूनतौत्सुः कारगिलवीराः।।[११६]

वीररसपूर्णायां कवितायां मधुरा सामासिका च रचना पाञ्चालीरीतिं व्यनक्ति।

एवं निष्कर्षरूपेण वक्तुं शक्यते यत् कविवरस्य कवितासु, वैदर्भीरीतेः प्राधान्यं सहैव गौणी–लाटी–पाञ्चालीनां सम्मिश्रणेन काव्यशोभावर्धनं भवति।

●

सन्दर्भाः

१. काव्यदर्शः, आचार्य दण्डी, २.१, चौखम्बा प्रकाशनम्, वाराणसी-२०००
२. काव्यप्रकाशः, आचार्य मम्मटः, अष्टमोल्लासः- ६७, चौखम्बा प्रकाशनम्, वाराणसी, वि.सं.-२०६७, पुनर्मुद्रणम्।
३. साहित्यदर्पणम्, आचार्यो विश्वनाथः, उ.-१०-१, चौखम्बा प्रकाशनम्, वाराणसी।
४. काव्यप्रकाशः, आचार्यमम्मटः, १, ४, चौखम्बाप्रकाशनम्, वाराणसी, वि.सं. -२०६७, पुनर्मुद्रणम्।
५. सहस्रशोहि महात्मभिरन्यैरलङ्कारप्रकाराः प्रकाशिता प्रकाश्यन्ते च ध्वन्यालोकः, प्रथमोद्योतः।
६. साहित्यदर्पणम्, आचार्य विश्वनाथः, दशमपरिच्छेदः।
७. सर्वशुक्लोत्तरा, वाणीं वयं वन्दामहे, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
८. सुरभारती विजयते, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
९. सुरभारती विजयते, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
१०. सर्वशुक्लोत्तरा, वाणीं वयं वन्दामहे, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
११. मधुपवृत्तिः, श्लोक, १, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
१२. काव्यप्रकाशः, आचार्य मम्मटः, १०, २६२ चौखम्बा प्रकाशनम्, वाराणसी, वि.सं.-२०६७, पुनर्मुद्रणम्।
१३. सर्वशुक्लोत्तरा, भारतजनताहम्, श्लोक-१, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
१४. अलङ्कारकौस्तुभम्, पण्डितविश्वेश्वर, सम्पादक-काशीनाथ पाण्डुरंग, निणर्यसागर प्रेस, मुम्बई, प्रथमसंस्करणम्-१९९८
१५. उज्जयिनीयं जयति, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
१६. तदेव
१७. साहित्यदर्पणम्, आचार्य विश्वनाथः, पृ.-२७७, E-learning and E-Sources of Sanskrit text,राष्ट्रियसंस्कृतसंस्थानम्, नव देहली।
१८. उज्जयिनीयं जयति, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
१९. अलङ्कारकौस्तुभम्, पण्डितविश्वेश्वर, सम्पादक-काशीनाथ पाण्डुरंग, निणर्यसागर प्रेस, मुम्बई, १८९८, पृ. ३७२

२०. भारतजनताऽहम्, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

२१. लोकतन्त्रेऽस्मिन्, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

२२. अलङ्कारकौस्तुभयम्, पण्डितविश्वेश्वर, सम्पादक-काशीनाथ पाण्डुरंग, निणर्यसागर प्रेस, मुम्बई, १८९८, पृ. २५०

२३. अलङ्कारसर्वस्वम्, आचार्यरुय्यकः

२४. मधुपवृत्तिः, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२५. मधुपवृत्तिः, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२६. अलङ्कारसर्वस्वम्, आचार्यरुय्यकः, पृ. ९५

२७. मधुपवृत्तिः, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

२८. काव्यप्रकाशः, संपादकः, रेरवाप्रसादद्विवेदी, बनारसहिन्दूविश्वविद्यालय, काशी, प्रथमसंस्करणम्-१९८१

२९. अभिनवहितोपदेशः, श्लोक-१८, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

३०. अभिनवहितोपदेशः, श्लोक-१९, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

३१. काव्यप्रकाशः, संपादकः, रेरवाप्रसादद्विवेदी, बनारसहिन्दूविश्वविद्यालय, काशी, प्रथमसंस्करणम्-१९८१

३२. अभिनवहितोपदेशः, श्लोक-४, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

३३. अलङ्कारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्।
उपमा कविवंशस्य मातेवेति मतिर्मम।। राजशेखरः

३४. काव्यप्रकाशः, १० उल्लासः, बनारसहिन्दूविश्वविद्यालय, काशी, प्रथमसंस्करणम्-१९८१

३५. उज्जयिनीयं जयति, श्लोक-६, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३६. भारतजनताऽहम्, श्लोक-४९, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

३७. काव्यप्रकाशः, नवम, दशमोल्लासौ, बनारसहिन्दूविश्वविद्यालय, काशी, प्रथमसंस्करणम्-१९८१
३८. तत्रैव
३९. उज्जयिनीयं जयति, श्लोक-५, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
४०. कुरुक्षेत्रे मशकदंशतोरक्षा, श्लोक-१, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
४१. अहं स्वतंत्रता भणामि, श्लोक-१५, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
४२. पाणिनीय शिक्षा, श्लोक-४१,४२
४३. छन्दशास्त्रम्, पिङ्गलाचार्यः, १५/१९०२३ प्रकाशनम्, राष्ट्रिसंस्कृतसंस्थानम्, नवदेहली-२०११
४४. स्वागतं पयोद ते, श्लोक-१, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
४५. छन्दः शास्त्रम् पृ. ५०
४६. द्र. छन्दःप्रभाकर पृ.५०
४७. भारतजनताऽहम्, श्लोक-४, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
४८. वृत्तरत्नाकर, तृतीयोऽध्यायः, पृ.-५२, आचार्य मधुसूदनशास्त्री, कृष्णदास अकादमी, वाराणसी।
४९. छन्दः शास्त्र, पिङ्गलाचार्य, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली-२०११
५०. सर्वशुक्लोत्तरा (का.सं.) 'तुरीनो' स्मृतिसपादशतकम्, श्लोक-११, आचार्यरमाकान्तशुक्लः, देववाणीपरिषद्, नई दिल्ली-२००८
५१. छन्दोऽलङ्कारसौरभम्, राजेन्द्रमिश्रः, पृ.-२६, अक्षवट प्रकाशनम्, इलाहाबाद, ५ संस्करणम्-२०११
५२. अहं स्वतन्त्रता भणामि, श्लोक-९, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
५३. वृत्तरत्नाकर, शास्त्री आचार्य मधुसूदन, तृतीयोऽध्याय-७९, कृष्णदास अकादमी बनारस, १९८२
५४. तस्य स्मृतिर्विजयते पुरुषोत्तमस्य, श्लोक-१, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

५५. वृत्तरत्नाकर, शास्त्री आचार्य मधुसूदन, तृतीयोऽध्याय-३८, कृष्णदास अकादमी बनारस, १९८२
५६. भारतस्य जनता समीक्षते, सर्वशुक्लोत्तरा, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
५७. छन्दोमञ्जरी, डॉ. कान्तागुप्ता (सम्पादिका), पृ.-५, ईस्टर्न बुक लिंकर्स, नई दिल्ली-१९८५
५८. सर्वशुक्लोत्तरा, कविसम्मेलनप्रस्तावना, श्लोक-१, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
५९. छन्दोऽलङ्कारसौरभम्, राजेन्द्रमिश्रः, अक्षवट प्रकाशनम्, इलाहाबाद, ५ संस्करणम्-२००१
६०. परमाण्वनुबन्धः, अन्तिमपद्यम्, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
६१. स्मरामिब्रह्मचारिणम्, श्लोक-१०, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
६२. छन्दोऽलङ्कारसौरभम्, राजेन्द्रमिश्रः, अक्षवट प्रकाशनम्, इलाहाबाद, ५ संस्करणम्-२००१
६३. अकालजलद, श्लोक-१, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८१
६४. Neeta, Hindi-English Dictionary, शास्त्री पाण्डेय, नीताप्रकाशनम्, साउथएक्स. नई दिल्ली-२००२
६५. वाणीं वयं वन्दामहे, मंगलपद्यम, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
६६. हिन्दी छन्द अलङ्कारः एक विवेचन, डॉ. संसारचन्द्र, पृ.-९१, हरियाणासाहित्यअकादमी, पंचकूला-२०००
६७. वरदेश्वराष्टकम् आचार्यरमाकान्तशुक्ल, देववाणीपरिषद्, नई दिल्ली-२००८
६८. सुरभारती विजयते, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
६९. छन्दः प्रभाकर(पु. ४९)
७०. महाकालमालिका, श्लोक-२, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८
७१. (छन्दः प्रभाकर पृष्ठ ६)

७२. राजस्थानम्, श्लोक-३, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

७३. Neeta, Hindi-English Dictionary (Hindi] English, San skrit) Sastri Pandey, नीताप्रकाशनम्, साउथ एक्स. नई दिल्ली-२००२

७४. स्वतन्त्रतायाः स्वर्णजयन्ती, श्लोक-१, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

७५. (छन्दःप्रभाकर पृ. ६८)Neeta, Hindi-English Dictionary (Hindi] English, Sanskrit) Sastri Pandey, नीता प्रकाशनम्, साउथ एक्स. नई दिल्ली-२००२

७६. वन्दनीयास्ते, श्लोक-१, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

७७. छन्दः प्रभाकर, माथुर जगन्नाथ प्रसाद, जगन्नाथ प्रिंटिग प्रेस, बिलासपुर।

७८. एकं सद बहुधा विलोक्यते भारतम्, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

७९. उर्दू हिन्दीशब्दकोश, मुहम्मद मुस्तफा खाँ 'मद्दाह' (सङ्कलनकर्त्ता), उत्तरप्रदेश हिन्दी संस्थान, चतुर्थसंस्करण-१९८2

८०. समीक्षाशास्त्र, पं. सीताराम चतुर्वेदी, पृ.-४५७, कालिदास अकादमी, वाराणसी।

८१. साहित्यवैभवम्, भट्ट श्री मथुरानाथशास्त्री 'मञ्जुनाथ', निर्णयसागर प्रेस, मुम्बई-१९३०

८२. मदीयकविते! कुरुष्वगानम्, श्लोक-१, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

८३. साहित्यवैभवम्, भट्ट श्री मथुरानाथशास्त्री 'मञ्जुनाथ', निर्णयसागर प्रेस, मुम्बई-१९३०

८४. निर्वाचने प्राप्ते, श्लोक-१२, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

८५. साहित्यवैभवम्, भट्ट श्री मथुरानाथशास्त्री 'मञ्जुनाथ', निर्णयसागर प्रेस, मुम्बई-१९३०

८६. यानावरोधो दुस्त्यजः, श्लोक-१, सर्वशुक्लोत्तरा, आचार्यरमाकान्तशुक्लः, देववाणी परिषद्, नई दिल्ली-२००८

८७. काव्यप्रकाशः, आचार्य मम्मटः, १-४, चौखम्बा प्रकाशनम्, वाराणसी, संस्करण-१३, २००८

८८. साहित्यदर्पणम्, आचार्य विश्वनाथ, ४.१, चौखम्बा प्रकाशनम्, वाराणसी।

८९. ध्वन्यालोकः, आचार्य आनन्दवर्धन, १.१३ (संपादक-आ. विश्वेश्वरः), ज्ञानमण्डल लि. वाराणसी-२००९

९०. तत्रैव, १.४

९१. वाक्यपदीयम्, आचार्यभतृहरिः, ब्रह्मकाण्डम्, श्लोक-96, चौखम्बाप्रकाशनम्, प्रथम संस्सकरणम्-१९९०

९२. ध्वन्यालोकः, आचार्यआनन्दवर्धन, १.१३ (संपादक-आ. विश्वेश्वरः), ज्ञानमण्डल लि. वाराणसी-२००६

९३. काव्यप्रकाशः, आचार्यमम्मटः, १-४, चौखम्बाप्रकाशनम्, वाराणसी

९४. भारत जनताऽहम्, सर्वशुक्लोत्तरा, आचार्यरमाकान्तशुक्ल, देववाणीपरिषद्, नई दिल्ली-२००८

९५. मदीप कविते कुरुष्व गानम्, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

९६. तदेव

९७. वन्द्यता काऽपि सा साशनासन्दिका, श्लोक-१, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

९८. मदीप कविते कुरुष्व गानम्, श्लोक-६, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

९९. तदेव, श्लोक-४

१००. विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः, काव्यप्रकाशः, ४ उल्लासः, नागेश्वरी टीका, पृ.-३३

१०१. नाट्यशास्त्रम्, भरतमुनिः।

१०२. वाणीं वयं वन्दामहे, श्लोक-१, सर्वशुक्लोत्तरा, आचार्यरमाकान्तशुक्ल, देववाणीपरिषद्, नई दिल्ली-२००८

१०३. अहं स्वतन्त्रता भणामि, श्लोक-१, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

१०४. ध्वन्यालोकः, आचार्यआनन्दवर्धनः, २.५ (संपादक-आ. विश्वेश्वरः), ज्ञानमण्डल लि. वाराणसी-२००९

१०५. साहित्यदर्पणः, विश्वनाथः, ९-१, चौखम्बा प्रकाशनम्, वाराणसी।

१०६. साहित्यदर्पणः, विश्वनाथः, ९-२, हिन्दीव्याख्या, शालिग्रामत्रिपाठी, मोतीलालबनारसीदास, नवम्संस्करणम्-१९७७ नई दिल्ली।

१०७. साहित्यदर्पणः, विश्वनाथः, ९-३, हिन्दी व्याख्या, शालिग्रामत्रिपाठी, मोतीलालबनारसीदास, नवम् संस्करण-१९७७ नई दिल्ली।

१०८. भारतजनताऽहम्, श्लोक-१, सर्वशुक्लोत्तरा, आचार्यरमाकान्तशुक्लः, देववाणी परिषद्, नई दिल्ली-२००८

१०९. भारतजनताऽहम्, श्लोक-१४, सर्वशुक्लोत्तरा, आचार्यरमाकान्तशुक्लः, देववाणी परिषद्, नई दिल्ली-२००

११०. राजस्थानम्, श्लोक-२, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

१११. फिलाडेल्फिया, श्लोक-१२, सर्वशुक्लोत्तरा, आचार्य रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

११२. साहित्यदर्पणः, विश्वनाथः, ९-४, हिन्दी व्याख्या, शालिग्राम त्रिपाठी, मोतीलाल बनारसीदास, नवम् संस्करण-१९७७ नई दिल्ली।

११३. जाबालिपुरं चल!, श्लोक-१, सर्वशुक्लोत्तरा, आचार्यरमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

११४. तत्रैव, श्लोक-३

११५. साहित्यदर्पणाद् साभारं, शृंगारप्रकाशः, भोजराजः।

११६. कारगिलवीराः, श्लोक-६, सर्वशुक्लोत्तरा, आचार्यरमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली-२००८

पञ्चमोऽध्यायः

सर्वशुक्लोत्तरायां प्रेरकसन्देशाः

५.१ सर्वशुक्लोत्तरायां युगबोधः

रमाकान्तशुक्लस्य सर्वशुक्लोत्तराकाव्यसङ्ग्रहः दीर्घ-मध्यम-लघ्वीनां रचनानां सङ्ग्रहः वर्तते। सङ्ग्रहेऽस्मिन् कवेः समकालस्य मधुरं कटुकं तिक्तञ्च वृत्तं प्रतिबिम्बितम्। एतासु कवितासु कविना स्वीया भावना उद्गीर्णा सहैव जनाकाङ्क्षाऽपि प्रतिबिम्बिता। कविः यत्र-यत्र गतः तत्र तत्र तस्य रचनाधर्मिताऽपि गता। सङ्ग्रहस्य प्रमुखं वैशिष्ट्यं वर्तते कवेः युगबोधः। बह्वीषु रचनासु कवेः वर्णनं प्रत्यक्षमिवाभाति, कवेः सामाजिकवर्णनं तु अभूतपूर्वमेव। कविः स्वीयसमाजस्य विविधगतिविधिषु स्वीयां लेखनीं चालयति। कवेः लेखनी सामाजिक-राजनीतिक-सांस्कृतिकवर्णने अतीव प्रौढा वर्तते, कवेः जनकल्याणभावनाऽपि सर्वोत्कृष्टा वर्तते, सामाजिकभेदभावनानां वर्णने कविः सिद्धहस्तोऽस्ति। कविः समाजस्य दर्पणं भवति, समाजे यत्किमपि घटते सः तत्सर्वमपि स्वीयरचनासु वर्णयति। एतदतिरिच्यापि कवेः स्वीयमूल्यानि भवन्ति। तस्य क्षमताकौशलं तज्जीवनदर्शनम्, तदभिव्यक्तिश्च तं विशिष्टाविशिष्टं करोति। कवेः युगबोधः सर्वशुक्लोत्तरायां प्रतिकवितां वर्तते, कवेः युगबोधः क्वचित् सामाजिकरूपेण, क्वचित् राष्ट्रियतासम्बद्धः क्वचिच्च राजनीतिपरको वर्तते।

भारतं विकासशीलं राष्ट्रं वर्तते। नैकाः समस्याः सुरसा इव विकरालमुखमुद्घाट्य अस्माकं सम्मुखे वर्तन्ते। तासु एका समस्या वर्तते यानावरोधस्य। देहल्याम् अनेन यानावरोधेन बहूनि कार्याणि विलम्बितानि भवन्ति विफलतां च यान्ति। कविना स्वीये काव्यसङ्ग्रहे यानावरोधसमस्यायाः वर्णनेन स्वीययुगबोधः प्रदर्शितोऽस्ति-

लाजवन्तीगार्डनं स्यात्स्यादथो धौलाकुआँ।
स्याच्च वा मायापुरी यानावरोधो दुस्त्यजः।।[१]

समस्तमपि विश्वं परमाणुशस्त्रसङ्ग्रहणे व्यस्तो वर्तते, परमाणुबाम्बनिर्माणस्य अहमहमिका वर्तते समग्रेष्वपि देशेषु। अखिलमपि ब्रह्माण्डं विद्वेषवह्निना तप्तं विद्यते, सर्वत्र अशान्तिः वर्तते, कविः एतत्तापशमनाय मेघं कामयते-

शस्त्रवह्नितापशामको भवेः पयोद हे!
द्वेषवह्नितापशामको भवेः पयोद हे!
शान्तिरस्तु सौख्यमस्तु सीकरैः पयोद! ते[२]**।।**

कविवरश्रीरमाकान्तशुक्ल-विरचितस्य 'सर्वशुक्लोत्तरा' इति काव्यसङ्ग्रहस्याधुनिकसंस्कृतसाहित्ये अनन्यं स्थानं विद्यते। काव्यसङ्ग्रहेऽस्मिन् नानाविषयान् सम्पादयन्त्यः कविताः सहृदयपाठकान् आह्लादयन्ति, शोधरतानां च छात्राणां दिग्दर्शनं कुर्वन्ति अन्ते तावत् समुदायस्य पथप्रदर्शनं विश्वोन्नतये, विश्वाभ्युदयाय स्वसमर्पणं कुर्वन्ति।

सर्वशुक्लोत्तरायां प्रभूततया सामाजिकं चिन्तनं दरीदृश्यते। कवेः सामाजिकयुगबोधः तात्कालिकसमाजस्य परिस्थितिं दर्शयति। "अहं स्वतन्त्रता भणामि" इति शीर्षके सम्पादितायां कवितायां सामाजिकभेदभावनानाम्, कुमार्गगामिकृत्यानाञ्च वर्णनं यथा-

जलं न लभ्यते तथा, यथा सुरा पदे-पदे,
वचांसि सन्ति भूरिशो, न हि क्रियाः पदे-पदे।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे,
इयं दशा समर्थनं किमर्हतीति चिन्त्यताम्।।
अहं स्वतंत्रता भणामि मद्वचो निशम्यताम्।।[३]

सुरापेयस्य पदार्थस्य अद्यत्वे एतावती वृद्धिर्जाता यत् जनाः जलं न तथा गृह्णन्ति यथा सुराम्। एतादृशी स्थितिः भारतस्य जायमाना वर्तते। जनाः, अधिकारिणः अथ च नेतारः केवलं डिण्डिमघोषेणोद्घोषयन्ति कर्मणि तेषां श्रद्धैव नास्ति।

पुनश्च समाजोन्नतये कथं कविः स्वचिन्तनं प्रस्तौति, तदपि नूनं अस्माभिः ग्राह्यमेव। तद्यथा-

न निर्धनो न निर्बलो, जनोऽत्र कोऽपि जायताम्,
न कस्यचित् समादरो विखण्डितश्च जायताम्।
निजावलम्बनं जने-जने सदा प्रवर्धताम्,
जनो जनोऽस्य भारतस्य मोदताम्, प्रमोदताम्॥[४]

आचार्यशुक्लमहोदयेन समाजे यदपि कृत्याऽकृत्यमनुभूतं तत् सर्वमपि स्वकवितामाध्यमेन सम्यक्तया प्रतिपादितम्। अधुना सर्वत्र क्षेत्रवाद-जातिवाद-बन्धुवाद-राज्यवादादि स्वार्थपरात्मकव्यवहारः दरीदृश्यते।

सर्वकारीयक्षेत्रे सुयोग्याः कार्यशीलाश्च जनाः पदच्युता भवन्ति, तथा च अयोग्याः पदोन्नतिं प्राप्नुवन्ति। इमां स्थितिं दृष्ट्वा कविराजः स्वकवितायां तद् दुर्दशां वर्णयति-

अयोग्यता पदोन्नता, सुयोग्यता पदच्युता,
अमोघलाभकारिणी मता च चाटुकारिता
इयं स्थितिर्विलोक्यते यदा, तदा मम स्थितिः,
सुपुष्टतां भजेत्कथं भवद्भिरेव कथ्यताम्॥[५]

सामाजिक-अन्यायः, दुर्व्यवहारः, अकृत्यम्, पैशाचवृत्तिः, हत्या, बलात्काराः इत्यादीनि दुष्कृत्यानि दृष्ट्वा कवेः हृदयं दुःखितञ्जायते सहसा तन्मुखात् 'रौति ते भारतम्'' कविता श्रूयते, तत्र च -

वृत्तपत्रेषु नित्यं बलात्कारिणां,
निन्द्यपैशाचकृत्यानि पश्यत् पठत्।
किञ्च हत्यापहारादिगाथा वहत्
रौति ते भारतं रौति ते भारतम्॥[६]

वृत्तिहीनता अद्य भारते सुरसाया इव मुखं व्यादाय समस्यारूपेण उच्चशिक्षार्जितानां यूनां समक्षं संतिष्ठते। कविवरशुक्लमहोदयाः युवमानसं सम्यगवगच्छन्ति नो चेत् एतादृशं वर्तमानकालिकं वर्णनं कदाचित्ते न कुर्युः। तद्यथा-

उच्चशिक्षां समाप्यापि वृत्त्यर्जने न क्षमो जायते यत्र यूनां गणः।
यत्र कुत्रापि वृत्त्यर्थमाहिण्डते रौति तद् भारतं रौति तद् भारतम्॥[७]

वृत्तिहीनतायाः कारणेनैव अद्य चौरकार्यम्, प्रवञ्चनम्, आतङ्कवादादि अनेकानि दुष्कृत्यानि जायन्ते।

भारते अनेकानि राज्यानि, नैकाः भाषाः, अनेके आचार-विचाराः, अनेकाः पद्धतयः, अनेकजातयः, रूप-वर्ण-लिङ्गादि अनेकतायामपि भारतराष्ट्रम् अभिन्नं वर्तते। 'एकं सद् बहुधा विलोक्यते भारतम्' इति कवितायां भारतस्य एकताया अखण्डतायाश्च वर्णनं सुविदितमेव -

भिन्नमस्तु भाषाभूषासु पदे-पदे
भिन्नमस्तु लोकाचारेषु पदे-पदे।
भिन्नमस्तु पूजापद्धतिषु पदे-पदे
आत्मन्येकमभिन्नमस्ति मे भारतम्॥[८]

साम्प्रतिकी राजनीतिरपि दूषिता, या च शासनासन्दिका साऽपि कलुषिता एव, सा स्वकीयं स्वार्थमेव साधयन्ती दृष्टिपथं समायाति। वर्तमानार्थनीतौ अपि कवेः व्यङ्ग्यप्रदायिनी दृष्टिः वन्द्यतां-वन्द्यतामेव भणति। सा शासनासन्दिका तु वञ्चनेष्वेव पतिता वर्तते इयं तु छन्ददात्रीं जनतां पीडयति सर्वदा। तस्यामासन्दिकायाम् उपविश्य तु अक्षरज्ञानशून्या अपि विद्वांसो जायन्ते, कविः अत्यन्ततिरस्कृतवाच्यध्वनौ वर्णयति -

धर्मकामार्थमोक्षोपदेशाकराः
सर्वविद्याचणाः सत्कलाचुञ्चवः।
अक्षरज्ञानशून्याः अपि स्युर्यया
वन्द्यतां काऽपि सा शासनासन्दिका॥[९]

एतस्यामवस्थायां पतितमपि अस्माकम् भारतं खलु विशिष्टमेव यतः प्रजातन्त्रे सङ्कटे पतिते सति सकलमेव भारतं गर्जति -

क्वापि पतति सङ्कटे प्रजातन्त्रं यदा
अवरुध्यते जनानां कण्ठो वा यदा।
सर्वातङ्कभयाशङ्काः परिहृत्य वै
गर्जति सकलं समुज्ज्वलं मे भारतम्॥[१०]

डॉ.शुक्लस्य भारतजनता अभिमानधना, शालीना, सुविवेका, ज्ञानधना, रसभरिता उत्सवप्रिया, श्रमप्रिया, देशाटनप्रिया, करुणार्द्रा, रसिका च वर्तते -

अभिमानधना विनयोपेता
शालीना भारत जनताहम्।
कुलिशादपि कठिना कुसुमादपि-
सुकुमारा भारतजनताऽहम्॥[११]

साहित्यं समाजस्य दर्पणं भवति, समाजे यत्किमपि घटते तस्य कवितामाध्यमेन प्रकटनमेव कवेः कर्म भवति। कविवररमाकान्तशुक्लमहोदयस्य कवितायां या मार्मिकता वर्तते सा तु सहृदयपाठकान् पाठं पाठम् अनुरञ्जयति, कविवरस्य कवितासु एका नवचेतना एकः नवसन्देशश्चापि स्पष्टमवलोक्यते, सर्वशुक्लोत्तरायां कविना समाजस्य स्पष्टस्थितिः प्रतिपादिता। कवितानामध्यनेन विनूतनं चित्रं सम्मुखं समायाति, कविवरस्य कवितासु युगबोधः स्पष्टतया लक्ष्यते। तद्युगीनसङ्कल्पनायाः परिकल्पनायाश्च दर्शनं सर्वशुक्लोत्तरायां हृदयाह्लादकरमेव।

अद्यतनी राजनीतिरपि भ्रष्टाचारपङ्के निमग्ना वर्तते, स्वार्थान्धाः सन्तः आत्मिकमेव चिन्तनं कुर्वन्ति नेतारः, देशलुण्ठने संलग्नानां नेतॄणां संख्या अगणिता एव -

देशसेवा लुण्ठनापर्यायभूता वो मते।
किं न पश्यथ नैजचरितं? वदत नेतारो मनाक्॥[12]

आतङ्कवादविभीषिकया सन्त्रस्तः अद्यतनसमाजः, चतुर्दिक्षु आतङ्कवादः व्याप्तः, निरीहाणां हननं स्वार्थसिद्धिश्च एतेषां परममुद्देश्यम्। कवेः विहङ्गमा दृष्टिः आतङ्कवादनिवारणे मङ्गलकामनां प्रयच्छति-

योऽयमातङ्कवादः खलानां खलः
पूजितो मुह्यमानो जगद् बाधते।
आयतौ नैव कीर्तिं जयं चाप्नुयात्
नूतने वत्सरे वो भवेन्मङ्गलम्॥[13]

देशद्रोहिणः देशं वञ्चयन्ति, यस्मिन् देशे वसन्ति तद्हननमेव तेषां परमं कर्त्तव्यम्। स्वीयदेशस्य सूचनां शत्रुराष्ट्राय ददति। कवेः रचनासु राष्ट्रभक्तिसमन्वितः युगबोधः प्रस्तुतः। तद्यथा -

कः करोति शठपादचुम्बनं सूचनां ददति के च शत्रवे।
मन्वते च किल के भुवं प्रसूं भारतस्य जनता निरीक्षते॥[14]

यौतुकसमस्यया ग्रस्तो भारतदेशः रोदिति। कविना स्वकाव्ये यौतुकसमस्यायाः वर्णनमपि सम्पादितम्।

यौतुकप्रेप्सुभिर्लोलुपैर्निन्दितैः ,
मर्त्यरूपे स्थितैः राक्षसैः कौटिकैः।
दह्यमाना वधूर्वीक्ष्य दुःखेन हा
रौति ते भारतं रौति ते भारतम्॥[१५]

यौतुकलोलुपानां दुष्कृत्यमसहनीयं विद्यते, दह्यमानां वधूं वीक्ष्य सकलं भारतं रौति। वृत्तिहीनता यूनां कृते दुःस्थितिमुत्पादयति। उच्च शिक्षां समाप्यापि युवानः वृत्तिं न लभन्ते। वृत्तिहीनतायाः वर्णनं सम्पाद्य कविना स्वीययुगबोधः प्रदर्शितः। सर्वशुक्लोत्तरायां भारतं व्याप्यमानाः सर्वाः अपि दुरवस्थाः कविना वर्णिताः, लघु-लघु बालाः भिक्षायै अटन्तः रेलयानादिषु दृश्यन्ते, क्वचित् रक्षकाः एव भक्षकाः जाताः, असमये वृष्टिः, प्रकृतेः प्रकोपः इत्यादिषु विषयेषु सर्वशुक्लोत्तरायां वर्णनं प्राप्यते।

अखिलभुवने व्याप्यमाना विषयाः कविना स्वीयरचनासु वर्णिताः, सर्वशुक्लोत्तरायां वर्णिताः कविताः समकालिकं युगबोधं सहजतयैव साक्षात् कुर्वन्ति। कविः समाजस्य दर्पणं भवति, सामाजिककृत्याऽकृत्यं वर्णयितुं सः स्वीयया सशक्तलेखन्या प्रयासरतो भवति। कविना रमाकान्तशुक्लेनाऽपि सामाजिककृत्याकृत्यं सर्वमपि सर्वशुक्लोत्तरायां सङ्कलितम्, सामाजिक-भेदभावनानां वर्णने कविः सिद्धहस्तोऽस्ति, तस्य कवितापठनेन युगबोधः सहजतयैव भवति। विविधाः समस्या तेन लेखन्या उट्टङ्किताः। वैश्विकसंहारकाणि शस्त्राण्यपि तस्य कवितासु वर्णितानि, सामाजिकदुर्भावना अपि तेन सरलतया वर्णिता। अतः वक्तुं शक्यते यत् कवेः युगबोधः असाधारणः वर्तते।

५.२ सर्वशुक्लोत्तरायां सूक्तिविधानम्

संस्कृत-साहित्ये सूक्तिपरम्परा बहुप्राचीना विशाला च वर्तते। संस्कृतस्य प्रत्येकमपि काव्ये अलभ्यानि सूक्तिरत्नानि सूक्तिसमृद्धिं प्रदर्शयन्ति। प्राचीनं संस्कृतसाहित्यम् अनया दृष्ट्या अत्यन्तं समृद्धं विद्यते। कस्यापि भूभागस्य जातीयजीवने, लोकसंस्कृतेः लोकसाहित्यस्य च विशिष्टं महत्त्वं भवति। लोकजीवने प्रसृतैः अनन्तैः लोकाचार-संस्कार-विश्वास-परम्परादितत्त्वैः

विचारैश्च अस्माकं संस्कृतेः स्वरूपं परिपुष्टं जायते। सूक्तिः लोकोक्तिनाम्नाऽपि ज्ञायते, परं द्वयोर्मध्ये अर्थवैभिन्न्यं वर्तते। **'न ऋते श्रान्तस्य सख्याय देवाः'** ऋग्वेदस्यास्यां सूक्तौ लोकोक्तेः मूलं विद्यते। संस्कृतसाहित्ये लोकोक्तिः सूक्तेः मूलरूपात्मिका विद्यते। सुष्ठुतया कथितमेव कथनं सुभाषितं कथ्यते– **सुष्ठु भाषितं सुभाषितम्**। एकस्मिन् सुभाषिते सूक्तिः रत्नरूपा कथिता – **'पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्'**''[१६]

सूक्तेः सामान्यार्थः वर्तते – सौष्ठवपूर्णं कथनम्। यथा वैदिकमंत्रसमूहः 'सूक्तं' कथ्यते[१७] तथैव संस्कृतकवीनां वाणी सूक्तिः कथ्यते।[१८] संस्कृतसूक्तिः व्यापिका वर्तते लोकोक्तिश्च सङ्कुचिता। लोकोक्तीनां सूक्तौ अन्तर्भावो भवति, लोककल्याणाय उक्तिः लोकोक्तिः लोकप्रचलिता उक्तिः लोकोक्तिः। लोकोक्तिः सामान्यजनसमवायस्य अकृत्रिमोक्तिः भवति परं सूक्तिः साहित्यिकगुणपरिपूर्णा भवति। संस्कृतसूक्तयः मूलतः वेदेषु उपलब्धाः सन्ति।

संस्कृतकवयः सूक्तीनां माध्यमेन समाजे प्रेरणास्पदं सन्ति। संस्कृतसूक्तीनां लोकप्रियतायाः कारणेनैव अनेकानि सङ्कलनानि अद्यावधि जातानि। सूक्तयः सारगर्भिताः, मधुराः सरसाश्च भवन्ति। सूक्तिः स्वीये लघुभूते आकारेऽपि उपयोगपूर्णं व्यावहारिकं नैतिकञ्च सन्देशं प्रयच्छति। सूक्तीनां प्रशंसनार्थमपि इयं सूक्तिः प्रसिद्धाऽस्ति –

तस्माद् हि काव्यं मधुरं तस्मादपि सुभाषितम्[१९]

सूक्तिः भारतस्य सांस्कृतिकं, सामाजिकं नैतिकञ्च चिन्तनं प्रस्तौति, समाजस्य शुभचिन्तिका वर्तते इयम्। मानवमभिप्रेरयितुं सूक्तेः वर्णनं कवीनां मनीषा वर्तते।

प्रस्तुतेऽस्मिन् ग्रन्थे – 'सर्वशुक्लोत्तरायां' सूक्तिविधानम् इत्यस्मिन् खण्डे कवेः रमाकान्तशुक्लस्य सुभाषितानां वर्णनं करिष्यते तेषां सङ्कलनं प्रस्तूयते। वस्तुतस्तु कवेः प्रायशः रचनाः एव सूक्तिभूताः प्रतिभान्ति तथापि अत्र कासाञ्चिद् विशिष्टसूक्तीनां परिचयः प्रस्तोष्यते।

१. द्वन्द्व एव जीवनं नु[२०]!

इयं सूक्तिः कविना 'स्वागतं पयोद ते' काव्ये प्रस्तुता, इयं कविता मेघस्य द्वन्द्वभूतं जीवनं प्रस्तौति। मानवजीवनं तु द्वन्द्वे एव याप्यते, कदाचित्

सुखदुःखात्मकं द्वन्द्वम्, कदाचित् कर्तव्याकर्तव्यात्मकम्, कदाचिच्च इच्छाऽनिच्छा रूपात्मकं द्वन्द्वं मानवं श्रेष्ठतरं कुरुते। आगते द्वन्द्वे चिन्ता न करणीया द्वन्द्वं तु जीवनेन सहैव चलति। अनेन कविः सन्देष्टुं प्रवृत्तोऽस्ति यत् द्वन्द्वे सति चिन्तनं करणीयं न तु चिन्ता, सत्कर्मणा सदाचारेण च द्वन्द्वान्मुक्तिः प्राप्यते। कवेः प्रेरणा कर्ताव्याकर्ताव्ययोः द्वन्द्वे सति निर्णयो गृहीतव्यः, चिन्ता नहि।

२. जीवनं विश्वसम्पद्बुधैरुच्यते[२१]

विश्वस्य सम्पत्तिभूतमिदं जीवनं विश्वकल्याणाय स्यात्। यादृशं जीवनम् अस्माभिः जीव्यते तादृशमेव अस्माकं चिन्तनं भवति, जीवनस्य रक्षा सर्वतः प्राक् करणीया, यदि इयं सम्पत्तिः गता तर्हि सर्वमपि व्यपगतम्, प्रत्येकं मानवस्य परमं कर्त्तव्यं यत् तज्जीवनं शुभाय स्यात्।

३. अविश्वस्ते न विश्वासो विधेयो जातुचिद्विदुषा[२२]

अनया सूक्त्या कविः अस्मान् शिक्षयति यत् अविश्वस्तपुरुषे कदापि विश्वासः न करणीयः तादृशस्तु विषकुम्भं पयोमुखमिव आचरति। विद्वांसस्तु सरलाः भवन्ति, सुचरित्राः भवन्ति अतः कवेः मनीषा तान् जागरयितुकामा वर्तते, यदि अविश्वस्ते विश्वासः क्रियते तर्हि सः नाशाय भवति। अतः मानवेन विश्वस्तेन साकमेव मित्रता सम्पादनीया, भारतेन अविश्वस्ते पाकिस्तान-देशे विश्वासः कृतः परं तेन कारगिलयुद्धरूपेण तस्य परिणामः प्रदत्तः।

४. शठे शाठ्यं विधेयम्[२३]

शठेन साकं यदि शठता न विधास्यते तर्हि सः समूलनाशाय कारणं भविष्यति। शठाः शठतया एव उपकरणीयाः न चाऽन्येन व्यवहारेण। समयानुरूपं वर्तते कवेरयं सन्देशः। अस्माकं परम्परायां तु 'अहिंसा परमो धर्म' आसीत् परं सः कालः गतः, यदि समयानुगुणं न व्यवह्रियते चेत् हानिरेव प्राप्स्यते। अतः शठे शाठ्यं विधेयम्।

५. दुर्जनः शाम्येन्न चोपकृतैः[२४]

दुर्जनेन सह यदि व्यवहारः साध्यते तदा दुर्जनता एव प्राप्यते। दुर्जनः विद्याविभूषितोऽपि परिहर्तव्य एव। तथा हि-

दुर्जनः परिहर्त्तव्यो विद्ययाऽलङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥[२५]

इयमुक्तिः सूक्तिमिमां प्रमाणयति, वस्ततुस्तु दुर्जनेन सह व्यवहारः नैव करणीयः। दुर्जनस्य उपकारेण सः शान्तिमधिगच्छति, कवेरियमुक्तिः विशेषसन्दर्भे वर्तते। कार्गिलयुद्धे अस्माकं वीरसैनिकानां निर्दयर्तापूर्वकं हननं पाकसैनिकैः कृतमासीत्। कवेः चिन्तनं तु आततायिनां वधार्थं विद्यते, अतोऽग्रेऽपि तेन वर्णितम्- **'वधार्हश्चाततायी'**। महाकविना कालिदासेन कुमारसम्भवे वर्णितं - **'शाम्येत् प्रत्यकारेण नोपकारेण दुर्जनः'** हिन्दी भाषायाः इयं लोकोक्तिरपि प्रसिद्धा - **'लात के भूत बात से नहीं मानते'** अतः दुर्जनस्य कृते तावानुपकारः नापेक्षितः अतः समयानुगुणं मानवेन आचरणीयम्।

६. शपथान्मनाक् प्रचलन्ति नो सत्यव्रताः[२६]

सत्यव्रताः विद्वांसः प्रतिज्ञाया मनागपि न विचलन्ति, शपथं स्वीकृत्य तत्पूर्तये मानवेन यत्नो विधेयः यदि सत्कार्याय, लोककल्याणाय च प्रतिज्ञा स्वीक्रियते चेत् तत्पूर्तये भगवान् स्वयमेव सहायतां करोति, सत्यव्रता ये भवन्ति तेषामयं स्वाभाविकः गुणः तेषां मूल्यं भवति 'शपथात् अविचलनं' रामराज्यस्य विषये इयं लोकोक्तिः इमां सूक्तिं प्रमाणयति - **'प्राण जाइ पर वचन न जाई'** एकदा शपथः स्वीकृतश्चेत् प्राणपणेनाऽपि तस्य रक्षा विधया इत्येव कवेः मनीषा। शपथस्य भेत्ता जीवन्मृतः कथ्यते।

७. मा कश्चिदपि धरित्र्याः क्लेशं वर्धिष्णुरस्तु कुत्राऽपि[२७]

इयं सूक्तिः जननी जन्मभूमिश्च स्वर्गादपि गरीयसी सूक्तेः भावान् स्मारयति। अस्माकं जन्मभूमिः सर्वप्रिया भवति। मातृभूमेः साकं अस्माकं स्नेहाधिक्यं भवति। धरित्र्याः सम्माननमेव अस्माकं परमं लक्ष्यं स्यात्। मातृभूमिः पञ्चमातृषु अन्यतमा भवति, यत्र अस्माभिः सर्वमपि साधिष्ठं कर्म सम्पाद्यते तस्य सम्माननं प्राणपणेनाऽपि करणीयम्। धरित्र्याः क्लेशः सम्पाद्यते तस्य सम्माननं प्राणपणेनाऽपि करणीयम्। धरित्र्याः क्लेशं वर्धिष्णुना दण्डपात्रेण भाव्यम्। ऋग्वेदेऽपि पृथिवी मातृरूपा कथिता -

माता पृथिवी महीयम् - ऋग्वेद (संस्कृतलोकोक्तिकोशः)

माता भूमिः पुत्रोऽहं पृथिव्याः[२८]

प्रत्येकमपि मानवस्येदं परमं कर्त्तव्यं यत् मातृभूमेः कल्याणाय सर्वविधं चिन्तनं कुर्यात्।

८. सर्वे भवन्तु सुखिनः सर्वे स्वस्थास्तथा सन्तु[२९]

कवी रमाकान्तशुक्लः सर्वजनकल्याणमिच्छन् विश्वबन्धुत्वं वाञ्छति, कवेः सर्वास्वपि रचनासु विश्वबन्धुत्वस्य कामना विद्यते। सर्वे स्वीयमनोवाञ्छितं फलं प्राप्नुयुः इत्येव कवे सन्देशः शुभकामना च।

९. न वैरं शाम्यते वैरेण[३०]

वैरस्यौषधिः वर्तते मित्रता, यतो हि वैरेण कदापि वैरशमनं नैव भवति, एकपक्षतः वैरं सम्पाद्यते चेत् अपरतोऽपि वैरमेव भविष्यति अतः वैरस्य निराकरणाय वैरं त्याज्यं भवति। शुभाचरणमेव तदोपशमने श्रेयस्करं भवति, कवेः उपदेशः मानवानां सन्मार्गप्रवृत्तिं जागरयिष्यत्येव, मानवेषु मानवीयगुणानां विकासः स्यात् तदर्थं कवेः सदुपदेशः सन्देशश्च वर्तते।

१०. मैत्री सन्नृणां पुण्या[३१]

सत्पुरुषाणां मैत्री सुखदा पुण्यप्रदा च भवति, खलानां मैत्री तु कष्टदा एव भवति सर्वदा, खलेन साकं मैत्री न चिरेण तिष्ठति। उत्तररामचरितेऽपि सतां मैत्री पुण्यदा एव कथिता **"सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति"**[३२] सत्पुरुषाः सम्पत्तौ विपत्तौ च एकरूपत्वमेवाचरन्ति। सज्जनानां व्यवहारः चरित्रञ्च श्लाघनीयं जायते। अतएव कवेरयं सन्देशः लोकहितं साधयिष्यति।

११. श्रमेण सत्येन च सिद्धिराप्यते[३३]

सर्वाण्यपि कार्याणि उद्यमेनैव सिद्ध्यन्ति मनोरथेन च न किमति साधयितुं शक्यते, सत्येन तथा जनरञ्जनं तु नैव कर्तुं शक्यते परं सत्यं कष्टस्य भूषणं भवति। महाभारते उक्तमस्ति यत् - **"अश्वमेधसहस्राद् हि सत्यमेव विशिष्यते"**[३४] अनेन सत्यस्य सीमाङ्कनं महत्त्वं च स्थापयितुं शक्यते। सत्यश्रमयोः सम्मिलितप्रयासः स्यात्, तदा अवश्यमेव कठिनान्यपि कार्याणि सहजतया साधयितुं शक्यन्ते। कवेः सन्देशः कर्मणि निष्ठार्थं वर्तते। कवेराशयः यत्- धर्माचरणपूर्वकम् उद्यमेन उद्देश्यप्राप्तये प्रयत्नाः क्रियन्ते चेन्नूनमेव साफल्यमवाप्यते। अयं कवेः अभिनवहितोपदेशः यत् यस्मिन् कस्मिन्नपि व्यवसाये वयं भवामः तत्र सत्यनिष्ठया कार्यसम्पादनेन सिद्धिरवाप्यते, प्रसिद्धिरपि प्राप्यते।

१२. वदन्त्यखण्डाभिरुचिं यशस्यथो स्वभावसिद्धं महतां सुलक्षणम्[३५]

यशसि अखण्डाभिरुचिः महात्मनां स्वभावासिद्धं लक्षणं भवति, येनोद्यमं सम्पाद्यते यशःप्राप्तिरपि तस्य सुफलं तेनाकाङ्क्षते एव। काव्यप्रयोजनेष्वपि यशप्राप्तिः प्रथममेव प्रयोजनं वर्तते। तद्यथा-

काव्यं यशसेऽर्थकृते..................................॥[३६]

काव्यकरणेन पठनेन च यशप्राप्तिः नूनमेव, न केवलं काव्येनैव यशःप्राप्तिरपितु अन्यैरपि कार्यैः यशःप्राप्तिः भवति, तत्राऽपि महतां यशःप्राप्तये प्रयासः नूनमेव अनुकूलः। यशःप्राप्तिस्तु स्वाभाविकी प्रवृत्तिः, प्रतिष्ठारहितेन जीवनेन कः लाभ? अनया सूक्त्या कार्यम्प्रति प्रेरयति कविः, कवेः प्रेरणया यशस्विनो भवन्तु सर्वे इत्येव कामना। उक्तमपि - **'यशसि चाभिरुचिर्व्यसनं श्रुतौ।'** इत्यादि।

१३. नहि चञ्चलानां काऽपि स्थितिः सुरुचिरा भवतीह लोके[३७]

चञ्चलमानवानां इह जगति न काऽपि स्थितिः भवति। एकस्मिन् क्षणे ते अत्र भवन्ति अपरस्मिन्नेव क्षणे ते अन्यत्र भवन्ति। चञ्चलस्वभावानां मनः एकस्मिन् कर्मणि न तिष्ठति। चञ्चलस्वभावाः किमपि कार्यं सम्यक्तया कर्तुं न पारयन्ति, कार्यसाधने धैर्यस्यावश्यकता भवति। कस्यापि लक्ष्यप्राप्तये बहूनामुद्देश्यानामावश्यकता भवति, तानि, चोद्देश्यानि धैर्यसाधितानि भवन्ति। अतः धैर्यसम्पादनार्थं चञ्चलता त्यक्तव्या, सहैव रुचिरपि तस्मिन् कार्ये महती आवश्यकी, मधुपवृत्तेः त्यागेनैव लोके सुरुचिः आयाति। कविना यः सन्देशः प्रदत्तः तत्र स्वीय यशःस्थापने मधुपवृत्तिः अवरोधरूपा वर्तते।

१४. स्तोकं बहु नैव किमिति गृह्यते त्वया[३८]

अल्पेन कथनेन बहुग्रहणस्य क्षमता श्रोतृषु स्यान्नवेति। परं ये भवन्ति विज्ञाः ते तु अल्पेनैव बहु गृहणन्ति नैषधकारेणाऽपि निगदितम् -

''झटिति पराशयवेदिनो हि विज्ञाः''[३९] संस्कृत-व्याकरणस्य भावगाम्भीर्य प्रयोजनमेव वर्तते। कवेः सन्देशः सामान्येनाऽपि पाठकेन मानवेन वा स्तोकेनैव बहु ग्रहणस्य वर्तते। कवेः मेघप्रबोधनसन्दर्भे कथितं प्रबोधनमेतत्। परं मेघमाध्यमेन सः पाठकवर्गं ज्ञापयति स्वीयं सन्देशम्।

सर्वशुक्लोत्तरायां वस्तुतस्तु सूक्तीनां भाण्डागारं वर्तते। कवेः कथनशैली एव सूक्तिपरका वर्तते यथा 'उत्तरमङ्गलम्' शीर्षकान्विता रचना – सूक्तिशैल्याः एव कारणभूताऽस्ति। कवे कथनं **"नूतने वत्सरे ते भवेन्मङ्गलम्"** सूक्तिमेव व्यञ्जयति। वन्द्यतां काऽपि सा शासनासन्दिका, मदीयकविते कुरुष्व गानम्, रौति ते भारतम् इत्यादयः कविता अपि सूक्तिशैल्या लिखितास्सन्ति, अत्र प्रमुखाणामेव सूक्तीनां सङ्कलनं कृतमस्ति गवेषकेण।

कवेः सूक्तिविधानं विशिष्टं वर्तते, अस्मिन् काव्यसङ्ग्रहे चतुःषष्टि कवितास्सन्ति सर्वा अपि कविता भिन्नाः सन्ति वर्णनभेदेन शीर्षकभेदेनाऽपि। कविना प्रसङ्गानुरूपं सूक्तिचयनं कृतमस्ति यच्च हृदयावर्जकमेव।



सन्दर्भाः

१. सर्वशुक्लोत्तरा, यानावरोधो दुस्त्यजः, श्लोक-१, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

२. सर्वशुक्लोत्तरा, स्वागतं पयोद! ते, श्लोक-१३, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

३. सर्वशुक्लोत्तरा, अहं स्वतन्त्रता भणामि, श्लोक-९, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

४. सर्वशुक्लोत्तरा, अहं स्वतन्त्रता भणामि, श्लोक-१६, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

५. सर्वशुक्लोत्तरा, अहं स्वतन्त्रता भणामि, श्लोक-११, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

६. सर्वशुक्लोत्तरा, रौति ते भारतम्, श्लोक-४, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

७. सर्वशुक्लोत्तरा, रौति ते भारतम्, श्लोक-९, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

८. सर्वशुक्लोत्तरा, एकं सद् बहुधा विलोक्यते भारतम्!, श्लोक-३, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

९. सर्वशुक्लोत्तरा, वन्द्यतां काऽपि सा शासनासन्दिका!, श्लोक-७, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

१०. सर्वशुक्लोत्तरा, एकं सद् बहुधा विलोक्यते भारतम्!, श्लोक-७, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

११. सर्वशुक्लोत्तरा, भारतजनताहम्, श्लोक-१, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

१२. सर्वशुक्लोत्तरा, वदत नेतारो मनाक्, श्लोक-२६, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

१३. सर्वशुक्लोत्तरा, योऽयमातङ्कवादः, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

१४. सर्वशुक्लोत्तरा, भारतस्य जनता समीक्षते, श्लोक-१४, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

१५. सर्वशुक्लोत्तरा, रौति ते भारतम्!, श्लोक-६, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

१६. चाणक्य, संस्कृतलोकोक्तिकोशः, शशि तिवारी, सूचना एवं प्रसारण मन्त्रालय, भारत सरकार-२००८

१७. प्रतिसूक्तानि हर्यतम्, ऋग्वेद-१/९३/१

१८. दण्डी, काव्यादर्शः, १/३४, राजशेखर काव्यमीमांसा-३

१९. भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती।
तस्माद् हि काव्यं मधुरं तस्मादपि सुभाषितम्।। संस्कृतलोकोक्तिकोशः, शशितिवारी, सूचना एवं प्रसारणमन्त्रालय, भारत सरकार-२००८

२०. सर्वशुक्लोत्तरा, स्वांगतं पयोद! ते, डॉ. रमाकान्तशुक्ल, देववाणीपरिषद्, नई दिल्ली।

२१. सर्वशुक्लोत्तरा, उत्तरमङ्गलम्, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

२२. सर्वशुक्लोत्तरा, प्रणम्याः कारगिलवीराः, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

२३. तदेव

२४. तदेव

२५. भतृहरि, हितोपदेश-साभारम्-संस्कृतलोकोक्तिकोशः, शशि तिवारी, सूचना एवं प्रसारण मन्त्रालय, भारत सरकार-२००८

२६. सर्वशुक्लोत्तरा, प्रणम्याः कारगिलवीराः, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

२७. सर्वशुक्लोत्तरा, तुरीनोस्मृतिसपादशतकम्, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।

२८. साभारम्-संस्कृतलोकोक्तिकोशः, शशि तिवारी, सूचना एवं प्रसारण मन्त्रालय, भारत सरकार-२००८
२९. सर्वशुक्लोत्तरा, तुरीनोस्मृतिसपादशतकम्, डॉ. रमाकान्तशुक्ल, देववाणी-परिषद्, नई दिल्ली।
३०. सर्वशुक्लोत्तरा, निर्वाचने प्राप्ते, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
३१. तदेव
३२. संस्कृतलोकोक्तिकोशः, शशि तिवारी, सूचना एवं प्रसारण मन्त्रालय, भारत सरकार-२००८
३३. महाभारतम्, साभारं गृहीतम्-संस्कृतलोकोक्तिकोशः, शशि तिवारी, सूचना एवं प्रसारण मन्त्रालय, भारत सरकार-२००८
३४. सर्वशुक्लोत्तरा, अभिनवहितोपदेशः, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
३५. तत्रैव
३६. काव्यप्रकाशः, आचार्य मम्मटः, प्रथमोल्लासः, चौखम्बा प्रकाशनम्, वाराणसी।
३७. सर्वशुक्लोत्तरा, मधुपवृत्तिः, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
३८. सर्वशुक्लोत्तरा, मेघप्रबोधनम्, डॉ. रमाकान्तशुक्ल, देववाणी परिषद्, नई दिल्ली।
३९. नैषधीयचरितम् - ४/२२६

उपसंहारः

श्रीरमाकान्तशुक्लस्य सर्वशुक्लोत्तरा–काव्यसङ्ग्रहः २००८ तमे ख्रैष्टाब्दे सङ्ग्रहीतः, अयं काव्यसङ्ग्रहः 'सर्वशुक्ला' काव्यसङ्ग्रहस्यानन्तरमागतः इत्यतः अस्य नाम 'सर्वशुक्लोत्तरा' जातम्। सर्वं शुक्लस्य अस्ति यस्यां पुस्तिकायां सा सर्वशुक्ला, सर्वशुक्लोत्तरायाः अनन्तरं लिखिता सङ्गृहीता वा सा सर्वशुक्लोत्तरा, सर्वशुक्ला अर्थात् सरस्वती, अस्मिन् काव्यसङ्कलने कविवरस्य अष्टषष्टिः स्फुटरचनाः विद्यन्ते। अस्मै कवितासङ्कनाय २०११ तमवर्षीयः – भारतीयविद्याभवनस्य 'कौस्तुभ' पुरस्कारः प्रदीयत। उत्तरप्रदेशसंस्कृतसंस्थानस्य २००१ तमवर्षीयोः विशिष्टपुरस्कारोऽपि सर्वशुक्लोत्तराय प्रादीयत।

कविवरस्य काव्ययात्रा शैशवकालादेव प्रारब्धा। नैकासु गतिविधिषु तस्य काव्यपाठः श्लाघनीय भवति स्मः 'मधुपवृत्तिः' शीर्षकान्विता रचना तस्य छात्रजीवनस्य उपलब्धासु कवितासु प्रमुखा वर्तते। स्वीयकाव्ययात्रायां कविना देश–प्रदेशाः दृष्टाः। कविः यत्र कुत्रापि गच्छति तस्य लेखनी तदनुरूपमेव काव्यं लिखति। कविना काव्यस्य प्रायशः नूतना विधाः प्रयुक्ताः किञ्च प्राचीनकाव्यपरम्पराऽपि निर्व्यूढा। कविना सर्वशुक्लोत्तरा– काव्यसङ्ग्रहे मधुरा, सरला भाषा प्रयुक्ता।

शोधकार्यसम्पादनाय शोधकर्ता लेखकस्य सकाशं गत्वा तद्व्यक्तित्वमपि परिशीलितवान्। कवेः व्यक्तित्वं बहुसरलं वर्तते सः शीघ्रमेव मादृशानां शोधार्थिनां साहाय्यमाचरति। कवेः स्वभावः सरलः वर्तते, तस्य वैय्यक्तिकः पुस्तकालयोऽपि अस्य शोधकार्यसम्पादनाय सहायकः विद्यते।

सर्वशुक्लोत्तरायां विविधविषयप्रतिपादिकासु कवितासु कविना समाजस्य स्पष्टं चित्रणं कृतम्। कवेः कवितासु स्पष्टः युगबोधो जायते। कवेः काव्येषु विविधाः सामाजिकविषयाः समागताः, तासु – निर्धनता–अशिक्षा–अवृत्ति–यौतुकम्–भ्रष्टाचार–अपवञ्चना–राजनीति–शासनासन्दिका–निर्वाचन–भिक्षावृत्ति–

आतङ्कवाद-देशद्रोहादयः प्रमुखाः विद्यन्ते।

सर्वशुक्लोत्तरायां रचितासु भक्तिपरक-विविधस्थानवैशिष्ट्यपरक-राष्ट्रियभावनापरक-सांस्कृतिकवैशिष्ट्यपरक-पर्वसम्बन्धिनीचिन्तनजीवन-दर्शनपरक-शुभकामनापरकाषु रचनासु कविना तत्तद्विषयकभावाः गभीरतया प्रस्तुताः।

कवेः भक्तिभावनाऽपि सामाजिकी विद्यते। धन्वन्तरिं तमीडे इति शीर्षकमाध्यमेन शारीरिकस्वास्थ्यप्रदातारं धन्वन्तरिं वन्दते कविः, वेदानां चर्चया तद्वन्दनेन चाऽपि कविः कृतज्ञतामेव समर्पयति, वेदास्तु अस्माकं मार्गदर्शकाः।

कवेः राष्ट्रचिन्तनं तु प्रसिद्धमेव, अस्मिन् काव्यसङ्कलने विविधाः कविताः तस्य उत्कृष्टं राष्ट्रचिन्तनं प्रदर्शयन्ति। सः स्वीय कवितामाध्यमेन विविधाः राष्ट्रियसमस्याः उत्थापयति, प्रणम्याः कारगिलवीराः इत्यत्र राष्ट्रस्य प्रहरीभूतान् भटान् स्मरति वन्दते च। भारतस्य दुर्दशाप्रदर्शनं रौति ते भारतम् इति कवितायां करोति। देवतुल्यराष्ट्रस्य पूजनं न कथमपि कर्तुं शक्यते राष्ट्रसेवा एव राष्ट्रपूजनम्। कविः श्रीलालबहादुरशास्त्री, जवाहरलालनेहरू-सुभाषचन्द्रबोससदृशानां महापुरुषाणां स्मरणेन तेषां योगदानं स्मारयति।

कविना अण्डतः ब्रह्माण्डपर्यन्तं सूचिकातः वायुयानपर्यन्तं प्रायशः सर्वेऽपि विषयाः समस्याश्च स्पृष्टाः, कविः एकत्र आतङ्कवादस्य विभीषिकायाः वर्णनं करोति अपरत्र च 'महाकुम्भ' सदृशस्य मेलापकस्य वर्णनम्, एकत्र मधुपवृत्तिं प्रदर्शयति अपरत्र च परमाण्वनुबन्धम्।

अस्मिन् शोधकर्मणि कवेः अभिव्यक्तिकौशलमपि समीक्षितम्। सर्वशुक्लोत्तरायामलङ्कारास्तु प्रतिपदं विद्यन्ते। गवेषकेण विस्तरभयात् प्रमुखा एवालङ्काराः समीक्षिताः। कवेः छन्दोयोजना तु अतीव रमणीया। हिन्दी-उर्दू-संस्कृतच्छन्दसां प्रयोगेण कवेः उदारभावः परिलक्ष्यते, अयमपि सर्वशुक्लोत्तरायाः वैशिष्ट्यमेव। कवेः कथनशैली यद्यपि सरला तथापि ध्वनिस्तु सर्वशुक्लोत्तरां चमत्करोति, भावध्वनेः प्राधान्यमस्ति अत्र। वैदर्भी रीतिः प्रमुखत्वेन कवेः काव्येषु वर्तते। माधुर्यौजःप्रसादगुणसमन्वितरचनया सर्वशुक्लोत्तरा काव्यसङ्ग्रहः स्वीयं विशिष्टं स्थानं बिभर्ति। कविना कुत्रापि व्यर्थपाण्डित्यं

न प्रदर्शितम्, तेन स्वीयमनोभावाः सरलया गिरया प्रकटिताः।

यद्यपि कस्यापि कवेः प्रतिभायाः सक्यक्तया समीक्षणं एकेनैव काव्येन तत्सङ्ग्रहेण वा न भवितुं शक्यते तथापि कविना अर्वाचीनगत्या रचितासु कवितासु अस्माकमादिकवितल्लजानां कालिदाससदृशाणां परम्परानिर्वाहः कृतः। अभिव्यक्तिकौशलसम्पादने पटुतासम्पादनस्य कवेः प्रयासः श्लाघनीयः विद्यते। कविना सामान्यरीत्या स्वीयमनोभावाः प्रकटिताः। कविना आधुनिकसंस्कृतसाहित्यस्य प्रायशः सर्वासामपि विधानां सङ्ग्रहणं स्वीयसङ्ग्रहे कृतम्। याः काव्यविधाः अत्र नागताः ता अपि विषयान्तरेण विषयीभूता एव।

अनेन शोधकर्मणा कवेः सामाजिकचिन्तनं पाठकानां समक्षम् आयास्यति, पाठकाः प्रबोधिताः सन्तः सूक्ष्मेक्षिकया समाजस्य राष्ट्रस्य च चिन्तने दत्तचित्ताः भविष्यन्ति। अनेन सहैव साहित्यसमीक्षायां समागता न्यूनताऽपि दूरं गच्छेदित्येव गवेषकस्य मनीषा।



सन्दर्भग्रन्थसूची

१. अर्वाचीन कविमाला, एस.रंगनाथ, आर.पी.इन्स्टीट्यूट आफॅ संस्कृत स्टडीज, बैंगलूरू २००८।

२. अभिशापम्, रामाकान्तशुक्लः, प्रकाशकः देववाणीपरिषद्, १९८४।

३. अग्निमहापुराणम्, वेदव्यासः, प्रकाशकः नागपब्लिशर्स, जवाहरनगरम्, दिल्ली, वर्षम्-१९८५ ई, पुनर्मुद्रितसंस्करणम्।

४. अभिराजयशोभूषणम्, मिश्रोऽभिराजराजेन्द्रः, प्रकाशकः वैजयन्तप्रकाशनम्, भरद्वाजपुरम् इलाहाबादम्, वर्षम्-२००६ ई., प्रथमसंस्करणम्।

६. अर्वाचीनसंस्कृतमहाकाव्यपरिचयः (३ भागाः), रमाकान्तशुक्लः, देववाणीपरिषद्, नवदेहली,

७. अर्वाचीनसंस्कृतसाहित्यपरिचयः रमाकान्तशुक्लः देववाणीप्रकाशनम् नवदेहली।

८. अमीना, अनूदितउपन्यासः रमाकान्तशुक्लः संस्कृतभारती, नव देहली।

९. आधुनिकसंस्कृतसाहित्यसन्दर्भसूची, प्रधानसम्पादकः-प्रो. राधावल्लभत्रिपाठी सम्पादकाः - रमाकान्तशुक्लः, रमाकान्तपाण्डेयः, धर्मेन्द्रसिंहदेवः, रा.सं.संस्थानम् २०१२।

१०. आधुनिकसंस्कृतसाहित्यसन्दर्भसूची, सम्पादकः-प्रो. वी. कुटुम्बशास्त्री, रा.सं.संस्थानम्, प्रथमसंस्करणम् २००२

११. अभिनवकाव्यालंकारसूत्रम्, (काव्यशास्त्रः) प्रो. राधावल्लभ त्रिपाठी, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी २००५। पुनःसंस्करणं हिन्दीव्याख्यासहितं - डॉ.रमाकान्तपाण्डेयः, जगदीशसंस्कृतपुस्तकालय, किशनपोल बाजार, झालानियों का रास्ता जयपुर, २०१० राजस्थान।

१२. अभिनवकाव्यालंकारकारिका, रेवाप्रसादद्विवेदी, वाराणसी।

१३. आधुनिकसंस्कृतसाहित्यानुशीलनम्, डॉ.रामजीउपाध्यायः, संस्कृतपरिषद्, सागर विश्वविद्यालय, सागर, मध्यप्रदेश, २०२२ विक्रमसंवत् ।

१४. आधुनिकसंस्कृतसाहित्यश्रीः, (डॉ. रामजीउपाध्यायअभिनन्दनग्रन्थः) प्रो.राधावल्लभत्रिपाठी, डॉ. रमाकान्तपाण्डेय, प्रतिभाप्रकाशन नव देहली २००२।

१५. उर्दू हिन्दी संस्कृतकोशः, संकलनकर्त्ता मो. मुस्ताक खां, उ.प्र.हिन्दीसंस्थान, चतुर्थ संस्करण

१६. काव्यप्रकाशः आचार्यमम्मटः चौखम्भाप्रकाशनम्, वाराणसी, विक्रमसंवत् २०६७।

१७. काव्यप्रकाशः, मम्मटः, व्याख्याकारः, आचार्यविश्वेश्वर सिद्धान्तशिरोमणि, सम्पादकः, डॉ. नरेन्द्रः, प्रकाशकः ज्ञानमण्डललिमिटेड,वाराणसी, वर्षम्-२००४ ई., पुनर्मुद्रितसंस्करणम्।

१८. उर्दू-हिन्दी-संस्कृतकोशः संकलनकर्त्ता मो.मुस्ताकखां उ.प्र.हिन्दीसंस्थान, चतुर्थ संस्करण

१९. कालिदासग्रन्थावली, प्रधानसम्पादकः मिथिला प्रसादस्त्रिपाठी, प्रकाशिका कालिदाससंस्कृत-अकादमी, उज्जैन, वर्षम्-२००६ ई., तृतीयसंस्करणम्।

२०. कौमारम्(शिशुगीतसंकलनम्), राजेन्द्रमिश्रः, रा.सं.संस्थानम्, नवदेहली, प्रथम- संस्करणम्

२१. छन्दः प्रभाकर जगन्नाथप्रसादभानु

२२. छन्दोऽभिराजीयम्, अभिराजराजेन्द्रमिश्रः, वैजयन्तप्रकाशन इलाहाबाद १९९९

२३. छन्दोलंकारसौरभम् राजेन्द्रमिश्रः अक्षयवटप्रकाशनम् इलाहाबाद २००१

२४. छन्दोलंकारमंजरी, सम्पादिका - कान्तागुप्ता ईस्टर्नबुकलिंकर्स, १९८५ नव देहली।

२५. जयभारतभूमे, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नव देहली १९८१

२६. देववाणीसुवासः सम्पादकः राजेन्द्रमिश्रः (प्रथमखण्डः, द्वितीयखण्डः) देववाणीप्रकाशनम् १९९३ नव देहली ।
२७. देवभूमिग्रामशतकम्, हेमचन्द्रबेलवालः, ईस्टर्नबुकलिंकर्स, २०१४प्रथमसंस्करणम्, नवदेहली ।
२८. ध्वन्यालोकः, आनन्दवर्धनाचार्यः, हिन्दी व्याख्याकारः जगन्नाथपाठकः, प्रकाशकः चौखम्बा विद्याभवन, वाराणसी, वर्षम्–२००९ ई., पुनर्मुद्रितसंस्करणम्।
२९. नाट्यसप्तकम्, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, १९९२ नव देहली ।
३०. निबन्धशतकम्, डॉ.कपिलद्विवेदी, विश्वविद्यालयप्रकाशनम्, वाराणसी, २००७
३१. पण्डितराजीयम्, रमाकान्तशुक्लः देववाणीप्रकाशनम्,१९९४ नवदेहली ।
३२. पुरश्चरणकमलम्, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, १९८५, नवदेहली ।
३३. नाट्यशास्त्रम्, भरतमुनिः, सम्पादकः–रविशंकर नागर, प्रकाशकः परिमल पब्लिकेशन्स शक्ति नगर, दिल्ली, वर्षम्–२००३ ई., पुनर्मुद्रितसंस्करणम्।
३४. भाति ते भारतम्, डॉ.हर्षदेवमाधवः, गंजाम, उडीसा, २००७
३५. भाति मे भारतम्, रमाकान्तशुक्लः देववाणीप्रकाशनम्, (प्रथमतः दशमसंस्करणं यावत्, १९८०- २०१० नवदेहली ।
३६. भारतजनताऽहम्, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नव देहली, २००१, पुनर्मुद्रणं २००२।
३७. भारतस्य सांस्कृतिकनिधिः, डॉ.रामजीउपाध्यायः, चौखम्बाविद्याभवनम्, वाराणसी, पुनर्मुद्रितसंस्करणम् २००६ ।
३८. वृत्तरत्नाकरः, आचार्यमधुसूदनशास्त्री, कृष्णदास अकादमी वाराणसी, १९८२
३९. वाक्यपदीयम्, आ भतृहरिः, चौखम्बाप्रकाशनम्, वाराणसी, २००२
४०. वागीश्वरीकण्ठसूत्रम्, डॉ.हर्षदेवमाधवः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१२
४१. साहित्यदर्पणम्, विश्वनाथः, व्याख्याकारः–शेषराजशर्मा रेग्मी, प्रकाशकः कृष्णदासअकादमी, वाराणसी, वि.सं.–२०५६, अष्टमसंस्करणम्,
४२. सुभाषितरत्नभाण्डागारम्, सम्पादक–नारायण राम आचार्य ''काव्यतीर्थ'', प्रकाशकः चौखम्बा संस्कृत प्रतिष्ठान बंगलो रोड, दिल्ली, वर्षम्–२००७ ई., पुनर्मुद्रितसंस्करणम्।
४३. सर्वशुक्ला, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नवदेहली, २००३ ।
४४. सर्वशुक्लोत्तरा, रमाकान्तशुक्लः, देववाणीप्रकाशनम्, नवदेहली, २००८ ।
४५. सर्वशुक्लोत्तरा, हिन्दीव्याख्या–रमा शुक्ला, देववाणीप्रकाशनम्, नव देहली, २०१२
४६. साहित्यवैभवम्, भट्टश्री मथुरानाथशास्त्री, निर्णयसागरप्रेस मुम्बई, १९३०
४७. संस्कृतसाहित्यशास्त्रे गुणविवेचनम्, डॉ.विश्वमूर्तिशास्त्री, अमरग्रन्थपब्लिकेशन, नवदेहली २००४।
४८. संस्कृतसाहित्येतिहासः आ. रामचन्द्रमिश्रः, चौखम्बाप्रकाशनम्, वाराणसी २०१०

हिन्दीग्रन्थाः
४९. आधुनिक संस्कृतकाव्य की परिक्रमा, डॉ.मंजुलताशर्मा, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली,
५०. डॉ रमाकान्त शुक्ल का संस्कृत साहित्य को योगदान(शोधग्रन्थ),दुर्गाप्रसाद सिंह, निर्देशक डॉ सभापति शास्त्री, चौ. च. सिं. वि. वि. मेरठ, २०००
५१. डॉ रमाकान्त शुक्ल के काव्यों में राष्ट्रियभावना, (शोधग्रन्थ) राजशेखर मिश्र, निर्देशक डॉ. मारुतिनन्दन पाठक, मगधविश्वविद्यालय बोधगया, बिहार, २००२

५२. हिन्दी छन्द अलंकार- एक विवेचन , डॉ.सागर चन्द्र, हरियाणा साहित्य अकादमी पंचकूला, २०००
५३. मथुरा प्रसाद दीक्षित के रूपकों की समीक्षा, डॉ. अजय कुमार मिश्रः, अभिव्यक्तिप्रकाशन नई दिल्ली, २००८
५४. संस्कृत साहित्य में राष्ट्रियभावना, डॉ.हरिनारायणदीक्षित , देववाणीप्रका. नव देहली १९८४
५५. संस्कृत लोकोक्ति कोष, शशि तिवारी, सूचना एवं प्रसारण मंत्रालय, भारत सरकार, रा.सं. संस्थानम् २००८
५६. समीक्षाशास्त्र, पं.सीताराम चतुर्वेदी, कृष्णदास अकादमी, वाराणसी २संस्करण १९८३
५७. संस्कृत साहित्य का बृहद् इतिहास, सप्तम खण्ड, आधुनिक संस्कृत साहित्य का इतिहास, प्रधान सम्पादक श्री बलदेव उपाध्याय, सम्पादक डॉ.जगन्नाथ पाठक, उ.प्र. संस्कृत संस्थान लखनऊ, प्रथम संस्करण, २०००।
५८. संस्कृत साहित्य २०वीं शताब्दी, आचार्य राधावल्लभत्रिपाठी, रा.सं.संस्थानम्, नई दिल्ली, १९९९
५९. संस्कृत साहित्य का अभिनव इतिहास, डॉ. राधावल्लभ त्रिपाठी, विश्वविद्यालयप्रकाशन वाराणसी, प्रथम संस्करण २००१ ।
६०. संस्कृत साहित्य का बृहद् इतिहास, डॉ.पुष्पा गुप्ता, ईष्टर्न बुक लिंकर्स, दिल्ली, प्रथम संस्करण २०११ ।
६१. The New Encyclopaedia Britannina, Encyclopaedia Britannica, Chicago Inc. 15th Edition, Year-2005
६२. Neeta Hindi English Dictionary Neeta Publisher, South Extension, New Delhi, 2002 .

शोधपत्रिकाः

६२. अर्वाचीनसंस्कृतम्, त्रैमासिकपत्रिका, सम्पादकः रमाकान्तशुक्लः, देववाणीपरिषद्, न.दिल्ली १९७९।
६३. आदर्शः, प्रधानसम्पादकः डॉ. भोला झा, भगवानदास आदर्श संस्कृत महाविद्यालय, हरिद्वार ।
६४. पारिजातम्, मासिकपत्रिका,(अस्तङ्गता) कर्णपुरम्, उत्तरप्रदेशम्।
६५. शोधप्रभा (त्रैमासिकीशोधपत्रिका) प्रकाशकः-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नव देहली.
६६. सागरिका (त्रैमासिकी शोधपत्रिका) प्रकाशिका-सागरिकासमितिः संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् ।
६७. विश्वसंस्कृतम् (त्रैमासिकम्) सम्पादकः प्रो.इन्द्रदत्तउनियालः, प्रकाशकः-विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्, साधु-आश्रमः, होशियारपुरम्, पञ्जाबः।
६८. हलायुधकोशः, सम्पादकः-जयशङ्करजोशी, प्रकाशकः-हिन्दी समिति सूचना विभाग लखनऊ, उत्तर प्रदेश, वर्षम्- १९६७, द्वितीयसंस्करणम् ।
६९. सम्भाषणसन्देशः, (मासिकपत्रिका) सम्पादकः जनार्दन हेगडे, संस्कृतभारती, अक्षरम्, गिरिनगरम्, बेङ्गलूरु ।

Cell/LDD/ACGD/...

Copy of DATA/ Shukla/

Shukla & DMS

Cell/LDD/ACGD/...

Copy of DATA/Nadi/

NM

Cell/LDD/ACGD/...

Copy of DATA/ Sunder

DMS ... Sunder DMS

[illegible]

eonly / LDD / ACGD / [illegible] /
Copy of DATA / Shukla /
EXTRA PMS / [illegible]

[illegible] EXTRA 7 PMS
DVD के [illegible]
RSpandey का [illegible]

[illegible] — [illegible]
[illegible]
[illegible] / Shukla /
Janatahau PMS (पृ. 142)

[illegible]
[illegible] Shukla / J. Bharat / [illegible]
[illegible]

[illegible]

[illegible] / Shukla / Nataka PMS

CMS का [illegible]

[illegible] / Shukla / [illegible] 3 PMS

[illegible]

[illegible] / Shukla / P-2 PMS

" " / Prakash PMS 5

[illegible] के लिए पत्र

[illegible] / Shukla / Patra PMS

[illegible]

[illegible] / Shukla / RAMA PMS.

" " / rama 2 PMS

" " / rama 3 PMS

" [illegible] / Sama PMS


[illegible] — ShriHari

[illegible] / Shukla PMS etc

Shukla [illegible]

Shukla 3 [illegible]

लेखक-परिचयः



डॉ. चन्द्रप्रकाश उप्रेती

पितृनाम	- श्री उर्बादत्त उप्रेती
मातृनाम	- श्रीमती लक्ष्मी देवी
जन्मतिथि	- २८.०६-१९८७
जन्मस्थान	- ग्रामः सुरखाल, पो-जाख, अल्मोड़ा (उ.ख)
शिक्षा	- साहित्याचार्यः, एम.ए.(हिन्दी), एम.एड., पीएच.डी.
शिक्षास्थलानि	- जूनियरहाईस्कूल तड़ैनी, अल्मोड़ा, उ.खण्डः, (पू.मध्यमा) श्रीदुर्गादत्तकपिलाश्रमीसंस्कृतविद्यालयः, हल्द्वानी,(उ.मध्यमा) भगवान् दास आदर्श संस्कृत महाविद्यालय, हरिद्वार (शास्त्री) राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली (बी.एड), श्री लालबहादुर शास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नईदिल्ली (एम.एड), राष्ट्रिय संस्कृतसंस्थानम्, नईदिल्ली (पीएच.डी)
विविधम्	- जयपुर-बैंगलूर-तिरुपतिप्रभृतिविभिन्नस्थानेषु आयोजितेषु अखिलभारतीयभाषणस्पर्धा, शलाकाप्रतियोगिता, अखिल-भारतीयप्रतिभासमारोहश्चेत्यादिषु नैकानि पदकानि प्राप्तानि तथा च विविधराष्ट्रियान्ताराष्ट्रियशोधसम्मेलनेषु शोधपत्राणि अपि प्रस्तुतानि।
साम्प्रतिकवृत्तिः	- संस्कृत-प्रवक्ता, राजकीय-इण्टरकालेज, गंगानगर, मोतियापाथर, अल्मोड़ा, उत्तराखण्डः
दूरभाषः	- 08449129380, 09410149033
Email –	-

ISBN: 978-81-85924-25-0